श्रीमद्भगवद्गीता

श्रीपादविश्वनाथचक्रवर्त्तिमहोदयविरचित-
सारार्थवर्षिणीटीकया एवं श्रीयुत-
बलदेवविद्याभूषणमहोदयविरचित-
गीताभूषणभाष्येण
समलंकृता

प्रकाशक—
कृष्णदास बाबा

In Care of Prahlādananda Swami

॥ श्रीश्रीगौरहरिर्जयति ॥

प्रकाशितग्रन्थसंख्या— १३६

श्रीमद्भगवद्गीता

श्रीपादविश्वनाथचक्रवर्त्तिमहोदयविरचित-
"सारार्थवर्षिणी" टीकया एवं श्रीयुत-
बलदेवविद्याभूषणमहोदयविरचित
"गीताभूषण" भाष्येण
समलंकृता

सम्वत्— २०२३
न्यौछावर— ४ रु ५० नये पैसे

प्रकाशक—
कृष्णदासबाबा
कुसुमसरोवर
राधाकुण्ड
(मथुरा)

गौरहरिप्रेस, कुसुमसरोवर, राधाकुण्ड (मथुरा)

भावपूर्णं, रससंपृक्त गीताशास्त्र का आस्वादन करना चाहें तो चक्रवर्त्तीजी की इस टीका का अवश्य अवलोकन करें। उन की रसिकता यहाँ स्पष्ट ही व्यक्त होती है कि—उन्होंने टीका का सम्पूर्ण निर्म्माण कर कहीं रखा था, परन्तु उस में से चूहों ने शेष के दो पत्र खा गये। वे पुनः लिख भी सकते थे परन्तु लिखा नहीं-आप शेष ७४ से ७८ श्लोकों की टीका के बारे में कहते हैं—"अतः परं पञ्च-श्लोकव्याख्या सर्वगीतातात्पर्य्यनिष्कर्षेऽन्तिमश्लोका यत्र वर्त्तन्ते, तां पत्रद्वयीं विनायकः स्ववाहनेनाखुनापहृतवानित्यतः पुनर्नालिखम्। तां तन्मात्रबादाम्, स प्रसीदतु तस्मै नमः। इति श्रीमद्भगवद्-गीताटीका "सारार्थवर्षिणी" समाप्तीभूता सतां प्रीतये स्तादिति"।

अर्थात्—"इसके आगे समस्त गीतार्थ-तात्पर्य निष्कर्षरूप अन्तिम पांच श्लोक की व्याख्या जहाँ रक्खी हुई थी, उन दो पत्रों को विनायक अर्थात् गणेश जी ने अपने वाहन अखु अर्थात् चूहों से हरण करा लिया, भावार्थ-चूहे दो पत्र खागये। इसमें गणेश जी का क्या आशय था नहीं कह सकता, इसलिये मैंने पुनः उन पांच श्लोको की टीका नहीं लिखी। वे गणेशजी प्रसन्न हों उनको नमस्कार" ऐसा कहकर उन्होंने अपनी सारार्थवर्षिणी टीका को समाप्त किया। कलिकत्ता "गौड़ीयमिशन" ने बडा भारी उपकार किया कि उस मिशन ने चक्रवर्त्तिजी की "सारार्थवर्षिणी" टीका का बंगाक्षर में प्रकाशन कर विद्वन्समाज के प्रत्यक्षीभूत किया। श्रीहृषीकेशशोल, बि, ए, ने चक्रवर्त्तीटीका का अनुसरण से एक मर्म्मानुवाद प्रस्तुत कर छपवाया। श्रीमद्भक्तिसिद्धान्तसरस्वती जी महोदय का सम्पादकत्व में श्रीकुञ्जविहारिविद्याभूषण के प्रकाशकत्व में श्रीपाद बलदेवविद्याभूषण महोदय का "गीताभूषणभाष्य" बंगाक्षर में सानुवाद प्रकाशित हो चुका है। अस्तु मुद्रणादि में प्रेस सम्बन्धी त्रुटियाँ रह गई होंगी तो उस लिये क्षमा चाहते हैं। (कृष्णदास)

अथ श्रीमद्भगवद्गीता

प्रथमोऽध्यायः

धृतराष्ट्र उवाच—

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
मामकाः पाण्डवाश्चैव किमकुर्वत संजय ॥१॥

श्रीलविश्वनाथचक्रवर्त्तिठाकुरकृता

'सारार्थवर्षिणी' टीका

गौरांशुकः सत्कुमुदप्रमोदी स्वाभिख्यया गोस्तमसो निहन्ता।
श्रीकृष्णचैतन्यसुधानिधिर्मे मनोऽधितिष्ठन् स्वरतिं करोतु ॥१॥
प्राचीनवाचः सुविचार्य्य सोऽहमज्ञोऽपि गीतामृतलेशलिप्सुः।
यतेः प्रभोरेव मते तदत्र सन्तः क्षमध्वं शरणागतस्य ॥२॥

इह खलु सकलशास्त्राभिमत-श्रीमच्चरणसरोजभजनः स्वयं भगवान्नराकृति-परब्रह्मश्रीवसुदेवसूनुः साक्षाच्छ्रीगोपालपुर्य्यामवतीर्य्यापार-परमातर्क्य-प्रापञ्चिक-सकललोचन-गोचरीकृतो भवाब्धिनिमज्जमानान् जगज्जनानुद्धृत्य स्वसौन्दर्य्यमाधुर्य्यास्वादनया स्वीयप्रेममहाम्बुधौ निमज्जयामास।

शिष्टरक्षा दुष्टनिग्रह-व्रतनिष्ठामहिष्ठप्रतिष्ठोऽपि भुवो भारदुःखापहारमिषेण दुष्टानामपि स्वद्वेष्टॄणामपि महासंसार-ग्राह-ग्रासीभूतानामपि मुक्तिदानलक्षणं परम-रक्षणमेव कृत्वा स्वान्तर्द्धानोत्तरकाल-जनिष्यमाणाननाद्यविद्याबन्धनिबन्धनशोकमोहाद्याकुलानपि जीवानुद्धर्त्तुं शास्त्रकृन्मुनिगणगीयमानयशश्च धर्त्तुं स्वप्रियसखं तादृश-स्वेच्छावशादेव रणमूर्द्धन्युद्भूतशोकमोहं श्री-

मदर्ज्जुनं लक्ष्यीकृत्य काण्डत्रितयात्मक-सर्व्ववेदतात्पर्य्य-पर्य्यवसितार्थरत्नालङ्कृतं श्रीगीताशास्त्रमष्टादशाध्यायमन्तर्भूताष्टादशविद्यं साक्षाद्विद्यमानीकृतमिव परमपुरुषार्थमाविर्भावयाम्बभूव । तत्राध्यायानां षट्केन प्रथमेन निष्कामकर्म्मयोगः, द्वितीयेन भक्तियोगः, तृतीयेन ज्ञानयोगो दर्शितः । तत्रापि भक्तियोगस्यातिरहस्यत्वादुभय-सञ्जीवकत्वेनाभ्यर्हितत्वात् सर्व्वदुर्ल्लभत्वाच्च मध्यवर्त्तीकृतः । कर्म्म-ज्ञानयोर्भक्तिराहित्येन वैयर्थ्यात्ते द्वे भक्तिमिश्रे एव सम्मतीकृते । भक्तिस्तु द्विविधा—केवला, प्रधानीभूता च । तत्राद्या स्वत एव परमप्रवला, ते द्वे (कर्म्म-ज्ञाने) विनैव विशुद्ध-प्रभावती, अकिञ्चना, अनन्यादि-शब्द-वाच्या ; द्वितीया तु कर्म्म-ज्ञानमिश्रेत्यखिलमग्रे विवृतीभविष्यति ।

अथार्ज्जुनस्य शोकमोहौ कथम्भूतावित्यपेक्षायां महाभारतवक्ता श्रीवैशम्पायनो जनमेजयं प्रति तत्र भीष्मपर्व्वणि कथामवतारयति,—‘धृतराष्ट्र उवाच’ इति । कुरुक्षेत्रे युयुत्सवो युद्धार्थं सङ्गता मामका दुर्य्योधनाद्याः पाण्डवाश्च युधिष्ठिरादयः किं कृतवन्तस्तद्ब्रूहि । ननु युयुत्सव इति त्वं ब्रवीष्येवातो युद्धमेव कर्त्तुमुद्यतास्ते तदपि किमकुर्व्वतेति केनाभिप्रायेण पृच्छसीत्यत आह,—धर्म्मक्षेत्र इति । “कुरुक्षेत्रं देवयजनम्” इति श्रुतेस्तत्-क्षेत्रस्य धर्म्मप्रवर्त्तकत्वं प्रसिद्धम् । अतस्तत्संसर्गमहिम्ना यद्यधार्म्मिकाणामपि दुर्य्योधनादीनां क्रोधनिवृत्त्या धर्म्मे मतिः स्यात् ; पाण्डवास्तु स्वभावत एव धार्म्मिकास्ततो बन्धूहिंसनमनुचितमित्युभयेषामपि विवेके उद्भूते सन्धिरपि संभाव्यते ; ततश्च ममानन्द एवेति सञ्जयं प्रति ज्ञापयितुमिष्टो भावो वाह्यः । आभ्यन्तरस्तु सन्धौ सति पूर्व्ववत् सकण्टकमेव राज्यं मदात्मजानामिति मे दुर्वार एव विषादः । तस्मादस्माकीनो भीष्म-

स्त्वर्जुनेन दुर्जय एवेत्यतो युद्धमेव श्रेयस्तदेव भूयादिति तु तन्मनोरथोपयोगी दुर्लक्ष्यः । अत्र धर्मक्षेत्रे इति क्षेत्रपदेन-धर्मस्य धर्मावतारस्य सपरिकरयुधिष्ठिरस्य धान्यस्थानीयत्वम् , तत्पालकस्य श्रीकृष्णस्य कृषिबलस्थानीयत्वम् , कृष्णकृतनानाविधसाहाय्यस्य जलसेचनसेतुबन्धनादिस्थानीयत्वम् , श्रीकृष्णसंहार्य-दुर्योधनादेर्धान्यद्वेषिधान्याकारतृणविशेषस्थानीत्वं च बोधितं सरस्वत्या ॥१॥

श्रीमद्-बलदेवविद्याभूषणकृतं

‘गीताभूषण’भाष्यम्

ॐ नमः श्रीगोविन्दाय

सत्यानन्ताचिन्त्यशक्त्येकपक्षे सर्व्वाध्यक्षे भक्तरक्षातिदक्षे ।
श्रीगोविन्दे विश्वसर्गादिकन्दे पूर्णानन्दे नित्यमास्तां मतिर्मे ॥१॥

अज्ञान-नीरधिरुपैति यया विशोषं
भक्तिः परापि भजते परिपोषमुच्चैः ।
तत्त्वं परं स्फुरति दुर्गममप्यजस्रं
साद्गुण्यभृत् स्वरचितां प्रणमामि गीताम् ॥२॥

अथ सुखचिद्घनः स्वयं भगवानचिन्त्यशक्तिः पुरुषोत्तमः स्वसङ्कल्पायत्तविचित्र---जगदुदयादिविरिञ्च्यादिसंचिन्त्यचरणः स्वजन्मादिलीलया स्वतुल्यान् सहाविर्भूतान् पार्षदान् प्रहर्षयंस्तथैव जीवान् बहूनविद्याशार्द्दूलीवदनाद्विमोच्य स्वान्तर्द्धानोत्तरभाविनोऽन्यानुद्दिधीर्षुराहवमूर्द्धिन स्वात्मभूतमप्यर्ज्जुनमत्रितर्क्यस्वशक्त्या सम्मोहमिव कुर्व्वन् तन्मोहविमार्ज्जनापदेशेन सपरिकरस्वात्मयाथात्म्यैकनिरूपिकां स्वगीतोपनिषदमुपादिशत् । तस्यां खल्वीश्वर-जीव-प्रकृति-काल-कर्म्माणि पञ्चार्था वर्ण्यन्ते ;–

तेषु विभुसंबिदीश्वरः, अणुसम्बिज्जीवः, सत्त्वादिगुणत्रयाश्रयो
द्रव्यं प्रकृतिः, त्रैगुण्यशून्यं जड़द्रव्यं कालः, पुंप्रयत्ननिष्पाद्यम-
दृष्टादिशब्दबाच्यं कर्म्मेति। तेषां लक्षणानि ;—एष्वीश्वरादीनि
चत्वारि नित्यानि ; जीवादीनि त्वीशबश्यानि, कर्म्म तु प्राग-
भाववदनादि बिनाशि च ; तत्र सम्बित्स्वरूपोऽपीश्वरो जीवश्च
सम्बेत्तास्मदर्थश्च,—"बिज्ञानमानन्दं ब्रह्म", "यः सर्व्वज्ञः सर्व्व-
बित्", "मन्ता बोद्धा कर्त्ता बिज्ञानात्मा पुरुषः" इत्यादि-श्रुतेः ;
"सोऽकामयत बहु स्याम्", "सुखमहमस्वाप्सं न किञ्चिदवे-
दिषम्" इत्यादि श्रुतेश्च । न चोभयत्र महत्तात्त्वजातोऽयमहङ्कारः
तदा तस्यानुत्पत्तेर्विलीनत्वाच्च । स च स च कर्त्ता भोक्ता
सिद्धः—"सर्व्वज्ञः सर्व्वविन कर्त्ता बोद्धा" इति पदेभ्यः ; अनु-
भवितृत्वं खलु भोक्तृत्वं सर्व्वाभ्युपगतं ; "सोऽश्नुते सर्व्वान्
कामान् सह ब्रह्मणा बिपश्चिता" इति श्रुतेस्तूभयोस्तत् अव्यक्तम् ।
यद्यपि सम्बित्स्वरूपात् सम्बेत्तृत्वादि नान्यत् प्रकाशस्वरूपाद्र-
रवेरिब प्रकाशकत्वादि, तथापि बिशेषसामर्थ्यात्तादन्यत्वव्यवहारः।
बिशेषश्च भेदप्रतिनिधिर्न भेदः ; स च भेदाभावेऽपि भेदकार्य्य-
स्य धर्म्मधर्म्मिभावादिव्यबहारस्य हेतुः,—सत्ता सती भेदो भिन्नः
कालः सर्व्वदास्तीत्यादिषु बिद्वद्भिः प्रतीतः । तत्प्रतीत्यन्यथानुप-
पत्त्या "एवं धर्म्मान् पृथक् पश्यंस्तानेबानुबिधावति" इति श्रुत्या
च सिद्धः। इह हि ब्रह्मधर्म्मानभिधाय तद्भेदः प्रतिषिध्यते । न
खलु भेदप्रतिनिधेस्तस्याप्यभावे धर्म्मधर्म्मिभावधर्म्मबहुत्वे शक्ये
बक्तुमित्यनिच्छुभिरपि स्वीकार्य्याः स्युः त इमेऽर्थाः शास्त्रेऽस्मिन्
यथास्थानमनुसन्धेयाः । इह हि जीवात्म-परमात्म-तद्धाम तत्-
प्राप्त्युपायानां स्वरूपाणि यथाबन्निरूप्यन्ते । तत्र जीवात्म-
याथात्म्य-परमात्मयाथात्म्योपयोगितया परमात्मयाथात्म्यन्तु तदु-
पासनोपयोगितया प्रकृत्यादिकं तु परमात्मनः स्रष्ट्रुपकरणतयो-

पदिश्यते। तदुपायाश्च कर्म्मज्ञानभक्तिभेदात् त्रेधा। तत्र श्रुत-
तत्तत्फलनैरपेक्ष्येण कर्त्तृत्वाभिनिवेशपरित्यागेन चानुष्ठितस्य स्व-
बिहितस्य कर्म्मणः हृद्विशुद्धिद्वारा ज्ञानभक्त्योरुपकारित्वात्
परम्परया तत्प्राप्तावुपायत्वम् । तच्च श्रुतिबिहितकर्म्म हिंसा-
शून्यमत्र मुख्यम्। मोक्षधर्म्मे पितापुत्रादिसंबादात् हिंसाबत्तु
गौणं बिप्रकृष्टत्वात् तयोस्तु साक्षादेव तथात्वम्। ननु तथानुष्ठि-
तेन कर्म्मणा हृद्विशुद्धया ज्ञानोदयेन मुक्तौ सत्यां भक्त्या को
बिशेषः ? उच्यते, ज्ञानमेव किञ्चिद्विशेषाद्भक्तिरिति ; निर्णिमेषत्वी-
क्षणकटाक्षबीक्षणबदनयोरन्तरं चिद्विग्रहतयानुसन्धिर्ज्ञानं तेन
तत्सालोक्यादिः । बिचित्रलीलारसाश्रयतयानुसन्धिस्तु भक्ति-
स्तया क्रोड़ीकृतसालोक्यादितद्धरिबस्यानन्दलाभः पुमर्थः। भक्ते-
र्ज्ञानत्वं तु "सच्चिदानन्दैकरसे भक्तियोगे तिष्ठति"इति श्रुतेः
सिद्धम्। तदिदं श्रवणादिभाबादिशब्दव्यपदिष्टं दृष्टम्। ज्ञानस्य
श्रवणाद्याकारत्वं चित्सुखस्य बिष्णोः कुन्तलादिप्रतीकत्ववत्
प्रत्येतव्यमिति बक्ष्यामः। षट्त्रिकेऽस्मिन्शास्त्रे—प्रथमेन षट्केने-
श्वरांशस्य जाबस्यांशीश्वरभक्त्युपयोगिस्वरूपदर्शनम् ; तच्चान्त-
र्गतज्ञाननिष्कामकर्म्मसाध्यं निरूप्यते । मध्येन परम-प्राप्यस्यां-
शीश्वरस्य प्रापणी भक्तिस्तन्महिमधीपूर्व्विकाभिधीयते। अन्त्येन
तु पूर्व्वोदितानामेवेश्वरादीनां स्वरूपाणि परिशोध्यन्ते ।
त्रयाणां षट्कानां कर्म्मभक्तिज्ञानपूर्व्वता-व्यपदेशस्तु तत्तत्प्राधा-
न्येनैव ; चरमे भक्तेः प्रतिपत्तेश्चोक्तिस्तु रत्नसम्पुटोद्र्ध्व-
लिखित-तत्सुचकलिपिन्यायेन। अस्य शास्त्रस्य श्रद्धालुः सद्धर्म्म-
निष्ठो बिजितेन्द्रियोऽधिकारी। स च सनिष्ठ-परिनिष्ठित-निरपेक्ष-
भेदात्त्रिबिधः—तेषु स्वर्गादिलोकानपि दिदृक्षुर्निष्ठया स्वधर्म्मान्
हर्य्यर्च्चनरूपानाचरन् प्रथमः ; लोकसंजिघृक्षया तानाचरन् हरि-
भक्तिनिरतो द्वितीयः ; स च स च साश्रमः ; सत्य-तपो-जपादिभि-

विशुद्धचित्तो हर्य्येकनिरतस्तृतीयो निराश्रमः। बाच्यबाचकभावः सम्बन्धः,—बाच्य उक्तलक्षणः श्रीकृष्णः, बाचकस्तद्गीताशास्त्रं तादृशः सोऽत्र बिषयः। अशेष-क्लेश-निबृत्तिपूर्व्वकस्तत्साक्षात्-कारस्तु प्रयोजनमित्यनुबन्धचतुष्टयम् । अत्रेश्वरादिषु त्रिषु ब्रह्म-शब्दोऽक्षरशब्दश्च, बद्धजीवेषु तद्देहेषु च क्षरशब्दः, ईश्वरजीबदेहे मनसि बुद्धौ धृतौ यत्ने चात्मशब्दः, त्रिगुणायां बासनायां शीले स्वरूपे च प्रकृतिशब्दः, सत्ताभिप्रायस्वभावपदार्थजन्मसु क्रिया-स्वात्मसु च भावशब्दः, कर्म्मादिषु त्रिषु चित्तबृत्तिनिरोधे च योगशब्दः पठ्यते। एतच्छास्त्रं खलु स्वयं भगवतः साक्षाद्वचनं सर्व्वतः श्रेष्ठं—"गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रबिस्तरैः। या स्वयं पद्मनाभस्य मुखपद्माद्विनिर्गता"इति पाद्मात्। धृतराष्ट्रा-दिबाक्यन्तु तत्सङ्गतिलाभाय द्वैपायनेन बिरचितम् । तच्च लब-णाकरनिपात-न्यायेन तन्मयमित्युपोद्घातः । "संग्राममूर्द्धिन संबादो योऽभुद्गोविन्दपार्थयोः। तत्सङ्गत्यै कथां प्राख्याद्गी-तासु प्रथमे मुनिः॥" इह ताबद्भगबदर्जुनसंबादं प्रस्तोतुं कथा निरूप्यते,—धर्म्मक्षेत्र इत्यादिभिः सप्तबिंशत्या। तद्भगवतः पार्थ-सारथ्यं बिद्वान् धृतराष्ट्रः स्वपुत्रबिजये सन्दिहानः सञ्जयं पृच्छ-तीत्याह,-जन्मेजयं प्रति वैशम्पायनः,-धृतराष्ट्र उवाचेति। युयुत्सवो योद्धुमिच्छबो मामका मत्पुत्राः पाण्डबाश्च कुरुक्षेत्रेसमवेताः किमकुर्ब्बतेति। ननु युयुत्सबः समवेता इति त्वमेबात्थ ततो युद्धेरन्नेब, पुनः किमकुर्ब्बतेति कस्ते भाव इति चेत्, तत्राह,-धर्म्मक्षेत्र इति । "यदनु कुरुक्षेत्रं देबानां देबयजनं सर्व्बेषां भूतानां ब्रह्मसदनम्" इत्यादि-श्रबणाद्धर्म्मप्ररोहभूमिभूतं कुरुक्षेत्रं प्रसिद्धम्। तत्प्रभावाद्विनष्टबिद्वेषा मत्पुत्राः किं पाण्डवेभ्यस्तद्राज्यं दातुं निश्चिक्युः? किम्बा, पाण्डबाः सदैव धर्म्मशीला धर्म्मक्षेत्रे तस्मिन् कुलक्षयहेतुकादधर्म्माद्भीता बनप्रवेशमेब श्रेयो बिममृशु-

रिति? हे सञ्जयेति व्यासप्रसादाद्विनष्टरागद्वेषस्त्वं तथ्यं बदे-त्यर्थः। पाण्डबानां मामकत्वानुक्तिर्धृतराष्ट्रस्य तेषु द्रोहमभि-व्यनक्ति। धान्यक्षेत्रात्तद्विरोधिनां धान्याभासानामिब धर्म्मक्षेत्रा-त्तद्विरोधिनां धर्म्माभासानां त्वत्पुत्राणामपगमो भावीति धर्म्म-क्षेत्रशब्देन गीर्देव्या व्यज्यते ॥१॥

संजय उवाच—

दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा ।
आचार्य्यमुपसङ्गम्य राजा वचनमब्रवीत् ॥२॥
पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम् ।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥३॥

सा० व०—

विदिततदभिप्रायस्त्वदाशंसितं युद्धमेव भवेत्, किन्तु तन्म-नोरथप्रतिकूलमिति मनसि कृत्वोवाच-दृष्ट्वेति, व्यूढं व्यूहरचन-यावस्थितम्। राजा दुर्योधनः सान्तर्भयमुवाच,—पश्यैतामिति नवभिः श्लोकैः ॥२॥

द्रुपदपुत्रेण धृष्टद्युम्नेन तव शिष्येणेति स्वबधार्थमुत्पन्न इति जानतापि त्वयाऽयमध्यापित इति तव मन्दबुद्धित्वम्। धीमतेति शत्रोरपि त्वत्तः सकाशात् त्वद्बधोपायविद्या गृहीतेत्यस्य महा-बुद्धित्वं फलकालेऽपि पश्येति भावः ॥३॥

गी० भू०—

एवं जन्मान्धस्य प्रज्ञाचक्षुषो धृतराष्ट्रस्य धर्म्मप्रज्ञाबिलोपान्मोहा-न्धस्य मत्पुत्रः कदाचित् पाण्डवेभ्यस्तद्राज्यं दद्यादिति बिम्लान-चित्तस्य भावं बिज्ञाय धर्म्मिष्ठः सञ्जयस्त्वत्पुत्रः कदाचिदपि तेभ्यो राज्यं नार्पयिष्यतीति तत्सन्तोषमुत्पादयन्नाह,—दृष्ट्वेति। पाण्ड-

बानामनीकं सैन्यं, व्यूढं व्यूहरचनयावस्थितम्, आचार्य्यं धनुर्विद्याप्रदं द्रोणम् उपसङ्गम्य स्वयमेव तदन्तिकं गत्वा राजा राजनीतिनिपुणः बचनमल्पाक्षरत्वं गम्भीरार्थत्वं संक्रान्तबचनविशेषम्। अत्र स्वयमाचार्य्यसन्निधिगमनेन पाण्डबसैन्यप्रभावदर्शनहेतुकं तस्यान्तर्भयं गुरुगौरवेण तदन्तिकं स्वयमागतबानस्मीति भयसङ्गोपनञ्च व्यज्यते। तदिदं राजनीतिनैपुण्यादिति च राजपदेन ॥२॥

तत्तादृशं बचनमाह,—पश्यैतामित्यादिना। प्रियशिष्येषु युधिष्ठिरादिषु स्नेहातिशयादाचार्य्यो न युध्येदिति विभाव्य तत्कोपोत्पादनाय तस्मिंस्तदवज्ञां व्यञ्जयन्नाह,—एतामिति। एतामतिसन्निहितां प्रागल्भ्येनाचार्य्यमतिशूरञ्च त्वामविगणय्य स्थितां दृष्ट्वा तदवज्ञां प्रतीहीति, व्यूढां व्यूहरचनया स्थापिताम् द्रुपदपुत्रेणेति त्वद्वैरिणा द्रुपदेन त्वद्वधाय धृष्टद्युम्नः पुत्रो यज्ञाग्निकुण्डादुत्पादितोऽस्तीति, तव शिष्येणेति त्वं स्वशत्रुं जानन्नपि धनुर्विद्यामध्यापितबानसीति तव मन्दधीत्वम्, धीमतेति शत्रोस्त्वत्तस्त्वद्वधोपायो गृहीत इति तस्य सुधीत्वम्। त्वदपेक्ष्यकारितैवास्माकमनर्थहेतुरिति ॥३॥

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि।
युयुधानो विराटश्च द्रुपदश्च महारथः ॥४॥
धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान्।
पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुङ्गवः ॥५॥
युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान्।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥६॥

सारा० व०—

अत्र चम्वाम्, महान्तः शत्रुभिश्छेत्तुमशक्या इष्वासा धनूंषि येषां ते; युयुधानः सात्यकिः, सौभद्रोऽभिमन्युः, द्रौपदेया युधिष्ठिरादिभ्यः पञ्चभ्यो जाताः प्रतिबिन्ध्यादयः। महारथादीनां लक्षणम्—"एको दशसहस्राणि योधयेद् यस्तु धन्विनाम्। शस्त्रशास्त्र-प्रवीणश्च महारथ इति स्मृतः॥ अमितान् योधयेद् यस्तु स एवातिरथः स्मृतः। रथी चैकेन यो योद्धा तन्न्यूनोऽर्धरथः स्मृतः॥" इति ॥४-६॥

गी०भू० —

नन्वेकेन धृष्टद्युम्नेनाधिष्ठितात्पिका सेनास्मदीयेनैकेनैव सुजेया स्यादतस्त्वं मा त्रासीरिति चेत् तत्राह,—अत्रेति। अत्र चम्वां महान्तः शत्रुभिश्छेत्तुमशक्या इष्वासाश्चापा येषां ते। युद्धकौशलमाशङ्क्याह,— भीमेति। युयुधानः सात्यकिः महारथ इति युयुधानादीनां त्रयाणां विशेषणम्। धृष्टेति—वीर्य्यबानिति धृष्टकेत्वादीनां त्रयाणाम्, नरपुङ्गव इति पुरुजिदादीनां त्रयाणाम्। युध्येति विक्रान्त इति युधामन्योः, वीर्य्यवानित्युत्तमौजसश्चेति विशेषणम्, सौभद्रोऽभिमन्युः द्रौपदेया युधिष्ठिरादिभ्यः पञ्चभ्यः क्रमात् द्रौपद्यां जाताः प्रतिविन्ध्यश्रुतसेनश्रुतकीर्त्तिशतानीकश्रुतकर्म्माख्याः पञ्चपुत्राः, च-शब्दादन्ये च घटोत्कचादयः। पाण्डबात्वतिख्यातत्वात् न गणिताः। ये एते सप्तदश गणिता, ये चान्ये तत्पक्षीयास्ते सर्व्वे महारथा एव। अतिरथस्याप्युपलक्षणमेतत्, तल्लक्षणञ्चोक्तम्,—एकादशसहस्राणि योधयेद्यस्तु धन्विनाम्। शस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः॥ अमितान् योधयेद्यस्तु संप्रोक्तोऽतिरथस्तु सः। रथी चैकेन यो योद्धा तन्न्यूनोऽर्द्धरथः स्मृत॥" इति ॥४-६॥

अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ।
नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते ॥७॥
भवान्भीष्मश्च कर्णश्च कृपश्च समितिञ्जयः ।
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥८॥
अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ।
नानाशस्त्रप्रहरणाः सर्व्वे युद्धविशारदाः ॥९॥

सारा०व० —

निबोध बुध्यस्व; संज्ञार्थं सम्यग् ज्ञानार्थम् ॥७॥

सोमदत्तिर्भूरिश्रवाः । त्यक्तजीविता इति जीवितत्यागेनापि यदि मदुपकारः स्यात्तदा तमपि कर्तुं प्रवृत्ता इत्यर्थः । वस्तुतस्तु "मयैवैते निहताः पूर्वमेव, निमित्तमात्रं भव सव्यसाचिन्" इति भगवदुक्तेर्दुर्योधनसरस्वती सत्यमेवाह स्म ॥८-९॥

गी०भू० —

तर्हि किं पाण्डवसैन्याद्भीतोऽसीत्याचार्य्यभावं सम्भाव्यान्तर्जातामपि भीतिमाच्छादयन् धार्ष्ट्येनाह,—अस्माकमिति—अस्माकं सर्व्वेषां मध्ये ये विशिष्टाः परमोत्कृष्टा बुद्ध्यादिबलशालिनो नायका नेतारः, तान् संज्ञार्थं सम्यक् ज्ञानार्थं ब्रवीमीति । पाण्डवप्रेम्णा त्वं चेन्नो योत्स्यसे, तदापि भीष्मादिभिर्मद्विजयः सेत्स्यत्येवेति तत्कोपोत्पादनं द्योत्यम् ॥७॥

तानाह,—भवानिति । भवान् द्रोणः, विकर्णो मद्भ्राता कनिष्ठः, सोमदत्तिर्भूरिश्रवाः, समितिञ्जयः संग्रामविजयीति द्रोणादीनां सप्तानां विशेषणम् । नन्वेतावन्त एव मत्सैन्ये विशिष्टाः, किन्त्वसंख्येयाः सन्तीत्याह,—अन्ये चेति । बहवो जयद्रथ–कृतवर्म्म-शल्यप्रभृतयः । त्यक्तेत्यादि कर्म्मणि निष्ठा,–जीवि-

तानि त्यक्तुं कृतनिश्चया इत्यर्थः । इत्थञ्च तेषां सर्व्वेषां मयि स्नेहातिरेकात् शौर्य्यातिरेकाद्युद्धपाण्डित्याच्च मद्विजयः सिद्ध्येदेवेति द्योत्यते ॥८-९॥

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥१०॥
अयनेषु च सर्वेषु यथाभागमवस्थिताः ।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ॥११॥

सारा० व०—

अपर्याप्तमपरिपूर्णम्—पाण्डवैः सह योद्धुमक्षममित्यर्थः ;—भीष्मेणाति—सूक्ष्मबुद्धिना शस्त्रशास्त्रप्रवीणेनाभितो रक्षितमपि, भीष्मस्योभयपक्षपातित्वात् । एतेषां पाण्डवानां तु भीमेन स्थूलबुद्धिना शस्त्रशास्त्रानभिज्ञेनापि रक्षितं पर्याप्तं परिपूर्णम्—अस्माभिः सह युद्धे प्रवीणमित्यर्थः ॥ १० ॥

तस्माद् युष्माभिः सावधानैर्भवितव्यमित्याह,—अयनेषु व्यूहप्रवेशमार्गेषु यथाभागं विभक्ताः स्वां स्वां रणभूमिमपरित्यज्यैवावस्थिता भवन्तो भीष्ममेवाभितस्तथा रक्षन्तु, यथाऽन्यैर्युध्यमानोऽयं पृष्ठतः कैश्चिन्न हन्यते, भीष्मबलेनैवास्माकं जीवितमिति भावः ॥ ११ ॥

गी०भू० —

नन्वेवमुभयोः सैन्ययोस्तौल्यात् तवैव विजयः कथमित्याशङ्क्य स्वसैन्यस्याधिक्यमाह,—अपर्य्याप्तमिति । अपर्य्याप्तमपरिमितमस्माकं बलम् , तत्रापि भीष्मेण महाबुद्धिमतातिरथेनाभिरक्षितम् । एतेषां पाण्डवानां बलं तु पर्य्याप्तं परिमितम् , तत्रापि भीमेन तुच्छबुद्धिनार्द्धरथेनाभिरक्षितमतः सिद्धविजयोऽहम् ॥१०॥

अथैवं मदुक्तिभावं बिज्ञायाचार्य्यश्चेदुदासीत तदा मत्कार्य्य-क्षतिरिति बिभाव्य तस्मिन् स्वकार्य्यभारमर्पयन्नाह,—अयनेष्विति। अयनेषु सैन्यप्रवेशबर्त्मसु यथाभागं बिभक्तां स्वां स्वां युद्धभूमिमपरित्यज्यावस्थिता भबन्तो भबदादयो भीष्ममेबाभितो रक्षन्तु युद्धाभिनिवेशात् पार्श्वतः पृष्ठतश्चापश्यन्तं तं यथान्यो न बिहन्यात्तथा कुर्व्वन्त्वित्यर्थः। सेनापतौ भीष्मे निर्व्बाधे मद्-बिजयसिद्धिरिति भावः। अयमाशयः,—भीष्मोऽस्माकं पितामहः, भबांस्तु गुरुः, तौ युबामस्मदेकान्तहितैषिणौ बिदितौ। याबक्षसदसि मदन्यायं बिदन्ताबपि द्रौपद्या न्यायं पृष्टौ नाबोचतां, मया तु पाण्डबेषु प्रतीतं स्नेहाभासं त्याजयितुं तथा निवेदितमिति ॥११॥

तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः।
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ॥१२॥
ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥१३

सारा०व० —

ततश्च स्वसन्मानश्रवणजनितहर्षस्तस्य दुर्योधनस्य भय-विध्वंसनेन हर्षं संजनयितुं कुरुवृद्धो भीष्मः, सिंहनादमिति उपमाने कर्म्मणि चेति णमुल्—सिंह इव बिनद्येत्यर्थः ॥१२॥

ततश्चोभयत्रैव युद्धोत्साहः प्रबृत्त इत्याह—तत इति। पणबा मार्द्दलाः, आनकाः पटहाः, गोमुखा वाद्यविशेषाः ॥१३॥

गी०भू—

एवं दुर्योधनकृतां स्वस्तुतिमबधार्य्य सहर्षो भीष्मस्तदन्तर्जातां भीतिमुत्सादयितुं शङ्खं दध्माबित्याह,—तस्येति। सिंहनाद-

मित्युपमाने 'कर्म्मणि' च इति पाणिनिसूत्राण्णमुल्, चात् कर्त्र्युपमाने इत्यर्थः, सिंह इव बिनद्येत्यर्थः। मुखतः किञ्चिद्-नुक्त्वा शङ्खनादमात्रकरणेन जयपराजयौ खल्वीश्वराधीनौ, त्वदर्थे क्षत्रधर्म्मेण देहं त्यक्ष्यामीति व्यज्यते ॥१२॥

तत इति – सेनापतौ भीष्मे प्रवृत्ते तत्सैन्ये सहसा तत्क्षण-मेव शङ्खादयोऽभ्यहन्यन्त बादिताः-कर्म्मकर्त्तरि प्रयोगः। पणबादयस्त्रयो बादित्र-भेदाः। स शब्दस्तुमुल एकाकारतया महानासीत् ॥१३॥

ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ।
माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥१४॥
पाञ्चजन्यं हृषीकेशो देवदत्तं धनंजयः।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ॥१५॥
अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥१६॥
काश्यश्च परमेष्वासः शिखण्डी च महारथः।
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥१७॥
द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते।
सौभद्रश्च महाबाहुः शङ्खान्दध्मुः पृथक्पृथक् ॥१८॥

सारा०व० —

पाञ्चजन्यादयः शङ्खादीनां नामानि। अपराजितः-केनापि पराजेतुमशक्यत्वात्; अथवा चापेन धनुषा राजितः प्रदीप्तः ॥१५-१८

गी०भू० —

अथ पाण्डबसैन्ये प्रवृत्तं युद्धोत्सबमाह-तत इति। अन्येषा-

मपि रथस्थितत्वे सत्यपि कृष्णार्जुनयो रथस्थितत्वोक्तिस्तद्रथस्याग्निदत्तत्वं त्रैलोक्यविजेतृत्वं महाप्रभत्वञ्च व्यज्यते ॥१४॥

पाञ्चजन्यमित्यादि – पाञ्चजन्यादयः कृष्णादिशङ्खानामाह्वयाः। अत्र 'हृषीकेश'शब्देन परमेश्वरसहायित्वम्। पाञ्चजन्यादिशब्दैः प्रसिद्धाह्वयानेकदिव्यशङ्खवत्त्वम्। राजा भीमकर्म्मा धनञ्जय इत्येभिर्युधिष्ठिरादीनां राजसूययाजित्वहिडिम्बादिनिहन्तृत्वदिग्विजयाहृतानन्तधनत्वानि च व्यज्य पाण्डवसेनासूत्कर्षः सूच्यते। परसेनासु तदभावादपकर्षश्च। काश्य इति—काश्यः काशिराजः; परमेष्वासः महाधनुर्द्धरः, चापराजितो धनुषा दीप्तः। द्रुपद इति—पृथिवीपते हे धृतराष्ट्रेति तव दुर्मन्त्रणोदयः कुलक्षयलक्षणोऽनर्थः समागत इति सूच्यते ॥१५-१८॥

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत्।
नभश्च पृथिवीं चैव तुमुलोऽभ्यनुनादयन् ॥१९॥
अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान् कपिध्वजः।
प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पाण्डवः ॥२०॥
हृषीकेशं तदा वाक्यमिदमाह महीपते।
सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ॥२१॥
यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान्।
कैर्म्मया सह योद्धव्यमस्मिन्रणसमुद्यमे ॥२२॥
योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः।
धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥२३॥

गी०भू० —

स इति – पाण्डवैः कृतः शङ्खनादो धार्त्तराष्ट्राणां भीष्मा-

दीनां सर्व्वेषां हृदयानि व्यदारयत् तद्विदारणतुल्यां पीडामजनयदित्यर्थः। तुमुलोऽतितीव्रः, अभ्यनुनादयन् प्रतिध्वनिभिः पूरयन्नित्यर्थः। धार्त्तराष्ट्रैः कृतस्तु शङ्खादिनादस्तुमुलोऽपि तेषां किञ्चिदपि क्षोभं नाजनयत् तथानुक्तेरिति बोध्यम् ॥१९॥

एवं धार्त्तराष्ट्राणां युद्धे भीतिं प्रदर्श्य पाण्डवानां तु तत्रोत्साहमाह—अथेति सार्द्धकेन। अथ रिपुशङ्खनादकृतोत्साहभङ्गानन्तरं व्यवस्थितान् तद्भङ्गविरोधियुयुत्सयावस्थितान् धार्त्तराष्ट्रान् भीष्मादीन् कपिध्वजोऽर्जुनो येन श्रीदाशरथेरपि महान्ति कार्य्याणि पुरा साधितानि तेन महावीरेण ध्वजमधितिष्ठता हनुमतानुगृहीतो भयगन्धशून्य इत्यर्थः। हे महीपते! प्रवृत्ते प्रवर्त्तमाने। हृषीकेशमिति—हृषीकेशं सर्व्वेन्द्रियप्रवर्त्तकं कृष्णं तदिदं वाक्यमुवाचेति। सर्व्वेश्वरो हरिर्येषां नियोज्यस्तेषां तदेकान्तभक्तानां पाण्डवानां विजये सन्देहगन्धोऽपि नेति भावः ॥२०॥

अर्जुनवाक्यमाह—सेनयोरिति। हे अच्युतेति स्वभावसिद्धाद्भक्तवात्सल्यात् पारमैश्वर्य्याच्च न च्यवसे स्मेति तेन तेन च नियन्त्रितो भक्तस्य मे वाक्यात्तत्र रथं स्थितं कुरु निर्भय तत्र रथस्थापने फलमाह—यावदिति। योद्धुकामान्न तु सहास्माभिः सन्धिं चिकीर्षून्, अवस्थितान् न तु भीत्या प्रचलितान्। ननु त्वं योद्धा, न तु युद्धप्रेक्षकस्ततस्तद्दर्शनेन किमिति चेत्तत्राह—कैरिति। अस्मिन् बन्धूनामेव मिथो रणोद्योगे कैर्बन्धुभिः सह मम युद्धं भावीत्येतज्ज्ञानायैव मध्ये रथस्थापनमिति। ननु बन्धुत्वादेते सन्धिमेव विधास्यन्तीति चेत् तत्राह— योत्स्यमानानिति न तु सन्धिं विधास्यतः। अवेक्षे प्रत्येमि। दुर्बुद्धेः कुधियः स्वजीवनोपायानभिज्ञस्य युद्धे, न तु दुर्बुद्धयपनयने। अतो मद्युद्धप्रतियोगिनिरीक्षणं युक्तमिति ॥२१-२३॥

सञ्जय उवाच—

एवमुक्तो हृषीकेशो गुडाकेशेन भारत ।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥२४॥
भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् ।
उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति ॥२५॥

सारा० व०—

हृषीकेशः सर्वेन्द्रिय-नियन्ताप्येवमुक्तोऽर्जुनेनादिष्टः अर्जुनवागिन्द्रियमात्रेणापि नियम्योऽभूदित्यहो प्रेमवश्यत्वं भगवत इति भावः । गुडाकेशेन—गुडा यथा माधुर्यमात्रप्रकाशकास्तत्तथा स्वीयस्नेहरसास्वादप्रकाशका अकेशा विष्णु-ब्रह्मशिवा यस्य तेन-अकारो विष्णुः, को ब्रह्मा, ईशो महादेवः । यत्र सर्वावतारिचूडामणीन्द्रः स्वयं भगवान् श्रीकृष्ण एव प्रेमाधीनः सन् आज्ञानुवर्ती बभूव तत्र गुणावतारत्वात्तदंशा विष्णु-ब्रह्मरुद्राः कथमैश्वर्यं प्रकाशयन्तु ? किन्तु स्वकर्तृकं स्नेहरसं प्रकाश्यैव स्वं स्वं कृतार्थं मन्यन्त इत्यर्थः । यदुक्तं श्रीभगवता परमव्योमनाथेनापि,—"द्विजात्मजा मे युवयोर्दिदृक्षुणा" इति; यद्वा, गुडाका निद्रा, तस्या ईशेन जितनिद्रेणेत्यर्थः; अत्रापि व्याख्यायाम्—साक्षान्मायाया अपि नियन्ता यः श्रीकृष्णः, स चापि येन प्रेम्णा विजित्य वशीकृतस्तेनार्जुनेन मायावृत्ति—निद्रा वराकी जितेति किं चित्रमिति भावः । भीष्मद्रोणयोः प्रमुखतः प्रमुखे सम्मुखे सर्वेषां महीक्षितां राज्ञां च । प्रमुखत इति—समासप्रविष्टेऽपि 'प्रमुखतः' शब्द आकृष्यते ॥ २४-२५ ॥

गी० भू०—

ततः किं वृत्तमित्यपेक्षायां सञ्जयः प्राह—एवमिति । गुडाका निद्रा तस्या ईशः स्वसखश्रीभगवद्गुणलावण्यस्मृतिनिवेशेन

विजितनिद्रस्तत्परमभक्तस्तेनार्जुनेनैवमुक्तः प्रवर्त्तितो हृषीकेशस्तच्चित्तवृत्त्यभिज्ञो भगवान् सेनयोर्मध्ये भीष्मद्रोणयोः सर्व्वेषाञ्च महीक्षितां भूभुजाञ्च प्रमुखतः सम्मुखे रथोत्तमं अग्निदत्तं रथं स्थापयित्वोवाच—हे पार्थ ! समवेतानेतान् कुरून् पश्येति । पार्थ-हृषीकेश-शब्दाभ्यामिदं सूच्यते—मत्पितृष्वसृपुत्रत्वात् त्वत्सारथ्यमहं करिष्याम्येव त्वं त्वधुनैव युयुत्सां त्यक्ष्यसीति किं शत्रु-सैन्यवीक्षणेनेति सोपहासो भावः ॥२४-२५॥

तत्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान् ।
आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान् सखींस्तथा
श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि ॥२६॥
तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान् ।
कृपया परयाविष्टो विषीदन्निदमब्रवीत् ॥२७॥

सारा०व०—दुर्योधनादीनां ये पुत्राः पौत्राश्च तान् ॥ २६ ॥

गी०भू०—एवं भगवतोक्तोऽर्ज्जुनः परसेनामपश्यदित्याह-तत्रेति सार्द्धकेन । तत्र परसेनायां पितॄन् पितृव्यान् भूरिश्रवः प्रभृतीन्, पितामहान् भीष्मसोमदत्तादीन्, आचार्य्यान् द्रोण-कृपादीन्, मातुलान् शल्य-शकुन्यादीन्, भ्रातॄन् दुर्य्योधनादीन्, पुत्रान् लक्ष्मणादीन्, पौत्रान् नप्तॄन् लक्ष्मणादि-पुत्रान्, सखीन् वयस्यान् द्रौणि-सैन्धवादीन्, सुहृदः कृतवर्म्म-भगदत्तादीन्, एवं स्वसैन्येऽप्युपलक्षणीयम् । उभयोरपि सेनयोरवस्थितान् तान् सर्व्वान् समीक्ष्येत्यन्वयात् ॥२६॥

अथ सर्व्वेश्वरो दयालुः कृष्णः सपरिकरात्मोपदेशेन विश्वमुद्दिधीर्षुरर्ज्जुनं शिष्यं कर्त्तुं तत्स्वधर्म्मेऽपि युद्धे "मा हिंस्यात् सर्व्वा भूतानि" इति श्रुत्यर्थाभासेनाधर्म्मतामाभास्य तं समोहं

कृतवानित्याह—तान् समीक्ष्येति कौन्तेय इति स्वीयपितृष्वसृपुत्रत्वोक्त्या तद्धर्म्मौ मोहशोकौ तदा तस्य व्यज्येते। कृपया कर्य्या इत्युक्तेः, स्वभावसिद्धस्य कृपेति द्योत्यते। अतः परयेति तद्विशेषणम्, अपरयेति वा च्छेदः—स्वसैन्ये पूर्व्वमपि कृपास्ति, परसैन्ये त्वपरापि साभूदित्यर्थः। विषीदन्ननुतापः विन्दन्। अत्रोक्तिविषादयोरैककाल्याद्युक्तिकाले विषादकार्य्याण्यश्रुकम्पसन्नकण्ठतादीनि व्यज्यन्ते ॥२७॥

अर्जुन उवाच

दृष्ट्वेमं स्वजनं कृष्ण युयुत्सून् समुपस्थितान् ।
सीदन्ति मम गात्राणि मुखं च परिशुष्यति ॥२८॥
वेपथुश्च शरीरे मे रोमहर्षश्च जायते ।
गाण्डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते ॥२९॥
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ।
निमित्तानि च पश्यामि विपरीतानि केशव ॥३०॥

सारा०व०—दृष्ट्वेत्यत्र स्थितस्येत्यध्याहार्यम् ॥ २८ ॥

विपरीतानि निमित्तानि, धर्न्निमित्तकोऽयमत्र मे वास इतिवन्निमित्तशब्दोऽयं प्रयोजनवाची। ततश्च युद्धे विजयिनो मम राज्यलाभात् सुखं न भविष्यति, किन्तु तद्विपरीतमनुतापदुःखमेव भावीत्यर्थः॥ ३० ॥

गी०भू०—कौन्तेयः शोकव्याकुलं यदाह तदनुवदति-दृष्ट्वेममिति। स्वजनं स्वबन्धुवर्गं जातावेकवचनं—"सगोत्रबान्धवज्ञातिबन्धु-स्व-स्वजनाः समाः" इत्यमरः। दृष्ट्वावस्थितस्य मम गात्राणि करचरणादीनि सीदन्ति शीर्य्यन्ते, परिशुष्यतीति श्रमादिहेतुकाच्छोषादतिशयित्वमस्य शोषस्य व्यज्यते ॥२८॥

वेपथुः कम्पः, रोमहर्षः पुलकः, गाण्डीवभ्रंशेनाधैर्य्यं त्वग्दा-

हेन हृद्विदाहो दर्शितः ॥२९॥

न चेति – अवस्थातुं स्थिरो भवितुम्। मनो भ्रमतीव चेति दौर्व्वल्यमूर्च्छयोरुदयः। निमित्तानि फलान्यत्र युद्धे विपरीतानि पश्यामि। विजयिनो मे राज्यप्राप्तिरानन्दो न भविष्यति, किन्तु तद्विपरीतोऽनुताप एव भावीति। निमित्तशब्दः फलवाची, 'कस्मै निमित्तायात्र वससि' इत्यादौ तथा प्रतीतेः ॥३०॥

न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ।
न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च ॥३१॥

सारा०व०—श्रेयो न पश्यामीति "द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ। परिव्राड्योगयुक्तश्च रणे चाभिमुखे हतः ॥" इत्यादिना हतस्यैव श्रेयोविधानात्, हन्तुस्तु न किमपि सुकृतम्। ननु दृष्टं फलं यशोराज्यं वर्तते युद्धस्येत्यत आह,—न काङ्क्षे इति ॥ ३१ ॥

गी०भू०—एवं तत्त्वज्ञानप्रतिकूलं शोकमुक्त्वा तत्प्रतिकूलां विपरीतबुद्धिमाह-न चेति। आहवे स्वजनं हत्वा श्रेयो नैव पश्यामीति,-"द्वाविमौ पुरुषौ लोके सूर्य्यमण्डलभेदिनौ। परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः" इत्यादिना हतस्य श्रेयःस्मरणात् हन्तुर्मे न किञ्चिच्छ्रेयः, अस्वजनमिति वा च्छेदः—अस्वजनवधेऽपि श्रेयसोऽभावात् स्वजनवधे पुनः कुतस्तरां तदित्यर्थः। ननु यशोराज्यलाभो दृष्टं फलमस्तीति चेत्तत्राह— न काङ्क्षे इति। राज्यादिस्पृहाविरहादुपाये विजये मम प्रवृत्तिर्न युक्ता, रन्धने यथा भोजनेच्छाविरहिणः, तस्मादरण्यनिवसनमेवास्माकं श्लाघ्यजीवनत्वं भावीति ॥३१॥

किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा ।
येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च ॥३२॥

त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ।
आचार्याः पितरः पुत्रास्तथैव च पितामहाः ॥३३॥
मातुलाः श्वशुराः पौत्राः श्यालाः सम्बन्धिनस्तथा ।
एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन ॥३४॥
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ।
निहत्य धार्त्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ॥३५॥

गी०भू०—गोविन्देति । गाः सर्व्वेन्द्रियवृत्तीः बिन्दसीति त्वमेव मे मनोगतं प्रतीहीत्यर्थः । राज्याद्यनाकाङ्क्षायां हेतुमाह-येषामिति । प्राणान् प्राणाशां धनानि धनाशामिति लक्षणया बोध्यम्,-स्वप्राणव्ययेऽपि स्वबन्धुसुखार्थी राज्यस्पृहा स्यात्तेषामप्यत्र नाशप्राप्तेरपार्थैव युद्धे प्रवृत्तिरिति भावः । ननु त्वं चेत् कारुणिकस्तान्न हन्यास्तर्हि ते स्वराज्यं निष्कण्टकं कर्त्तुं त्वामेव हन्युरिति चेत्तत्राह---एतानिति । मां घ्नतोऽपि हिंसतोऽप्येतान् हन्तुमहं नेच्छामि । त्रैलोक्यराजस्य प्राप्तयेऽपि किं पुनर्भूमात्रस्य । नन्वन्यान् हित्वा धृतराष्ट्रपुत्रा एव हन्तव्या, बहुदुःखदातॄणां तेषां घाते सुखसम्भवादिति चेत्तत्राह---निहत्येति । धार्त्तराष्ट्रान् दुर्य्योधनादीन्निहत्य स्थितानां नः पाण्डवानां का प्रीतिः प्रसन्नता स्यान्न कापीति--अचिरसुखाभासस्पृहया चिरतरनरकहेतुभ्रातृबधो न योग्य इति भावः । हे जनार्द्दनेति--यद्य ते हन्तव्यास्तर्हि भूभारापहारी त्वमेव तान् जहि परेशस्य ते पापगन्धसम्बन्धो न भवेदिति व्यज्यते ॥३२-३५॥

पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ।
तस्मान्नार्हा वयं हन्तुं धार्त्तराष्ट्रान्स्वबान्धवान् ।
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥३६॥

सारा०व०-ननु"अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारापहारी च षडेते आततायिनः ॥"इति, "आततायिनमायान्तं हन्यादेवाविचारयन् । नाततायिबधे दोषो हन्तुर्भवति भारत ॥" इत्यादि वचनादेषां बध उचित एवेति ? तत्राह,—पापमिति । एतान् हत्वा स्थितानस्मान् । 'आततायिनमायन्तम' इत्यादिकमर्थशास्त्रं धर्मशास्त्राद्दुर्बलम्; यदुक्तं याज्ञवल्क्येन,-"अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्मृतम" इति तस्मादाचार्यादीनां बधे पापं स्यादेव । न चैहिकं सुखमपि स्यादित्याह,-स्वजनमिति ॥ ३६ ॥

गी०भू०—ननु"अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारापहारी च षडेते आततायिनः ॥ आततायिनमायान्तं हन्यादेवाविचारयन् । नाततायिबधे दोषो हन्तुर्भवति भारत ॥"—इत्युक्तेरेषां षाड्विध्येनाततायिनां युक्तो बध इति चेत्तत्राह--पापमिति । एतान् हत्वा स्थितानस्मान् पापमेव बन्धुक्षयहेतुकमाश्रयेत् । अयं भावः---आततायिनमायान्तमित्यादिकमर्थशास्त्रं "मा हिंस्यात् सर्वा भूतानि" इति धर्म्मशास्त्राद्दुर्व्बलम्--"अर्थशास्त्रात्तु बलवद्धर्म्मशास्त्रमिति स्थितिः" इति स्मृतेः,तस्माद्दुर्व्बलार्थशास्त्रबलेन पूज्यानां द्रोणभीष्मादीनां बधः पापहेतुरेवेति । न च श्रेयोऽनुपश्यामीत्यारभ्योक्तमुपसंहरति--तस्मादिति । पापसम्भवात् । दैहिकसुखस्याप्यभावाच्चेत्यर्थः । न हि गुरुभिर्बन्धुजनैश्च बिनास्माकं राज्यभोगः सुखायापि तु अनुतापायैव सम्पत्स्यते । हे माधवेति-श्रीपतिस्त्वमश्रीके युद्धे कथं प्रवर्त्तयसीति भावः ॥३६॥

यद्यप्येते न पश्यन्ति लोभोपहतचेतसः ।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥३७॥

कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् ।
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥३८॥

सारा०व०— नन्वेते तर्हि कथं युद्धे वर्तन्ते? तत्राह,— यद्यपीति ॥३७-३८॥

गी०भू०--ननु "आहूतो न निवर्त्तेत द्यूतादपि रणादपि विदितं क्षत्रियस्य" इति क्षत्रधर्म्मस्मरणात् तैराहूतानां भवतां युद्धे प्रवृत्ति-र्युक्तेति चेत्तत्राह--यद्यपीहि द्वाभ्याम् । पापे प्रवृत्तौ लोभस्तेषां हेतुरस्माकं तु लोभविरहान्न तत्र प्रवृत्तिरिति । इष्टसाधनता-ज्ञानं खलु प्रवर्त्तकम्, इष्टञ्चानिष्टाननुबन्धिबाच्यम्, यदुक्तं--"फल-तोऽपि च यत् कर्म्म नानर्थेनानुबध्यते । केवलप्रीतिहेतुत्वात्तद्धर्म्म इति कथ्यते ॥" इति । तथा च "श्येनेनाभिचरन् यजेत" इत्यादि शास्त्रोक्तेऽपि श्येनादाविवानिष्टानुबन्धित्वाद्युद्धे-ऽस्मिन्नः प्रवृत्तिर्न युक्तेति । "आहूतः" इत्यादि शास्त्रं तु कुल-क्षयदोषविना भूतविषयं भावि । हे जनार्दनेति प्रागवत् ॥३७-६८॥

कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः ।
धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत ॥३९॥

सारा०व०—कुलक्षय इति, सनातनाः कुलपरम्पराप्राप्तत्वेन वहुकालतः प्राप्ता इत्यर्थः ॥ ३९ ॥

गी०भू०--दोषमेव प्रपञ्चयति--कुलक्षये इति । कुलधर्म्मा कुलोचिता अग्निहोत्रादयो धर्म्माः सनातनाः कुलपरम्पराप्राप्ताः प्रणश्यन्ति कर्त्तृविनाशात् । उतेत्यप्यर्थे कृत्स्नमित्यनेन सम्बध्यते,- धर्म्मे नष्टे सत्यवशिष्टं बालादिकृत्स्नमपि कुलमधर्म्मोऽभिभवति प्रसतीत्यर्थः ॥६९॥

अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ॥ ४०॥

सारा०व—प्रदुष्यन्तीति, अधर्म एव ता व्यभिचारे प्रवर्तय-तीति भावः ॥ ४० ॥

गी०भू०--तत्रश्चाधर्म्माभिभवादिति । अस्मद्भर्त्तृभिर्धर्म्म-मुल्लङ्घ्य यथा कुलक्षयलक्षणे पापे वर्त्तितं, तथास्माभिः पाति-व्रत्यमवज्ञाय दुराचारे वर्त्तितव्यमिति दुर्व्वुद्धिहताः कुलस्त्रियः प्रदुष्येयुरित्यर्थः ॥४०॥

संकरो नरकायैव कुलघ्नानां कुलस्य च ।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥ ४१ ॥
दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः ।
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥ ४२ ॥
उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ।
नरके नियतं वासो भवतीत्यनुशुश्रुम ॥४३॥

सारा०व०—दोषैरिति, उत्साद्यन्ते लुप्यन्ते ॥ ४२ ॥

गी०भू०—कुलस्य सङ्करः कुलघ्नानां नरकायैवेति योजना । न केवलं कुलघ्ना एव नरके पतन्ति, किन्तु तत्पितरोऽपीत्याह,- पतन्तीति हिर्हेतौ । पिण्डादि दातॄणां पुत्रादीनामभावाद्विलुप्त-पिण्डादि-क्रियाः सन्तस्ते नरकायैव पतन्ति ॥४१॥

गी०भू०—उक्तदोषमुपसंहरति, — दोषैरिति द्वाभ्याम । उत्साद्यन्ते विलुप्यन्ते जातिधर्म्माः क्षत्रियत्वादिनिर्व्वन्धनाः, कुल-धर्म्मास्त्वसाधारणाः, च-शब्दादाश्रमधर्म्मा ग्राह्याः ॥४२॥

गी०भू०--उत्सन्नेति । जातिधर्म्मादीनां उपलक्षणमेतत् । अनुशुश्रुम श्रुतवन्तो वयं गुरुमुखात् । "प्रायश्चित्तमकुर्व्वाणाः पापेषु निरता नराः । अपश्चात्तापिनः कष्टान्निरयान् यान्ति दारुणान्" इत्यादि वाक्यैः ॥४३॥

अहो बत महत्पापं कर्तुं व्यवसिता वयम् ।
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥४४॥
यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः ।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ॥४५॥
एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशरं चापं शोकसंविग्नमानसः ॥४६॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां भीष्म-पर्व्वणि श्रीश्रीमद्भगवद्गीतासुपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे सैन्यदर्शनं नाम प्रथमोऽध्यायः ।

सारा०व०—संख्ये संग्रामे; रथोपस्थे रथोपरि ॥ ४६ ॥

इति सारार्थवर्षिण्यां हर्षिण्यां भक्तचेतसाम् ।
गीतासु प्रथमोऽध्यायः संगतः संगतः सताम् ॥ ३ ॥

गी०भू०--बन्धुवधव्यवसायेनापि पापं सम्भाव्यानुतपन्नाह-अहो इति । वर्तेति सन्देहे ॥४४॥

गी०भू०--ननु त्वयि बन्धुवधाद्विनिवृत्तेऽपि भीष्मादिभिर्युद्धोत्सुकैस्त्वद्वधः स्यादेव ततः किम्विधेयमिति चेत्तत्राह—यदि मामिति । अप्रतीकारमकृतमद्वधाध्यवसायपापप्रायश्चित्ताम् । क्षेमतरमतिहितं-प्राणान्तप्रायश्चित्तेनैवैतत् पापावमार्ज्जनम् , भीष्मादयस्तु न तत्पापफलं प्राप्स्यन्त्येवेति भावः ॥४५॥

गी०भू०—ततः किमभूदित्यपेक्षायां सञ्जय उवाच--एवमुक्त्वेति । संख्ये युद्धे रथोपस्थे रथोपरि उपाविशत् उपविवेश । पूर्व्वं युद्धाय प्रतियोद्धृविलोकनाय चोत्थितः सन् ॥४६॥

अहिंस्रस्यात्मजिज्ञासा दयार्द्रस्योपजायते ।
तद्विरुद्धस्य नैवेति प्रथमादुपधारितम् ॥

इति श्रीभगवद्गीतोपनिषद्भाष्ये प्रथमोऽध्यायः ।

द्वितियोऽध्यायः

संजय उवाच—

तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम् ।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः॥१॥

श्रीभगवानुवाच--

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥२॥

सारा०व०—आत्मानात्म-विवेकेन शोकमोहतमो नुदन् ।
द्वितीये कृष्णचन्द्रोऽत्र प्रोचे मुक्तस्य लक्षणम् ॥ १ ॥

कश्मलं मोहः, विषमेऽत्र संग्रामसंकटे; कुतो हेतोः, उपस्थितं त्वां प्राप्तमभूत् ? अनार्यजुष्टम्—सुप्रतिष्ठितलोकैरसेवितम, अस्वर्ग्यमकीर्तिकरमिति—पारत्रिकैहिकसुखप्रतिकूलमित्यर्थः ॥२॥

गी०भू०—द्वितीये जीवयाथात्म्यज्ञानं तत्साधनं हरिः ।
निष्कामकर्म्म च प्रोचे स्थितप्रज्ञस्य लक्षणम् ॥

गी०भू०-- एवमर्ज्जुनवैराग्यमुपश्रुत्य स्वपुत्रराज्याभ्रंशाशया हृष्यन्तं धृतराष्ट्रमालक्ष्य सञ्जय उवाच--तं तथेति । मधुसूदन इति तस्य शोकमपि मधुवन्निहनिष्यतीति भावः ॥१॥

गी०भू०-- तद्वाक्यमनुवदति-श्रीभगवानिति । "ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चापि षण्णां भग इतीङ्गना।" इति पराशरोक्तैरैश्वर्य्यादिभिः षड्भिर्नित्यं विशिष्टः, समग्रस्येत्येतत् षट्सु योज्यम् । हे अर्ज्जुन, इदं स्वधर्म्मवैमुख्यं कश्मलं शिष्टनिन्द्यत्वान्मलिनं कुतो हेतोस्त्वां क्षत्रियचूडामणिं समुपस्थितमभूत् ? विषमे युद्धसमये । न च मोक्षाय स्वर्गाय कीर्त्तये वैतद्युद्धवैराग्यमित्याह—अनार्य्येति, आर्य्यैर्मुमुक्षुभिर्न जुष्ट

सेवितं--आर्य्याः खलु हृद्विशुद्धये स्वधर्म्मानाचरन्ति । अस्वर्ग्यं स्वर्गोपलम्भकधर्म्मविरुद्धम् , अकीर्त्तिकरं कीर्त्तिविनाशकम् ॥२॥

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ॥३॥

सारा०व०-क्लैब्यं क्लीवधर्मं कातर्य्यम्, हे पार्थेति त्वं पृथापुत्रः सन्नपि गच्छसि, तस्मान्मास्म गमः, मा प्राप्नुहि, अन्यस्मिन् क्षत्रबन्धौ वरमिदमुपपद्यताम्, त्वयि मत्सखौ तु नोपयुज्यते । नन्विदं शौर्याभावलक्षणं क्लैब्यं मा शङ्किष्ठाः, किन्तु भीष्मद्रोणादिगुरुषु धर्मदृष्ट्या विवेकोऽयं धार्तराष्ट्रेषु तु दुर्बलेषु मदस्त्राघातमासाद्य मर्तुमुद्यतेषु दयैवेयमिति तत्राह-क्षुद्रमिति । नैते तव विवेकदये, किन्तु शोकमोहावेव, तौ च मनसो दौर्बल्यव्यञ्जकौ । तस्मात् हृदयदौर्बल्यमिदं त्यक्त्वा उत्तिष्ठ हे परन्तप ? परान् शत्रून् तापयन् युध्यस्व ॥ ३ ॥

गी०भू०--ननु बन्धुक्षयाध्यवसायदोषात् प्रकम्पितेन मया किं भाव्यमिति चेत्तत्राह--क्लैब्यमिति । हे पार्थः ! देवराजप्रसादात् पृथायामुत्पन्न ! क्लैब्यं कातर्य्यं मास्म गमः प्राप्नुहि । त्वयि विश्वविजेतरि मत्सखेऽर्जुने क्षत्रबन्धाविवैतदीदृशं क्लैब्यं नोपयुज्यते । ननु न मे शौर्य्याभावरूपं क्लैब्यं किन्तु भीष्मादिषु पूज्येषु धर्म्मबुद्ध्या विवेकोऽयं दुर्य्योधनादिषु भ्रातृषु मच्छस्त्रप्रहारेण मरिस्यत्सु कृपेयमिति चेत्तत्राह-क्षुद्रमिति । नैते तव विवेककृपे, किन्तु क्षुद्रं लघिष्ठं हृदयदौर्व्वल्यमेव ; तस्मात्तत्त्यक्त्वा युद्धायोत्तिष्ठ सज्जीभव । हे परन्तप शत्रुतापनेति—शत्रुहासपात्रतां मा गाः ॥३॥

अर्ज्जुन उवाच—

कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन ।
इषुभिः प्रति योत्स्यामि पूजार्हावरिसूदन ॥४॥

सारा०व०—ननु "प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः" इति धर्मशास्त्रम्, अतोऽहं युद्धान्निवर्ते इत्याह,—कथमिति । प्रतियोत्स्यामि प्रतियोत्स्ये । नन्वेतौ युध्येते, तर्ह्यनयोः प्रतियोद्धा भवितुं त्वं किं न शक्नोषि ? सत्यं न शक्नोम्येवेत्याह—पूजार्हाविति । अनयोश्चरणेषु भक्त्या कुसुमान्येव दातुमर्हामि न तु क्रोधेन तीक्ष्णशरानितिभावः । भो वयस्य कृष्ण ! त्वमपि शत्रूनेव युद्धे हंसि, न तु सान्दीपनिं स्वगुरुम्, नापि बन्धून् यदूनित्याह,-हे मधुसूदनेति । ननु मधवो यदव एव ! तत्राह,—हे अरिसूदन ? मधुर्नाम दैत्यो यस्तवारिरिति ब्रवीमीति ॥४॥

गी०भू०—ननु भीष्मादिषु प्रतियोद्धृषु सत्सु त्वया कथं न योद्धव्यम् ,—"आहूतो न निवर्त्तेत" इति युद्धविधानाच्च क्षत्रियस्येति चेत्तत्राह,—कथमिति । भीष्मं पितामहं, द्रोणञ्च विद्यागुरुं, इषुभिः कथं योत्स्ये ? यदिमौ पूजार्हौ पुष्पादिभिरभ्यर्च्यौ, परिहासवाग्भिरपि याभ्यां युद्धं न युक्तं, ताभ्यां सहेषुभिस्तत्कथं युज्येत ?—"प्रयिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः" इति स्मृतेश्च । मधुसूदनारिसूदनेति सम्बोधनपुनरुक्तिः—शोकाकुलस्य पूर्व्वोत्तरानुसन्धिविरहात् ;तद्भावश्च,—त्वमपि शत्रूनेव युद्धे निहंसि न तूग्रसेनसान्दीपन्यादीन् पूज्यानिति ॥४॥

गुरूनहत्वा हि महानुभावान्
श्रेयो भोक्तुं भैक्ष्यमपीह लोके ।
हत्वार्थकामांस्तु गुरूनिहैव
भुञ्जीय भोगान्रुधिरप्रदिग्धान् ॥५॥

सारा०व०—नन्वेवं ते यदि स्वराज्येऽस्मिन् नास्ति जिघृक्षा,तर्हि कया वृत्त्या जीविष्यसीत्यत्राह,—गुरून् अहत्वा गुरुवधमकृत्वा भैक्ष्यं क्षत्रियैर्विगीतमपि भिक्षया प्राप्तमन्नमपि भोक्तुं श्रेयः,

ऐहिक-दुर्यशोलाभेऽपि पारत्रिकममङ्गलं तु नैव स्यादिति भावः। न चैते गुरवोऽवलिप्ताः कार्याकार्यमजानन्तश्चाधार्मिकदुर्योधनाद्यनुगतास्त्यज्या एव,—यदुक्तं "गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः। उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥" इति बाच्यमित्याह,—महानुभावानिति। कालकामादयोऽपि यैर्वशीकृतास्तेषां भीष्मादीनां कुतस्तद्दोषसम्भव इति भावः। ननु "अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित्। इति सत्यं महाराज बद्धोऽस्म्यर्थेन कौरवैः ॥" इति युधिष्ठिरं प्रति भीष्मेणैवोक्तमतः साम्प्रतमर्थकामत्वादेतेषां महानुभावत्वं प्राक्तनं विगलितम्? सत्यम्, तदप्येतान् हतवतो मम दुःखमेव स्यादित्याह,—अर्थकामानर्थलुब्धानप्येतान् कुरून् हत्वाऽहं भोगान् भुञ्जीय किन्त्वेतेषां रुधिरेण प्रदिग्धान् प्रलिप्तानेव। अयमर्थः—एतेषामर्थलुब्धत्वेऽपि मद्गुरुत्वमस्त्येव, अत एवैतद्वधे सति गुरुद्रोहिणो मम खलु भोगो दुष्कृतिमिश्रः स्यादिति ॥ ५ ॥

गी०भू०—ननु स्वराज्ये स्पृहा चेत्तव नास्ति तर्हि देहयात्रा वा कथं सेत्स्यतीति चेत् तत्राह—गुरूनिति। गुरूनहत्वा गुरुवधमकृत्वा स्थितस्य मे भैक्षान्नं क्षत्रियाणां निन्द्यमपि भोक्तुं श्रेयः प्रशस्ततरम्, ऐहिकदुर्यशोहेतुत्वेऽपि परलोकाविघातित्वात्। नन्वेते भीष्मादयो गुरवोऽपि युद्धगर्व्वावलेपात् छद्मना युष्मद्राज्यापहारं युष्मद्द्रोहञ्च कुर्व्वतां दुर्योधनादीनां संसर्गेण कार्य्याकार्य्यविवेकविरहाच्च संप्रति त्याज्या एव—"गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः। उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥" इति स्मृतेरिति चेत्तत्राह—महानुभावानिति। महान् सर्व्वोत्कृष्टोऽनुभावो वेदाध्ययनब्रह्मचर्य्यादिहेतुकः प्रभावो येषां तान्। कालकामादयोऽपि यद्वश्यास्तेषां तद्दोषसंबन्धो नेति भावः। ननु "अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्यचित्। इति सत्यं महाराज

बद्धोऽस्म्यर्थेन कौरवैः ॥" इति भीष्मोक्तेरर्थलोभेन विक्रीतात्मनां तेषां कुतो महानुभावता? ततो युद्धे हन्तव्यास्ते इति चेत्त्राह—हत्वार्थकामानिति। अर्थकामानपि गुरून् हत्वाहमिहैव लोके भोगान् भुञ्जीय, न तु परलोके। तांश्च रुधिरप्रदिग्धान् तद्रुधिरमिश्रानेव, न तु शुद्धान् भुञ्जीय तद्धिंसया तल्लाभात्। तथा च युद्धगर्व्वावलेपादिमत्त्वेऽपि तेषां मद्गुरुत्वमस्त्येवेति पुनर्गुरुग्रहणेन सूच्यते ॥५॥

न चैतद्विद्मः कतरन्नो गरीयो
यद्वा जयेम यदि वा नो जयेयुः।
यानेव हत्वा न जिजीविषाम-
स्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥६॥

सारा०व०—किञ्च गुरुद्रोहे प्रवृत्तस्यापि मम जयः पराजयो वा भवेदित्यपि न ज्ञायत इत्याह—न चैतदिति। तथापि नोऽस्माकं कतरत् जयपराजयोर्मध्ये किं खलु गरीयोऽधिकतरं भविष्यति, एतन्न विद्मः तदेव पक्षद्वयं दर्शयति—एतान् वयं जयेम, नोऽस्मान् वा एते जयेयुः इति। किञ्च जयोऽप्यस्माकं फलतः पराजय एवेत्याह—यानेवेति ॥६॥

गी०भू०—ननु भैक्षभोजनं क्षत्रियस्य विगर्हितं, युद्धञ्च स्वधर्म्मं विजानन्नपि किमिदं विभाषसे इति चेत्त्राह—न चैतदिति। एतद्द्वयं न विद्मः—भैक्षयुद्धयोर्मध्ये नोऽस्माकं कतरद्गरीयः प्रशस्ततरम्—हिंसा-विरहाद्भैक्ष्यं गरीयः स्वधर्म्मत्वाद्युद्धं वेति, एतच्च न विद्मः। समारब्धे युद्धे वयं धार्त्तराष्ट्रान् जयेम ते वा नोऽस्मान् जयेयुरिति। ननु महाविक्रमिणां धर्म्मिष्ठानाञ्च भवतामेव विजयो भावीति चेत्तत्राह—यानेवेति। यान् धार्त्तराष्ट्रान् भीष्मादीन् सर्वान्। न जिजीविषामो जीवितुमपि नेच्छामः किं पुनर्भोगान् भोक्तुमित्यर्थः। तथा च विजयोऽप्यस्माकं फलतः परा-

जय एवेति; तस्माद्युद्धस्य भैक्षाद्गरीयस्त्वमप्रसिद्धमिति। एवमेतावता ग्रन्थेन "तस्मादेवंविच्छान्तदान्त उपरतस्तितिक्षुः श्रद्धान्वितो भूत्वात्मन्येवात्मानं पश्येत्" इति श्रुतिप्रसिद्धमर्ज्जुनस्य ज्ञानाधिकारित्वं दर्शितम्। तत्र किन्नो राज्येनेति "शमदमौ"; अपि त्रैलोक्यराज्यस्येत्यैहिकपारत्रिकभोगोपेक्षालक्षणा 'उपरतिः'; भैक्षं भोक्तुं श्रेय इति द्वन्द्वसहिष्णुत्वलक्षणा 'तितिक्षा', गुरुवाक्यदृढविश्वासलक्षणा 'श्रद्धा' तूत्तरवाक्ये व्यक्तीभविष्यति, न खलु शमादिशून्यस्य ज्ञानेऽस्त्यधिकारः पङ्गादेरिव कर्म्मणीति ॥६॥

कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्मसंमूढचेताः।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥७॥

सारा०व०—ननु तर्हि सोपपत्तिकं शास्त्रार्थं त्वमेव ब्रुवाणः क्षत्रियो भूत्वा भिक्षाटनं निश्चिनोषि तद्यलं मदुक्त्येति तत्राह—कार्पण्येति। स्वाभाविकस्य शौर्यस्य त्याग एव मे कार्पण्यम्। "धर्मस्य सूक्ष्मा गति"रित्यतो धर्मव्यवस्थायामप्यहं मूढबुद्धिरेवास्मि, अतस्त्वमेव निश्चित्य श्रेयो ब्रूहि। ननु मद्वाचस्त्वं पण्डितमानित्वेन खण्डयसि चेत्, कथं ब्रूयाम्? तत्राह शिष्यस्तेऽहमस्मि, नातः परं वृथा खण्डयामिति भावः ॥ ७ ॥

गी०भू०—अथ "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्", "आचार्य्यवान् पुरुषो वेद"इत्यादिश्रुतिसिद्धां गुरूपसत्तिं दर्शयति—कार्पण्येति। "यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात् प्रैति स कृपणः" इति श्रवणादब्रह्मवित्त्वं कार्पण्यम्। तेन हेतुना यो दोषो यानेव हत्वेति बन्धु-

वर्गममतालक्षणस्तेनोपहतस्वभावो युद्धस्पृहालक्षणः स्वधर्म्मो यस्य सः। धर्म्मे संमूढं क्षत्रियस्य मे युद्धं स्वधर्म्मस्तद्विहाय भिक्षाटनं वेत्येवं सन्दिहानं चेतो यस्य सः। ईदृशः सन्नहं त्वामिदानीं पृच्छामि—तस्मान्निश्चितं 'ऐकान्तिकं' 'आत्यन्तिकं' यन्मे श्रेयः स्यात्तत् त्वं ब्रूहि; साधनात्तारमवश्यंभावित्वं 'ऐकान्तिकत्वं', भूतस्याविनाशित्वं 'आत्यन्तिकत्वम्'। ननु शरणागतस्योपदेशः "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्" इत्यादि-श्रुतेः, सखायं त्वां कथमुपदिशामि इति चेत्तत्राह—शिष्यस्तेऽहमिति। शाधि शिक्षय ॥७॥

न हि प्रपश्यामि ममापनुद्याद्
यच्छोकमुच्छोषणमिन्द्रियाणाम्।
अवाप्य भूमावसपत्नमृद्धं
राज्यं सुराणामपि चाधिपत्यम् ॥८॥

सारा०व०—ननु मयि तव सख्यभाव एव, ननु गौरवम्, अतस्त्वां कथमहं शिष्यं करोमि, तस्माद् यत्र तव गौरवं तं कमपि द्वैपायनादिकं प्रपद्यस्वेत्यत आह—न हीति। मम शोकमपनुद्यात् दूरीकुर्य्यादेवं जनं न प्रकर्षेण पश्यामि त्रिजगत्येकं त्वां विना। स्वस्मादधिकबुद्धिमन्तं बृहस्पतिमपि न जानामीत्यतः शोकार्त्त एव खलु कं प्रपद्येय इति भावः। यद् यतः शोकादीन्द्रियाणामुच्छोषणं महानिदाघात् क्षुद्रसरसामिव उत्कर्षेण शोषो भवति। ननु तर्हि साम्प्रतं त्वं शोकार्त्त एव खलु युध्यस्व, ततश्चैतान् जित्वा राज्यं प्राप्तवतस्तव राज्यभोगाभिनिवेशेनैव शोकोऽपयास्यतीत्यत आह—अवाप्येति भूमौ निष्कण्टकं राज्यं स्वर्गे सुराणामाधिपत्यं वा प्राप्यापि स्थितस्य ममेन्द्रियाणामेतदुच्छोषणमेवेत्यर्थः ॥ ८ ॥

गी॰भू॰—ननु त्वं शास्त्रज्ञोऽसि स्वहितं विचार्य्यानुतिष्ठ, सख्युर्मे शिष्यः कथं भवेरिति चेत्त्राह—न हीति। यत् कर्म्म मम शोकमपनुद्याद् दूरीकुर्य्यात्तादहं न प्रपश्यामि। शोकं विशिनष्टि--इन्द्रियाणामुच्छोषणमिति। तस्माच्छोकविनाशाय त्वां प्रपन्नोऽस्मीति। इत्थञ्च "सोऽहं भगवः शोचामि तं मां भवान् शोकस्य पारं तारयतु" इति श्रुत्यर्थो दर्शितः। ननु त्वमधुना शोकाकुलः प्रपद्यसे युद्धात् सुखसमृद्धिलाभे विशोको भविष्यसीति चेत्त्राह--अवाप्येति। यदि युद्धे विजयी स्यां तदा भूमावसपत्नं निष्कण्टकं राज्यं प्राप्य यदि च तत्र हतः स्यां तदा स्वर्गे सुराणामप्याधिपत्यं प्राप्य स्थितस्य मे विशोकत्वं न भवेदित्यर्थः। "तद्यथेह कर्म्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयते" इति श्रुतेर्नैहिकं पारत्रिकं वा युद्धलब्धं सुखं शोकापहं तस्मात्तादृशमेव श्रेयस्त्वं ब्रूहीति न युद्धं शोकहरम्।८॥

संजय उवाच—

एवमुक्त्वा हृषीकेशं गुडाकेशः परंतप।
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥९॥

गी॰-भू॰--ततोऽर्जुनः किमकरोदित्यपेक्षायां सञ्जय उवाच--एवमुक्त्वेति। गुडाकेशो हृषीकेशं प्रति एवं न हि प्रपश्यामीत्यादिना युद्धस्य शोकानिवर्त्तकत्वमुक्त्वा परन्तपोऽपि गोविन्दं सर्व्ववेदज्ञं प्रति 'न योत्स्ये इति चोक्त्वेति योज्यम्। तत्र हृषीकेशत्वाद् बुद्धिं युद्धे प्रवर्त्तयिष्यति, सर्व्ववेदवित्त्वाद् युद्धं स्वधर्म्मत्वं ग्राहयिष्यतीति व्यज्य धृतराष्ट्रहृदि संजाता स्वपुत्र-राज्याशा निरस्यते ॥९॥

तमुवाच हृषीकेशः प्रहसन्निव भारत।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥१०॥

सारा॰व॰—अहो तवाप्येतावान् खल्वविवेक इति सख्य-भावेन तं प्रहसन् अनौचित्यप्रकाशेन लज्जाम्बुधौ निमज्जयन् इवेति तदानीं शिष्यभावं प्राप्ते तस्मिन् हास्यमनुचितमित्यधरोष्ठनिकुञ्चनेन हास्यमावृण्वंश्चेत्यर्थः। हृषीकेश इति पूर्व्वं प्रेम्णैवार्जुन-वाङ्नियम्योऽपि साम्प्रतमर्जुन—हितकारित्वात् प्रेम्णैवार्जुनमनोनियन्तापि भवतीति भावः। सेनयोरुभयोर्मध्ये इत्यर्जुनस्य विषादो भगवता प्रबोधश्च, उभाभ्यां सेनाभ्यां सामान्यतो दृष्ट एवेति भावः॥ १०॥

गी॰भू॰--व्यङ्गमर्थं प्रकाशयन्नाह--तमुवाचेति-तं विषीदन्तमर्जुनं प्रति हृषीकेशो भगवान् "अशोच्यान्" इत्यादिकमतिगम्भीरार्थं वचनमुवाच--'अहो तवापीदृग् विवेकः' इति सख्यभावेन प्रहसन्। अनौचित्यभाषित्वेन त्रपासिन्धौ निमज्जयन्नित्यर्थः। इवेति तदैव शिष्यतां प्राप्ते तस्मिन् हासानौचित्यादीषदधरोल्लासं कुर्व्वन्नित्यर्थः। अर्जुनस्य विषादो भगवता तस्योपदेशश्च सर्व्वसाक्षिक इति बोधयितुं सेनयोरुभयोरित्येतत् ॥१०॥

श्रीभगवानुवाच—

अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥११॥

सारा॰व॰—भो अर्जुन! तवायं बन्धुवधहेतुकः शोको भ्रममूलक एव, तथा कथं भीष्ममहं संख्ये इत्यादिको विवेकश्चाप्रज्ञा-मूलक एवेत्याह—अशोच्यान् शोकानर्हानेव त्वमन्वशोचो ऽनुशोचितवानसि। तथा त्वां प्रबोधयन्तं मां प्रति प्रज्ञावादान् प्रज्ञायां सत्यामेव ये वादाः "कथं भीष्ममहं संख्ये" इत्यादीनि वाक्यानि तान्भाषसे, नतु तव कापि प्रज्ञा वर्त्तत इति भावः। यतः पण्डिताः प्रज्ञावन्तो गतासून् गता निःसृता भवन्त्यसवो

येभ्यः तान् स्थूलदेहान् न शोचन्ति, तेषां नश्वरभावत्वादिति भावः। अगतासून् अनिःसृतप्राणान् सूक्ष्मदेहानपि न शोचन्ति, ते हि मुक्तेः पूर्व्वं नश्वरा एव, उभयेषामपि तथा तथा स्वभावस्य दुष्परिहरत्वात्। मूर्खास्तु पित्रादिदेहेभ्यः प्राणेषु निःसृतेष्वेव शोचन्ति, सूक्ष्मदेहांस्तु न, ते प्रायः परिचिन्वन्त्यतस्तैरलम्। एते हि सर्व्वे भीष्मादयः स्थूल – सूक्ष्म-देह-सहिता आत्मान एव; आत्मनान्तु नित्यत्वात्तेषु शोकप्रवृत्तिरेव नास्तीत्यतस्त्वया यत्पूर्व्वमर्थ-शास्त्रात् धर्म्मशास्त्रं बलवदित्युक्तं तत्र मया तु धर्म्मशास्त्रादपि ज्ञानशास्त्रं बलवदित्युच्यत इति भावः॥११

गी०भू०—एवं अर्जुने तूष्णींस्थिते तद्बुद्धिमाक्षिपन् भगवानाह—अशोच्यानिति। हे अर्ज्जुन! अशोच्यान् शोचितुमयोग्यानेव धार्त्तराष्ट्रांस्त्वं अन्वशोचः शोचितवानसि। तथा मां प्रति प्रज्ञावादान् प्रज्ञावतामिव वचनानि "दृष्ट्वेमं स्वजनम्" इत्यादीनि, "कथं भीष्मम्" इत्यादीनि च भाषसे, न च ते प्रज्ञालेशोऽप्यस्तीति भावः। ये तु प्रज्ञावन्तस्ते गतासून् निर्गतप्राणान् स्थूलदेहान्, अगतासूंश्चानिर्गतप्राणान् सूक्ष्मदेहान्, च-शब्दादात्मनश्च न शोचन्ति। अयमर्थः–शोकः स्थूलदेहविनाशनिमित्तः सूक्ष्मदेहविनाशनिमित्तो वा? नाद्यः—स्थूलदेहानां विनाशित्वात्, नान्त्यः—सूक्ष्मदेहानां मुक्तेः प्रागविनाशित्वात्। तद्वतां आत्मनां तु षड्भावविकारवर्जितानां नित्यत्वान्न शोच्यतेति; देहात्मस्वभावविदां न कोऽपि शोकहेतुः। यदर्थशास्त्राद्धर्म्मशास्त्रस्य बलवत्त्वमुच्यते, तत् किल ततोऽपि बलवता ज्ञानशास्त्रेण प्रत्युच्यते। तस्मादशोच्ये शोच्यभ्रमः पामरसाधारणः पण्डितस्य ते न योग्य इति भावः॥११॥

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः।
न चैव न भविष्यामः सर्व्वे वयमतः परम्॥१२॥

सारा०व०–अथवा सखे? त्वामहमेवं पृच्छामि; किञ्च प्रीत्यास्पदस्य मरणे दृष्टे सति शोको जायते, तत्रेह प्रीत्यास्पदमात्मा देहो वा? "सर्व्वेषामेवभूतानां नृप स्वात्मैव वल्लभः" इति शुकोक्तेरात्मैव प्रीत्यास्पदमिति चेत्तर्हि जीवेश्वरभेदेन द्विविधस्यैवात्मनो नित्यत्वादेव मरणाभावादात्मा शोकस्य विषयो नेत्याह–नत्वेवाहमिति। अहं परमात्मा जातु कदाचिदपि पूर्व्वं नासमिति न, अपि त्वासमेव। तथा त्वमपि जीवात्मा आसीरेव। तथेमे जनाधिपा राजानश्च जीवात्मान आसन्नेव इति प्रागभावाभावो दर्शितः। तथा सर्व्वे वयमहं त्वमिमे जनाधिपाश्च अतः परं न भविष्यामो न स्थास्याम इति न, अपि तु स्थास्याम एवेति ध्वंसाभावश्च दर्शितः इति परात्मनो जीवात्मनाञ्च नित्यत्वादात्मा न शोकविषय इति साधितम्। अत्र श्रुतयः "नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्" इत्याद्याः॥१२॥

गी०भू०——एवमस्थानशोचित्वादपाण्डित्यमर्ज्जुनस्यापाद्य तत्त्वजिज्ञासुं नियोजिताञ्जलिं तं प्रति सर्व्वेश्वरो भगवान् "नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्" इति श्रुतिसिद्धं स्वस्माज्जीवानाञ्च पारमार्थिकं भेदमाह—नत्वेवाहमिति। हे अर्ज्जुन! अहं सर्व्वेश्वरो भगवान् इतः पूर्व्वस्मिन्नादौ काले जातु कदाचिन्नासमिति न, अपित्वासमेव। तथा त्वमर्ज्जुनो नासीरिति न, किन्त्वासीरेव। इमे जनाधिपा राजानो नासन्निति न, किन्त्वासन्नेव। तथैनः परस्मिन्नन्ते काले सर्व्वे वयं अहञ्च त्वञ्च इमे च न भविष्याम इति न, किन्तु भविष्याम एवेति। सर्व्वेश्वरस्य जीवानाञ्च त्रैकालिकसत्तायोगित्वात्तद्विषयको न शोको युक्त इत्यर्थः। न चाविद्याकृतत्वाद्व्यवहारिकोऽयं भेदः, सर्व्वज्ञे भगवत्यविद्यायोगात्, "इदं ज्ञानमुपाश्रित्य" इत्यादिना

मोत्तेऽपि तस्याभिधास्यमानत्वाच्च । न चाभेदज्ञस्यापि हरेर्बाधितानुवृत्तिन्यायेनेयमज्ञानादिभेददृष्टिरिति वाच्यं—तथा सत्युपदेशासिद्धेः । मरुमरीचिकादावुदकबुद्धिर्बाधिताप्यनुवर्त्तमाना मिथ्यार्थविषयत्वनिश्चयान्नोदकाहरणादौ प्रवर्त्तयेदेवमभेदबोधबाधिताप्यनुवर्त्तमानाज्ञानादिभेददृष्टिस्तत्त्वनिश्चयान्नोपदेशादौ प्रवर्त्तयिष्यतीति यत्किञ्चिदेतत् । ननु फलवत्यज्ञातेऽर्थे शास्त्रतात्पर्य्यवीक्षणात् तादृशोऽभेदस्तात्पर्य्यविषयो वैफल्याज्ज्ञातत्वाच्च, भेदस्तद्विषयो न स्यात्, किन्तु "अद्भ्यो वा एष प्रातरुदेत्यपः सायं प्रविशति" इत्यादि श्रुत्यर्थवदनुवाद्य एव स इति चेन्मन्दमेतत्—"पृथगात्मानं प्रेरितारञ्च मत्वा" "जुष्टस्ततस्तेनामृतत्वमेति" इत्यादिना भेद एवामृतत्वफलश्रवणात्, विरुद्धधर्म्मावच्छिन्नप्रतियोगिकतया लोके तस्याज्ञातत्वाच्च । ते च धर्म्मा विभुत्वाणुत्व-स्वामित्व-भृत्यत्वादयः शास्त्रैकगम्या मिथो विरुद्धा बोध्याः । अभेदस्त्वफलस्तत्र फलानङ्गीकारात्, अज्ञातश्च शशशृङ्गवदसत्त्वात् । तस्मात् पारमार्थिकस्तद्भेदः सिद्धः ॥१२॥

देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति॥१३॥

सारा०व०—ननु चात्मसम्बन्धेन देहोऽपि प्रीत्यास्पदं स्यात्, देहसम्बन्धेन पुत्रभ्रात्रादयोऽपि, तत्सम्बन्धेन न पुत्रादयोऽपि, अतस्तेषां नाशे शोकः स्यादेवेति चेदत आह,—देहिन इति । देहिनो जीवस्यास्मिन् देहे कौमारं कौमारप्राप्तिर्भवति, ततः कौमारनाशानन्तरं यौवनप्राप्तिर्यौवननाशानन्तरं जराप्राप्तिर्यथा, तथा एव देहान्तरप्राप्तिरिति । ततश्चात्मसम्बन्धिनां कौमारादीनां प्रीत्यास्पदानां नाशे यथा शोको न क्रियते तथा देहस्याप्यात्मसम्बन्धिनः प्रीत्यास्पदस्य नाशे शोको न कर्त्तव्यः । यौवनस्य

नाशे जराप्राप्तौ शोको जायत इति चेत् कौमारस्य नाशे यौवनप्राप्तौ हर्षोऽपि जायत इति । अतो भीष्मद्रोणादीनां जीर्ण-देह—नाशे खलु नव्यदेहान्तरप्राप्तौ तर्हि हर्षः क्रियतामिति भावः । यद्वा एकस्मिन्नपि देहे कौमारादीनां यथा प्राप्तिस्तथैवैकस्यापि देहिनो जीवस्य नानादेहानां प्राप्तिरिति ॥१३॥

गी०भू०—ननु भीष्मादिदेहावच्छिन्नानामात्मनां नित्यत्वेऽपि तद्देहानां तद्भोगायतनानां नाशे युक्तः शोक इति चेत्तत्राह—देहिनोऽस्मिन्निति । त्रैकालिका बहवो देहा यस्य सन्ति, तस्य देहिनो जीवस्यास्मिन् वर्त्तमाने देहे क्रमात् कौमारयौबनजरास्तिस्रोऽवस्था भवन्ति । तासामात्मसम्बन्धिनां तद्भोगोपयुक्तानां पूर्व्वपूर्व्वविनाशेन परपरप्राप्तौ यथा न शोकस्तथैव तद्देहविनाशे सति देहान्तरप्राप्तिर्भविष्यतीति । तथा च भीष्मादीनां जरितदेहनाशे नव्यदेहप्राप्तिर्यथातियौबनप्राप्तिन्यायेन हर्षहेतुरेवेति, न तद्देहविनाशहेतुकः शोकस्तवोचित इति भावः । धीरो धीमान् देहस्वभावजीवकर्म्मविपाकस्वरूपज्ञः, अत्र 'देहिनः' इत्येकवचनं जात्यभिप्रायेण बोध्यं, पूर्व्वत्रात्मबहुत्वोक्तेः । अत्राहुः—'एक एव विशुद्धात्मा, तस्याविद्ययापरिच्छिन्नस्य तस्यां प्रतिबिम्बितस्य वा नानात्मत्वम् ।' श्रुतिश्चैवमाह,—"आकाशमेकं हि यथा घटादिषु पृथग्भवेत्, तथात्मैको ह्यनेकस्थो जलाधारेष्विवांशुमानिति ।" तद्विज्ञानेन तस्य विनाशे तु तन्नानात्वनिवृत्त्या तदैक्यं सिध्यतीत्येकवचनेनैतत् पार्थसारथिराहेति । तन्मन्दं—जड़या तया चैतन्यराशेश्छेदासम्भवात्, तैरपि तद्विषयत्वानङ्गीकाराच्च । वास्तवे च्छेदे विकारित्वाद्यापत्तिः टङ्कच्छिन्नपाषाणवत् स्यात्—नीरूपस्य विभोः प्रतिबिम्बासम्भवाच्च, अन्यथाकाशदिगादीनां तदापत्तिः । न च प्रतीत्यन्यथानुपपत्तिरेवाकाशस्य प्रतिबिम्बे मानं तद्वर्त्तिग्रहनक्षत्रप्रभामण्डलं तस्यैवाम्भसि भासमानत्वेन प्रतीतेः ।

"आकाशमेकं हि" इति श्रुतिस्तु परमात्मविषया तस्याकाशवत् सूर्य्यवच्च बहुवृत्तिकत्वं वदतीत्यविरुद्धम । न चात्मैक्यस्योपदेष्टा संभवति । स हि तत्त्वविन्न वा ? आद्ये ऽद्वितीयमात्मानं विजानन्तस्योपदेश्यापरिस्फूर्त्तिः, अन्त्ये त्वज्ञत्वादेव नात्मज्ञानोपदेष्टृत्वम् । बाधितानुवृत्त्याश्रयणं तु पूर्व्वनिरस्तम् ॥१३॥

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः ।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥१४॥

सारा०व०—ननु सत्यमेव तत्वं, तदप्यविवेकिनो मम मन एवानर्थकारी वृथैव शोक-मोह-व्याप्तं दुःखयतीति, तत्र न केवलं एकं मन एव, अपितु मनसो वृत्तयोऽपि सर्व्वास्त्वगादीन्द्रियरूपाः स्वविषयानुभाव्यानर्थकारिण्य इत्याह—मात्रा इन्द्रियग्राह्यविषयास्तेषां स्पर्शाः अनुभवाः । शीतोष्णेति आगमापायिन इति—यदेव शीतलजलादिकमुष्णकाले सुखदं, तदेव शीतकाले दुखदमतोऽनियतत्वादागमापायित्वाच्च, तान् विषयानुभवान् तितिक्षस्व सहस्व; तेषां सहनमेव शास्त्रविहितो धर्म्मः; न हि माघे मासि जलस्य दुःखदत्वबुद्धयैव शास्त्रे विहितः स्नानरूपो धर्म्मस्त्यज्यते । धर्म्म एव काले सर्व्वानर्थनिवर्त्तको भवति; एवमेव ये पुत्रभ्रात्रादयाः उत्पत्तिकाले धनाद्युपार्जनकाले च सुखदास्त एव मृत्युकाले दुःखदा आगमापायिनोऽनित्यास्तानपि तितिक्षस्व; न तु तदनुरोधेन युद्धरूपः शास्त्रविहितः स्वधर्म्मस्त्याज्यः । विहितधर्म्मानाचरणं खलु काले महानर्थकृदेव इति भावः ॥ १४ ॥

गी०भू०—ननु भीष्मादयो मृताः कथं भविष्यन्तीति तद्दुःखनिमित्तः शोको माभूत् । तद्विच्छेदद्दुःखनिमित्तास्तु मे मनःप्रभृतीनि प्रदहन्तीति चेत्तत्राह—मात्रेति । मात्रास्त्वगादीन्द्रियवृत्तयः मीयन्ते

परिच्छिद्यन्ते विषया आभिरिति व्युत्पत्तेः । स्पर्शास्ताभिर्विषयाणामनुभवास्ते खलु शीतोष्णसुखदुःखदा भवन्ति । यदेव शीतलमुदकं ग्रीष्मे सुखदं तदेव हेमन्ते दुःखदमित्यतोऽनियतत्वादागमापायित्वाच्चानित्यानस्थिरांस्तान् तितिक्षस्व सहस्व, एतदुक्तं भवति—माघस्नानं दुःखकरमपि धर्म्मतया विधानाद्यथा क्रियते तथा भीष्मादिभिः सह युद्धं दुःखकरमपि तथा विधानात् कार्य्यमेव । तत्रत्यो दुःखानुभवस्त्वागन्तुको धर्म्मसिद्धत्वात् सोढव्यः । धर्म्माज्ज्ञानोदयेन मोक्षलाभे तूत्तरत्र तस्य नानुवृत्तिश्च ज्ञाननिष्ठा परिपाकं विनैव धर्म्म—त्यागस्त्वनर्थहेतुरिति । कौन्तेय भारतेति पदाभ्यामुभयकुलशुद्धस्य ते धर्म्मभ्रंशो नोचित इति सूच्यते ॥ १४ ॥

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥१५॥

सारा०व०—एवं विचारेण तत्तत्सहनाभ्यासे सति ते विषयानुभवाः काले किल नापि दुःखयन्ति । यदि च न दुःखयन्ति, तदात्ममुक्तिः स्वप्रत्यासन्नैवेत्याह—यमिति । अमृतत्वाय मोक्षाय ॥१५॥

गी०भू०—धर्म्मार्थ-दुःख-सहनाभ्यासस्योत्तरत्र सुखहेतुत्वं दर्शयन्नाह यं हीति । एते मात्रास्पर्शाः प्रियाप्रियविषयानुभावा यं धीरं धियमीरयति धर्म्मोऽध्वेति व्युत्पत्तेर्धर्मनिष्ठं पुरुषं न व्यथयन्ति सुखदुःखमूर्च्छितं न कुर्व्वन्ति सोऽमृतत्वाय मुक्तये कल्प्यते, न तु तादृशो दुःखसुखमूर्च्छित इत्यर्थः । उक्तमर्थं स्फुटयन् पुरुषं विशिनष्टि समेति—धर्मानुष्ठानस्य कष्टसाध्यत्वाद्दुःखमनुषङ्गलब्धं सुखञ्च यस्य समं भवति ताभ्यां सुखग्लानितोल्लासरहितमित्यर्थः ॥ १५ ॥

नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥१६॥

सारा०व०-एतच्च विवेकदशानधिरुढान् प्रति उक्तम् । वस्तुतस्तु "असङ्गो ह्ययं पुरुषः" इति श्रुतेर्जीवात्मनश्च स्थूल-सूक्ष्म-देहाभ्यां तद्धर्म्मैः शोकमोहादिभिश्च सम्बन्धो नास्त्येव । तत्सम्बन्धस्याविद्या--कल्पितत्वादित्याह—नेति । असतो ऽनात्मधर्म्मत्वादात्मनि जीवे अवर्त्तमानस्य शोकमोहादेस्तदाश्रयस्य देहस्य च भावः सत्ता नास्ति । तथा सतः सत्यरूपस्य जीवात्मनोऽभावो नाशो नास्ति । तस्मादुभयोरेतयोरसत्सतोरन्तो निर्णयोऽयं दृष्टः । तेन भीष्मादिषु त्वदादिषु च जीवात्मसु सत्यत्वादनश्वरेषु देह – दैहिक—विवेकशोकमोहादयो नैव सन्तीति कथं भीष्मादयो नंक्ष्यन्ति कथं वा तांस्त्वं शोचसीति भावः ॥१६॥

गी०भू०—तदेवं भगवता पार्थस्यास्थानशोचितत्वेन तत्पाण्डित्यमाक्षिप्तम् । शोकहरञ्च स्वोपासनमेव तच्चोपास्योपासकभेदघटितमित्युपास्याज्जीवांशिनः स्वस्मादुपासकानां जीवांशानां तात्त्विकं द्वैतमुपदिष्टम् । अथ "यदात्मतत्त्वेन तु ब्रह्मतत्त्वं दीपोपमेनेह युक्तः प्रपश्येत्" इत्यादावंशस्वरूपज्ञानस्यांशिस्वरूपज्ञानोपयोगित्वश्रवणात्तदादौ सनिष्ठादीन् सर्व्वान् प्रत्यविशेषेणोपदेश्यं तच्च-देहात्मनोर्वैधर्म्म्यधियमन्तरा न स्यादिति तद्वैधर्म्म्यबोधायारभ्यते नासत इत्यादिभिः । असतः परिणामिनो देहादेर्भावोऽपरिणामित्वं न विद्यते । सतोऽपरिणामिन आत्मनस्वभावः परिणामित्वं न विद्यते । देहात्मानौ परिणामापरिणामस्वभावौ भवतः । एवमुभयोरसत्सच्छब्दितयोर्देहात्मनोरन्तो निर्णयस्तत्त्वदर्शिभिस्तदुभयस्वभाववेदिभिः पुरुषैर्दृष्टोऽनुभूतः । अत्रासच्छब्देन विनश्वरं देहादि जड़ं सच्छब्देन त्वविनश्वरमात्म-

चैतन्यमुच्यते । एवमेव श्रीविष्णुपुराणेऽपि निर्णीतं दृष्टम्–ज्योतींषि विष्णुर्भुवनानि विष्णुरित्युपक्रम्य यदस्ति यन्नास्ति च विप्रवर्य्येत्यस्ति--नास्ति-शब्द-वाच्ययोश्चेतनजडयोस्तथात्वं वस्त्वस्ति किं कुत्रचिदित्यादिभिर्निरूपितः, तत्र नास्ति शब्द-वाच्यं जडम् । अस्तिशब्दवाच्यन्तु चैतन्यमिति स्वयमेव विवृतम् । यद्वा सत्कार्य्यवादस्थापनायै – तत्पद्यमित्याहु – स्तन्निरवधानं देहात्मस्वभावानभिज्ञानमोहितं प्रति तन्मोह-विनिवृत्तये तत्स्वभावाभिज्ञापनस्य प्रकृतत्वात् ॥ १६ ॥

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥१७॥

सारा०व०-नाभावो विद्यते सत इत्यस्यार्थं स्पष्टयति-अविनाशीति । तत् जीवात्मस्वरूपं येन सर्व्वमिदं शरीरं ततं व्याप्तम् । ननु शरीर-मात्र-व्यापी-चैतन्यत्वे जीवात्मनो मध्यमपरिमाणत्वेनानित्यत्वप्रसक्तिः ? मैवं "सूक्ष्माणामप्यहं जीवः" इति भगवदुक्तेः, "एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश" इति, "वालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीवः स विज्ञेयः" इति । "आराग्रमात्रो ह्यवरोऽपि दृष्टः" इति श्रुतिभ्यश्च तस्य परमाणुपरिमाणत्वमेव । तदपि सम्पूर्णदेहव्यापिशक्तिमत्वं जतुजटितस्य महामणेर्महौषधखण्डस्य वा शिरस्युरसि वा धृतस्य सम्पूर्णदेहपुष्टिकरणशक्तिमत्त्वमिव नासमञ्जसम् । स्वर्ग-नरक-नानायोनिषु गमनञ्च तस्योपाधिपारवश्यादेव । तदुक्तं प्राणमधिकृत्य दत्तात्रेयेन—"येन संसरते पुमान्" इति । अतएवास्य सर्व्वगतत्वमप्यग्रिम—श्लोके वक्ष्यमाणं नासमञ्जसम् । अतएवाव्ययस्य नित्यस्य—"नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्," इति श्रुतेः, यद्वा

ननु देहो जीवात्मा परमात्मेत्येतद्वस्तुत्रिकं मनुष्यतिर्य्यगादिषु सर्व्वत्र दृश्यते, तत्राद्ययोर्देहजीवयोस्तत्त्वं "नासतो विद्यते भाव" इत्यनेनोक्तम्, तृतीयस्य परमात्मवस्तुनः किं तत्त्वमित्यत आह—अविनाशि त्विति । तु–भिन्नोपक्रमे; परमात्मनो मायाजीवाभ्यां स्वरूपतः पार्थक्यात् इदं जगत् ॥ १७ ॥

गी०भू०—उक्तं जीवात्मतद्देहयोस्वभावं विशदयत्यविनाशीति द्वाभ्याम् । तज्जीवात्मतत्त्वमविनाशि नित्यं विद्धि । येन सर्व्वमिदं शरीरं ततं धर्म्मभूतेन ज्ञानेन व्याप्तमस्ति, अस्याव्ययस्य परमाणुत्वेन च विनाशानर्हस्य विनाशं न कश्चित् स्थुलोऽर्थः कर्त्तुमर्हति प्राणस्येवदेहः, इह जीवात्मनो देहपरिमितत्वं न प्रत्येतव्यम् । एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेशेत्यादिषु तस्य परमाणुत्वश्रवणात् । तादृशस्य निखिलदेहव्याप्तिस्तु धर्मभूतज्ञानेनैव स्यात् । एवमाह भगवान् सूत्रकारः—गुणाद्वालोकवदिति । इहापि स्वयं वक्ष्यति – यथा प्रकाशयत्येक इत्यादिना ॥ १७ ॥

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥१८॥

सा०व०–"नासतो विद्यते भावः" इत्यस्यार्थं स्पष्टयति–अन्तवन्त इति । शरीरिणो जीवस्य अप्रमेयस्य अति—सूक्ष्मत्वाद्दुर्ज्ञेयस्य । तस्माद् युध्यस्वेति शास्त्रविहितस्य स्वधर्म्मस्य त्यागोऽनुचित इति भावः ॥ १८ ॥

गी०भू०—अन्तवन्तः विनाशिस्वभावाः, शरीरिणो जीवात्मनः; अप्रमेयस्यातिसूक्ष्मत्वाद्विज्ञानविज्ञातृस्वरूपत्वाच्च प्रमातुमशक्यस्येत्यर्थः । तथा चेदृशस्वभावत्वाज्जीवतद्देहौ न शोकस्थानमिति जीवात्मनो देहो धर्म्मानुष्ठानद्वारा तस्य भोगाय

मोक्षाय च परेशेन सृज्यते । स च स च धर्मेण भवेत्तस्माद् युध्यस्व भारत ॥ १८ ॥

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते ॥१९॥

सारा०व०–भो वयस्य अर्ज्जुन ! त्वमात्मा न हन्तेः कर्त्ता, नापि हन्तेः कर्म्म इत्याह—य इति । एनं जीवात्मानं हन्तारं वेत्ति; भीष्मादीनर्ज्जुनो हन्तीति यो वेत्तीत्यर्थः । हतमिति भीष्मादिभिरर्ज्जुनो हन्यत इति यो वेत्ति, तावुभावप्यज्ञानिनौ । अतोऽर्ज्जुनोऽयं गुरुजनं हन्तीत्यज्ञानिलोकगीताद्दुर्यशसः का ते भीतिरिति भावः ॥१९॥

गी०भू०—उक्तमविनाशित्वं द्रढयति-एनमुक्तस्वभावमात्मानं जीवं यो हन्तारं खड्गादिना हिंसकं वेत्ति यश्चैनं तेन हतं हिंसितं मन्यते तावुभौ तत्स्वरूपं न विजानीतः । अतिसूक्ष्मस्य चैतन्यस्य तस्य छेदाद्यसंभवान्नायमात्मा हन्ति न हन्यते, हन्तेः कर्त्ता कर्म च भवतीत्यर्थः । हन्तेर्देहवियोगार्थत्वान्न तेनात्मनां नाशो मन्तव्यः । श्रुतिश्चैवमाह–"हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतमित्यादिना । एतेन मा हिंस्यात् सर्व्वा भूतानीत्यादिवाक्यं देहवियोगपरं व्याख्यातम् । न चात्रात्मनः कर्तृत्वं प्रसिद्धमिति वाच्यम् । देहवियोजने तत्तस्य सत्त्वात् ॥ १९ ॥

न जायते म्रियते वा कदाचि–
न्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥२०॥

सारा०व०—जीवात्मनो नित्यत्वं स्पष्टतया साधयति–'न जायते,

म्रियते' इति जन्ममरणयोर्वर्त्तमानत्व-निषेधः, 'नायं भूत्वा भविता' इतितयोर्भूतत्वभविष्यत्व-निषेधः। अतएव 'अजः' इति कालत्रयेऽप्यजस्य जन्माभावान्नास्य प्रागभावः। शाश्वतः शश्वत् सर्व्वकाल एव वर्त्तते इति नास्य कालत्रयेऽपि ध्वंसः, अतएवायं नित्यः। तर्हि बहुकालस्थायित्वाज्जराग्रस्तोऽयमिति चेन्न, पुराणः पुरापि नवः प्राचीनोऽप्ययं नवीन इवेति षड्भाव-विकाराभावादिति भावः। ननु शरीरस्य मरणादौपचारिकन्तु मरणमस्यास्तु ? तत्राह,—नेति। शरीरेण सह सम्बन्धाभावान्नोपचारः ॥२०॥

गी०भू०—अथ "जायते अस्ति वर्द्धते विपरिणमते अपक्षीयते विनश्यती"ति यास्काद्युक्तषड्भाव-विकार-राहित्येन प्रागुक्त-नित्यत्वं द्रढ़यति न जायते इति। चार्थे वा शब्दौ। अयमात्मा जीवः कदाचिदपि काले न जायते न म्रियते चेति जन्मविनाशयोः प्रतिषेधः, न चायमात्मा भुत्वोत्पद्य भविता भविष्यतीति जन्मानन्तरस्यास्तित्वस्य प्रतिषेधः, न भूय इति-अयमात्मा भूयोऽधिकं यथास्यात्तथा न भवतीति वृद्धेः प्रतिषेधः। कुतो भूयो न भवतीत्यत्र हेतुरजो नित्य इति। उत्पत्तिविनाशयोगी खलु वृक्षादिरुत्पद्य वृद्धिं गच्छन्नष्टः-आत्मनस्तु तदुभयाभावात् न वृद्धिरित्यर्थः। शाश्वत इत्यपक्षयस्य प्रतिषेधः, शश्वत् सर्व्वदा भवति नापक्षीयते नापक्षयं भजतीत्यर्थः। पुराण इति विपरिणामस्य प्रतिषेधः, पुराणं पुरापि नवो नतु किञ्चिन्नूतनं रूपान्तरमधुना न लब्ध इत्यर्थः। तदेवं षड्भावविकारशून्यत्वादात्मा नित्यः। यस्मादीदृशस्तस्माच्छरीरे हन्यमानेऽपि स न हन्यते। तथा चार्ज्जुनोऽयं गुरुहन्तेत्यविज्ञोक्त्या दुष्कीर्त्तेरबिभ्यता त्वया शास्त्रीयं धर्म्मयुद्धं विधेयमिति ॥ २० ॥

वेदाविनाशिनं नित्यं य एनमजमव्ययम् ।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥२१॥

सारा०व०—अत एवम्भूतज्ञाने सति त्वं युध्यमानोऽप्यहं युद्धे प्रेरयन्नपि दोषभाजौ नैव भवाव इत्याह—वेदेति। नित्यमिति क्रियाविशेषणम्, अविनाशिनमिदि, अजमिति, अव्ययमित्येतैर्विनाशजन्या अपक्षया निषिद्धाः। स पुरुषो मल्लक्षणः कं घातयति, कथं वा घातयति, तथा स पुरुषस्त्वल्लक्षणः कं हन्ति, कथं वा हन्ति ? ॥२१॥

गी०भू०—एवं तत्त्वज्ञानवान् यो धर्म्मबुद्ध्या युद्धे प्रवर्त्तते, यश्च प्रवर्त्तयति, तस्य तस्य च कोऽपि न दोषगन्ध इत्याह—वेदेति। एनं प्रकृतमात्मानमविनाशिनमजमव्ययमपक्षयशून्यञ्च यो वेद शास्त्रयुक्तिभ्यां जानाति, स पुरुषो युद्धे प्रवृत्तोऽपि कं हन्ति कथं वा हन्ति, तत्र प्रवर्त्तयन्नपि कं घातयति कथं वा घातयति ? किमाक्षेपे—न कमपि न कथमपि इत्यर्थः। नित्यमिति वेदनक्रियाविशेषणम् ॥२१॥

वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही ॥२२॥

सारा०व०—ननु मदीययुद्धाद्भीष्मसंज्ञक-शरीरन्तु जीवात्मा त्यक्ष्यत्येवेत्यवेत्यतस्त्वञ्चाहञ्च तत्र हेतु भवाव एवेत्यत आह—वासांसीति। नवीनं वस्त्रं परिधापयितुं जीर्णवस्त्रस्य त्याजने कश्चित् किं दोषो भवतीति भावः। तथा शरीराणीति—भीष्मे जीर्णशरीरं परित्यज्य दिव्यं नव्यमन्यच्छरीरं प्राप्स्यतीति कस्तव वा मम वा दोषो भवतीति भावः ॥२२॥

गी०भू०—ननु मा भूदात्मनां विनाशो भीष्मादिसंज्ञानां तच्छरीरानां तत्सुखसाधनानां युद्धेन विनाशे तत्सुखविच्छेदहेतुको

दोषः स्यादेव, अन्यथा प्रायश्चित्तशास्त्राणि निर्विषयाणि स्युरिति चेत्तत्राह—बासांसीति । स्थूलजीर्णबासस्त्यागेन नबीनबासोधारणमिव वृद्धनृदेहत्यागेन युवदेवदेहधारणं तेषामात्मनामतिसुखकरमेव । तदुभयञ्च युद्धे नैव क्षिप्रं भवेदित्युपकारकात्तस्मान्मा बिरंसीरिति भावः । संयातीति सम्यक्गर्भबासादियातनां बिनैव शीघ्रमेव प्राप्नोतीत्यर्थः । प्रायश्चित्तबाक्यानि तु यज्ञयुद्धवधादन्यस्मिन् बधे नेयानि ॥२२॥

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः॥२३॥

सारा०व०—न च युद्धे त्वया प्रयुक्तेभ्यः शस्त्रास्त्रेभ्यः काप्यात्मनो व्यथा सम्भवेदित्याह—नैनमिति । शस्त्राणि खड्गादीनि, पावक आग्नेयास्त्रमपि युष्मदादिप्रयुक्तम् ; आपः पार्ज्जन्यास्त्रमपि, मारुतो बायव्यमस्त्रम् ॥२३॥

गी०भू०—ननु शस्त्रपातैः शरीरबिनाशे तदन्तःस्थस्यात्मनो विनाशः स्यात् गृहदाहे तन्मध्यस्थस्यैव जन्तोरिति चेत्तत्राह—नैनमिति । शस्त्राणि खड्गादीनि, पाबकः आग्नेयास्त्रम् , आपः पर्ज्जन्यास्त्रम् , मारुतो बायव्यास्त्रम् , तथा च तत्प्रयुक्तैः शस्त्रास्त्रैर्नात्मनः काचिद्व्यथेति ॥२३॥

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥२४॥
अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥२५॥

साराा०व०—तस्मादात्मायमेबमुच्यत इत्याह—अच्छेद्य इति । अत्र प्रकरणे जीबात्मनो नित्यत्वस्य शब्दतोऽर्थतश्च पौनरुक्त्यं

निर्द्धारणप्रयोजकं सन्दिग्धधीषु ज्ञेयम् ;—यथा कलावस्मिन् धर्म्मोऽस्ति धर्म्मोऽस्तीति त्रिचतुर्द्धा-प्रयोगाद्धर्म्मोऽस्त्येवेति निःसंशया प्रतीतिः स्यादिति ज्ञेयम् । सर्व्वगतः स्वकर्म्मबशाद्देवमनुष्यतिर्य्यगादि-सर्व्वदेहगतः ; स्थाणुरचल इति पौनरुक्त्यं स्थैर्य्यनिर्द्धारणार्थम् ; अतिसूक्ष्मत्वादव्यक्तस्तदपि देहव्यापिचैतन्यत्वादचिन्त्योऽतर्क्यः ; जन्मादिषड्बिकारानर्हत्वाद—बिकार्य्यः ॥२४-२५॥

गी०भू०—छेदाद्यभाबादेब तत्तान्नामभिरयमाख्यायत इत्याह—अच्छेद्योऽयमिति । एव-कारः सर्व्वैः संबध्यते । सर्व्वगतः स्वकर्म्महेतुकेषु देबमानवादिषु पशुपक्ष्यादिषु च सर्व्वेषु शरीरेषु पर्य्यायेण गतः प्राप्तोऽपीत्यर्थः । स्थाणुः स्थिरस्वरूपः, अचलः स्थिरगुणकः—"अबिनाशी वा अरे अयमात्मानुच्छित्तिधर्म्मा" इति श्रुतेरित्यर्थः । न चानुच्छित्तिरेब धर्म्मो यस्येति व्याख्येयम्—तस्यार्थस्याबिनाशीत्यनेनैब लाभात् , तस्मादनुच्छित्तयो नित्या धर्म्मा यस्य स तथेत्येबार्थः । सनातनः शाश्वतः, पौनरुक्तदोषस्त्वग्रे परिहरिष्यते ॥२४॥

गी०भू०—अव्यक्तः प्रत्यङ् , चक्षुराद्यग्राह्यः, अचिन्त्यस्तर्कागोचरः श्रुतिमात्रगम्यः, ज्ञानस्वरूपो ज्ञातेत्यादिकं श्रुत्यैव प्रतीयते, अबिकार्य्यः षड्भावबिकारानर्हः । अत्र "अबिनाशि तु तद्बिद्धि" इत्यादिभिरात्मतत्त्वमुपादिशन् हरिः शब्दतोऽर्थतश्च यत् पुनःपुनरबोचत्तस्य दुर्ब्बोधस्य सौबोध्यार्थमेवेत्यदोषः, निर्द्धारणार्थं वा, अयं धर्म्मं वेत्तीत्युक्तौ तद्बेदनं निश्चितं यथा स्यात्तद्वत् । एवमेबाग्रे बक्ष्यति—"आश्चर्य्यवत् पश्यति कश्चित्" इत्यादिना ॥२५॥

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो नैवं शोचितुमर्हसि॥२६॥

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥३१॥

सा०व०—तर्हि निश्चित्य ब्रूहि—किमहं कुर्य्यां किंवा न कुर्य्यामिति, तत्र शोकं मा कुरु, युद्धं तु कुर्व्वित्याह—देहीति द्वाभ्याम् ॥३०॥

सारा०व०—आत्मानो नाशाभावादेव बधाद्विकम्पितुं भेतुं नार्हसि, स्वधर्म्ममपि चावेक्ष्य न विकम्पितुमर्हसीति सम्बन्धः ॥३१

गी०भू०—तदेवं दुरधिगमं जीवयाथात्म्यं समासेनोपदिशन्न-शोच्यत्वमुपसंहरति देहीति । सर्व्वस्य जीवगणस्य देहे हन्य-मानेऽप्ययं देही जीवो नित्यमवध्यो यस्मात् तस्मात् त्वं सर्व्वाणि भूतानि भीष्मादिभावापन्नानि शोचितुं नार्हसि । आत्मनां नित्य-त्वादशोच्यत्वं तद्देहानां त्ववश्यविनाशित्वात्तत्त्वमित्यर्थः ॥३०॥

गी०भू०—एवं परमात्मज्ञानोपयोगित्वादादौ जीवात्मज्ञानं सर्व्वान् प्रति तौल्येनोपदिश्य सन्निष्ठान् प्रति निष्कामतया-नुष्ठितानि कर्म्माणि हृद्विशुद्धिसहकृतामात्मज्ञाननिष्ठां निष्पाद-यन्तीति वदिष्यन् तस्यां प्रतीतिमुत्पादयितुं सकामतयानुष्ठि-तानां कर्मणां काम्यफलप्रदत्वमाह द्वाभ्याम् । स्वधर्म्ममपीति । न केवलं देहात्मस्वभावं निभाल्यं किन्तु स्वधर्ममपीति । युद्धं खलु क्षत्रियस्य नियतमग्निहोत्रादिवद्विहितम् । तच्च शत्रुप्राण-विहंसनरूपमग्निष्टोमादि-पशु-हिंसनवन्न प्रत्यवायनिमित्तम् । उभयत्र हिंसेयमुपकृतिरूपैव, हीनयोर्देहलोकयोस्त्यागेन दिव्ययो-स्तयोर्लाभात् । आह चैवं स्मृतिः – "आहवेषु मिथोऽन्योन्यं जिघांसन्तो महीक्षितः । युद्धमानाः परं शक्त्या स्वर्गं यान्त्य-पराङ्मुखाः । यज्ञेषु पशवो ब्रह्मन् हन्यन्ते सततं द्विजैः । संस्कृताः किल मन्त्रैश्च तेऽपि स्वर्गमवाप्नुवन्नि"त्याद्या । एवं निजधर्ममवे-क्ष्य विकम्पितुं धर्मात् प्रचलितुं नार्हसि । युक्तं न च श्रेयोऽनु

पश्यामीत्यादिना नरके नियतं वासो भवतीत्यन्त्येन युद्धस्य पाप-हेतुत्वं त्वयोक्तं । तच्चाज्ञानादेवेत्याह – धर्म्म्यादिति । युद्धमेव भूमि-जय-द्वारा प्रजा-पालन-गुरुविप्र-संसेवनादि-क्षात्र-धर्म-निर्व्वाहीति । एवमाह भगवान् पराशरः । क्षत्रियोहि प्रजा रक्षन् शस्त्रपाणिः प्रदण्डयन् । निर्जित्य पर-सैन्यादि क्षितिं धर्म्मेण पालयेदिति ॥ ३१ ॥

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥३२॥

सारा०व—किञ्च, जेतृभ्यः सकाशादपि न्याययुद्धे मृताना-मधिकं सुखमतो भीष्मादीन् हत्वा तान् प्रत्युत स्वतोऽप्यधिक-सुखिनः कुर्व्वित्याह—यदृच्छयेति । स्वर्गसाधनं कर्म्मयोगम-कृत्वापीत्यर्थः । अपावृतमपगतावरणम् ॥३२॥

गी०भू०—किञ्चायत्नादागतेऽस्मिन् महति श्रेयसि न युक्तस्ते कम्प इत्याह यदृच्छयेति । चोऽवधारणे । यत्नं विनैव चोपपन्न-मीदृशं भीष्मादिभिर्महावीरैः सह युद्धं सुखिनः सभाग्याः क्षत्रिया लभन्ते, विजये सत्यश्रमेण कीर्त्तिराज्ययो मृत्यौ सति शीघ्रमेव स्वर्गस्य च प्राप्तेरित्यर्थः । एतद्व्यञ्जयन् विशिनष्टि—स्वर्गद्वार-मपावृतमिति । अप्रतिरुद्धस्वर्गसाधनमित्यर्थः । ज्योतिष्टोमादिकं चिरतरेण स्वर्गोपलम्भकमिति ततोऽस्यातिशयः ॥ ३२ ॥

अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥३३॥

सारा०व०—विपक्षे दोषानाह—अथेति चतुर्भिः ॥३३॥

गी०भू०—विपक्षे दोषान् दर्शयति अथेत्यादिभिः । स्वस्य तव धर्म्म्यं युद्धलक्षणं कीर्त्तिञ्च रुद्रसन्तोषण-निवात-कवचादि-

वधलब्धां हित्वा पापं न निवर्त्तेत संग्रामादित्यादि—स्मृति-प्रतिषिद्धं स्वधर्मत्यागलक्षणं प्राप्स्यसि ॥ ३३ ॥

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् ।
संभावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥३४॥

साराº वº—अव्ययामनश्वराम ; सम्भावितस्यातिप्रतिष्ठितस्य ॥३४॥

गीº भूº—न केवलं स्वधर्मस्य कीर्त्तेश्च क्षतिमात्रं। युद्धे समारब्धेऽर्जुनः पलायत इत्यव्ययां शाश्वतीमकीर्त्तिञ्च तव भूतानि सर्व्वे लोकाः कथयिष्यन्ति। ननु मरणाद्भीतेन मया अकीर्त्तिः सोढव्येति चेत्त्राह--सम्भावितस्यातिप्रतिष्ठितस्य । अतिरिच्यते अधिका भवति। तथाच तादृशाकीर्त्तेर्मरणमेव वरमिति ॥ ३४ ॥

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः ।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥३५॥

साराº वº—येषां त्वं बहुमतोऽस्मच्छत्रुरर्ज्जुनस्तु महाशूर इति बहुसम्मानविषयो भूत्वा सम्प्रति युद्धादुपरमे सति लाघवं यास्यसि, ते दुर्य्योधनादयो महारथास्त्वां भयादेव रणादुपरतं मंस्यन्त इत्यन्वयः । क्षत्रियाणां हि भयं विना युद्धोपरतिहेतुर्बन्धुस्नेहादिको नोपपद्यत इति मत्वेति भावः ॥३५॥

गीº भूº—ननु कुलक्षयदोषात् कारुण्याच्च विनिवृत्तस्य मम कथमकीर्त्तिः स्यादिति चेत्त्राह भयादिति। महारथा दुर्य्योधनादयस्त्वां कर्णादिभयान्नतु बन्धुकारुण्याद्रणादुपरतं मंस्यन्ते। न हि शूरस्य शत्रुभयं विनाबन्धुस्नेहेन युद्धादुपरतिरित्यर्थः । इतः पूर्व्वं येषां त्वं बहुमतः शूरो वैरीति बहुगुणवत्तया सम्मतोऽभूरिदानीं युद्धे समुपस्थिते कातरोऽयं विनिवृत्त इत्येवं तत्कृतं लाघवं दुःसहं यास्यसि ॥ ३५ ॥

अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः ।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥३६॥

साराº वº—अवाच्यबादान्,— क्लीव इत्यादि-कटूक्तीः ॥३६॥

गीº भूº—किञ्चावाच्चेति-अहिताः शत्रवो धार्त्तराष्ट्रास्तव सामर्थ्यं पूर्व्वसिद्धं पराक्रमं निन्दन्तः बहूनवाच्यबादीन् शण्ढतिलादिशब्दान् वदिष्यन्ति। तत एवम्बिधावाच्यवादश्रवणादतिशयितं किं दुःखमस्ति। इत्थञ्चैतैः षड्भिर्युद्धवैराग्यस्यास्वर्गत्वमकीर्त्तिकरत्वं चोक्तं दर्शितम् ॥ ३६ ॥

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥३७॥

साराº वº—ननु युद्धे मम जय एव भावीत्यपि नास्ति निश्चयः ; ततश्च कथं युद्धे प्रवर्त्तितव्यमित्यत आह-हत इति ॥३७॥

गीº भूº--ननु युद्धे बिजय एव मे स्यादिति निश्चयाभावात्तोऽहं निवृत्तोऽस्मीति चेत्त्राह--हतो वेति। पक्षद्वयेऽपि ते लाभ एवेति भावः ॥३७॥

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥३८॥

साराº वº—तस्मात्तव सर्व्वथा युद्धमेव धर्म्मस्तदपि यदीमं पापकारणमाशङ्कसे, तर्हि मत्तः पापानुत्पत्तिप्रकारं शिक्षित्वा युध्यस्वेत्याह-सुखदुःखे समे कृत्वा तद्धेतू लाभालाभो राज्यलाभ-राज्यच्युती अपि, तद्धेतू जयाजयावपि समौ कृत्वा—विवेकेन तुल्यौ विभाव्येत्यर्थः । ततश्चैवम्भूतसाम्यलक्षणे ज्ञानबतस्तव पापं नैव भवेत् ; यद्वक्ष्यते—'लिप्यते न स पापेन पद्मपत्रमिवाम्भसा' इति ॥३८॥

गी०भू०--ननु "अथ चेत्त्वम्" इत्यादिपद्यार्थो व्याहतः, राज्याद्युद्देशेन कृतस्य युद्धस्य गुरुविप्रादिविनाशहेतुत्वेन पापोत्पादकत्वादिति चेन्मुमुक्षुवर्त्मना युद्धमानस्य तव तद्विनाशहेतुकं पापं न स्यादित्याह--सुखेति। साम्यकरणमिह तत्र तत्र निर्व्विकारत्वं बोध्यम्, सुखे तद्धेतौ लाभे तद्धेतौ जये च रागमकृत्वा दुःखे तद्धेताबलाभे तद्धेताबजये च द्वेषमकृत्वा तत्र तत्र निर्व्विकारचित्तः सन् ततो युद्धाय युज्यस्व; केवलस्वधर्म्मधिया योद्धुमुद्युक्तो भवेत्यर्थः। एवं मुमुक्षुरीत्या योद्धा त्वं पापं तद्विनाशहेतुकं नावाप्स्यसि। फलेच्छुः सन् यो युध्यते स तत्पापं विन्दति, विज्ञानार्थी तु पुरातनमनन्तपापमपनुदतीत्यर्थः। ननु फलरागं बिना दुष्करे युद्धदानादौ कथं प्रवृत्तिरिति चेदनन्तात्मानन्दरागं तत्र प्रवर्त्तकं गृहाण राज्याद्यनुरागमिव भृगुपाते ॥३८॥

एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥३९

सारा०व०-उपदिष्टं ज्ञानयोगमुपसंहरति--एषेति। सम्यक् ख्यायते प्रकाश्यते वस्तुतत्त्वमनेनेति सांख्यं सम्यक्ज्ञानम्; तस्मिन् करणीया बुद्धिरेषा कथिता। अधुना योगे भक्तियोगे इमां बक्ष्यमाणां बुद्धिं करणीयां शृणु, यया भक्तिविषयिण्या बुद्ध्या युक्तः सहितः; कर्म्मबन्धं संसारम् ॥३९॥

गी०भू०—उक्तं ज्ञानयोगमुपसंहरन् तदुपायं निष्कामकर्म्मयोगं वक्तुमारभते एषेति। संख्योपनिषत् "सम्यक् ख्यायते निरूप्यते तत्त्वमनया" इति निरुक्तेः तया प्रतिपाद्यमात्मयाथात्म्यं सांख्यम्। शैषिकान् तस्मिन् कर्त्तव्यैषा बुद्धिस्तवाभिहिता। "न त्वेवाहम्"इत्यादिना"तस्मात् सर्व्वाणि भूतानि"इत्यन्तेन। सा चेत्तवचित्तादोषान्नाभ्युदेति तर्हि योगे"तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेन" इत्यादि श्रुत्युक्तान्तर्गतज्ञाने निष्कामकर्म्मयोगे कर्त्तव्यामिमां वक्ष्यमाणां बुद्धिं शृणु। फलोक्त्या तां स्तौति—ययेति। कर्म्माणि कुर्व्वाणस्त्वं यया बुद्ध्या युक्तः कर्म्मकृतं बन्धं प्रहास्यसि। आत्मानन्दलिप्सया भगवदाज्ञया महाप्रयासानि कर्म्माणि कुर्व्वंस्तत्तदुद्देशमहिम्ना त्वदन्तरभ्युदितयात्मज्ञाननिष्ठया संसारं तरिष्यसीति। पशुपुत्रराज्यादिफलकं कर्म्म सकामं ज्ञानफलकन्तु तन्निष्काममिति शास्त्रेऽस्मिन् परिभाष्यते ॥३९॥

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥४०॥

सारा०व०-अत्र योगो द्विविधः-श्रवणकीर्त्तनादिभक्तिरूपः, श्रीभगवदर्पितनिष्कामकर्म्मरूपश्च। तत्र 'कर्म्मण्येवाधिकारः' इत्यतः प्रागभक्तियोग एव निरूप्यते; 'निस्त्रैगुण्यो भवार्ज्जुन' इत्युक्तेर्भक्तेरेव त्रिगुणातीतत्वात् तयैव पुरुषो निस्त्रैगुण्यो भवतीत्येकादशस्कन्धे प्रसिद्धेः; ज्ञानकर्म्मणोस्तु सात्त्विकत्व-राजसत्वाभ्यां निस्त्रैगुण्यत्वानुपपत्तेर्भगवदर्पितलक्षणा भक्तिस्तु कर्म्मणो वैफल्याभावमात्रं प्रतिपादयति, न तु स्वस्य भक्तिव्यपदेशं प्राधान्याभावादेव। यदि च भगवदर्पितं कर्म्मापि भक्तिरेवेति मतम्, तदा कर्म्म किं स्यात्? यद्भगवदनर्पितं कर्म्म, तदेव कर्म्मेति चेन्न? "नैष्कर्म्यमप्यच्युतभाव-बर्ज्जितं, न शोभते ज्ञानमलं निरञ्जनम्। कुतः पुनः शश्वदभद्रमीश्वरे, न चार्पितं कर्म्म यदप्यकारणम् ॥" इति नारदोक्त्या तस्य वैयर्थ्यप्रतिपादनात्। तस्मादत्र भगवच्चरणमाधुर्य्यप्राप्तिसाधनीभूता केवलश्रवणकीर्त्तनादिलक्षणैव भक्तिर्निरूप्यते,यथा निष्काम-कर्म्मयोगोऽपि निरूपयितव्यः। उभावप्येतौ बुद्धियोगशब्दवाच्यौ ज्ञेयौ--'ददामि बुद्धियोगं तं येन

मामुपयान्ति ते' इति, 'दूरेण ह्यवरं कर्म्म बुद्धियोगाद्धनञ्जय' इति चोक्तेः। अथ निर्गुणश्रवणकीर्त्तनादि-भक्तियोगस्य माहात्म्यमाह--नेहेति । इह भक्तियोगेऽभिक्रमे आरम्भमात्रे कृतेऽप्यस्य भक्तियोगस्य नाशो नास्ति, ततः प्रत्यबायश्च न स्यात् । यथा कर्म्मयोगे आरम्भं कृत्वा कर्म्माननुष्ठितवतः कर्म्मनाशप्रत्यबायौ स्यातामिति भावः । ननु तर्हि तस्य भक्त्यनुष्ठातुकामस्य समुचितभक्त्यकरणात् भक्तिफलं तु नैव स्यात् , तत्राह--स्वल्पमिति । अस्य धर्म्मस्य स्वल्पमप्यारम्भसमये या किञ्चिन्मात्री भक्तिरभूत् , सापीत्यर्थः, महतो भयात् संसारात् त्रायत एव--"यन्नामसकृच्छ्रबणात् , पुक्कशोऽपि विमुच्यते संसारात्" इत्यादिश्रवणात् , अजामिलादौ तथा दर्शनाच्च । "न ह्यङ्गोपक्रमे ध्वंसो मद्धर्म्मस्योद्धवाण्वपि । मया व्यबसितः सम्यङ् निर्गुणत्वादनाशिषः ॥" इति भगवतो बाक्येन सहास्य बाक्यस्यैकार्थमेव दृश्यते । किन्तु तत्र निर्गुणत्वान्न हि गुणातीतं बस्तु कदाचित् ध्वस्तं भबतीति हेतुरुपन्यस्तः, स चेहापि द्रष्टव्यः। न च निष्कामकर्म्मणोऽपि भगवदर्पणमहिम्ना निर्गुणत्वमेवेति बाच्यम्--"मदर्पणं निष्फलं वा सात्त्विकं निजकर्म्म तत्" इति। बाक्येन तस्य सात्त्विकत्वोक्तेः ॥४०॥

गी०भू०—बक्ष्यमाणया बुद्ध्या युक्तं कर्म्मयोगं स्तौति—नेहेति । इह 'तमेतम'इत्यादि बाक्योक्तेः निष्कामकर्म्मयोगेऽभिक्रमस्यारम्भस्य फलोत्पादकत्वनाशो नास्ति । आरब्धस्यासमाप्तस्य बैफल्यं न भवतीत्यर्थः । मन्त्राद्यङ्गबैकल्ये च प्रत्यबायो न बिद्यते । आत्मोद्देशमहिम्ना "ॐ तत् सत्" इति भगवन्नाम्ना च तस्य बिनाशात् । इह भगवदर्पितस्य निष्कामकर्म्मलक्षणधर्म्मस्य किञ्चिदप्यनुष्ठितं सन् महतो भयात् संसारात् त्रायते अनुष्ठातारं रक्षति । बक्ष्यति च एवं पार्थ "नैवेह नामुत्र" इत्यादिना । काम्यकर्म्माणि सर्व्वाङ्गोपसंहारेणानुष्ठितान्युक्तफलाय कल्पन्ते , मन्त्राद्यङ्गवैकल्ये तु प्रत्यबायं जनयन्तीति । निष्कामकर्म्माणि तु यथाशक्त्यनुष्ठितानि ज्ञाननिष्ठालक्षणं फलं जनयन्त्येबोक्तहेतुतः प्रत्यबायं नोत्पादयन्तीति ॥४०॥

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥४१॥

सारा०व०--किञ्च, सर्व्वाभ्योऽपि बुद्धिभ्यो भक्तियोगबिषयिण्येब बुद्धिरुत्कृष्टेत्याह---व्यबसायेति । इह भक्तियोगे व्यवसायात्मिका बुद्धिरेकैव । मम श्रीमद्गुरूपदिष्टं भगवत्कीर्त्तनस्मरणचरणपरिचरणादिकमेतदेब मम साधनमेतदेब मम साध्यमेतदेव मम जीबातुः साधन-साध्य-दशयोस्त्यक्तुमशक्यमेतदेव मे काम्यमेतदेव मे कार्य्यमेतदन्यन्न मे कार्य्यं नाप्यभिलषणीयं स्वप्नेऽपीत्यत्र सुखमस्तु दुःखं बाग्तु संसारो नश्यतु वा न नश्यतु, तत्र मम कापि न क्षतिरित्येवं निश्चयात्मिका बुद्धिरकैतव-भक्तावेब सम्भवेत् , तदुक्तम्--"ततो भजेत मां भक्त्या श्रद्धालुर्दृढनिश्चयः" इति । ततोऽन्यत्र नैव बुद्धिरेकेत्याह-बहिति-बहवः शाखा यासां ताः । तथा हि कर्म्मयोगे कामानामानन्त्याद्बुद्धयोऽनन्ताः, तत्साधनानां कर्म्मणामानन्त्यात् तच्छाखा अप्यनन्ताः । तथैव ज्ञानयोगे प्रथममन्तःकरणशुद्ध्यर्थं निष्कामकर्म्मणि बुद्धिस्ततस्तस्मिन् शुद्धे सति कर्म्मसंन्यासे बुद्धिः, तदा ज्ञाने बुद्धिः ; ज्ञानवैफल्याभावार्थं भक्तौ बुद्धिः-'ज्ञानञ्च मयि संन्यसेत्' इति भगवदुक्तेर्ज्ञानसंन्यासे च भक्तौ बुद्धिरिति बुद्धयोऽनन्ताः । कर्म्मज्ञानभक्तीनामवश्यानुष्ठेयत्वात् तत्तच्छाखा अप्यनन्ताः ॥४१॥

गी०भू०—काम्य-कर्म-विषयकबुद्धितो निष्कामकर्मविषयक-

बुद्धेर्वैशिष्ट्यमाह व्यवसायेति । हे कुरुनन्दन इह वैदिकेषु सर्व्वेषु कर्मसु व्यवसायात्मिका भगवदर्च्चनरूपैर्निष्कामकर्मभिर्विशुद्धचित्तो विषोर्णादिवत् तदन्तर्गतेन ज्ञानेनात्मयाथात्म्यमहमनुभविष्यामीति निश्चयरूपा बुद्धिरेका एकविषयत्वात् । एकस्मै तदनुभवाय तेषां बिहितत्वादिति यावत् । अव्यवसायिनां काम्यकर्मानुष्ठातॄणां तु बुद्धयोऽनन्ताः । पश्वन्नपुत्रस्वर्गाद्यनन्तकामविषयत्वात् , तत्रापि बहुशाखाः । एकफलकेऽपि दर्शपौर्णमासादावायुः सुप्रजस्त्वाद्यवान्तरानेकफलाशंसाश्रवणात् । अत्र हि देहातिरिक्तात्मज्ञानमात्रमपेक्षते न तूक्तात्मयाथात्म्यं तन्निश्चये काम्यकर्मसु प्रवृत्तेरसम्भवात् ॥४१॥

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥४२॥
कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥४३॥

सारा०व०—तस्मादव्यवसायिनः सकामकर्म्मिणस्त्वतिमन्दा इत्याह—यामिमामिति । पुष्पितां बाचं पुष्पितां विषलतामिवापाततो रमणीयाम् , प्रवदन्ति प्रकर्षेण सर्व्वतः प्रकृष्टा इयमेव वेदवागिति ये बदन्ति, तेषां तया वाचा अपहृतचेतसाञ्च व्यवसायात्मिका बुद्धिर्न बिधीयते इति तृतीयेनान्वयः। तेषु तस्या असम्भवात् सा तेषु नोपदिश्यत इत्यर्थः । किमिति ते तथा बदन्ति, यतोऽबिपश्चितो मूर्खाः। तत्र हेतुः—बेदेषु येऽर्थवादाः- "अक्षय्यं वै चातुर्मास्ययाजिनः सुकृतं भवति", "अपाम सोमममृता अभूम" इत्याद्याः। अन्यदीश्वरतत्त्वं नास्तीति प्रजल्पिनस्ते कीदृशीं बाचं प्रवदन्ति ? जन्मकर्म्मफलप्रदायिनीं भोगै-

श्वर्य्यगतिं प्रति ये क्रियाविशेषास्तान् बहु यथा स्यात् तथा लाति ददाति प्रतिपादयतीति ताम् ॥४२–४३॥

गी०भू०—नन्वेषां व्यवसायात्मिका बुद्धिर्भवेत् श्रुतेस्तौल्यादिति चेच्चित्तदोषान्नभवेदित्याह यामिति त्रिभिः । अविपश्चितोऽल्पज्ञाः यामिमां ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिकां बाचं प्रवदन्ति इयमेव प्रकृष्टा वेदवागिति कल्पयन्ति। तया वाचापहृतचेतसां तेषां समाधौ मनसि व्यवसायात्मिका बुद्धिर्न विधीयते नाभ्युदेति इत्यनुषङ्गः। कीदृशीं वाचमित्याह—पुष्पितामिति। कुसुमितविषलतावदापातमनोज्ञां निष्फलामित्यर्थः। एवं कुतस्ते वदन्ति तत्राह वेदेति। वेदेषु ये वादाः "अपाम सोममसृता अभूम अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीत्या"द्योऽर्थवादास्तेष्वेव रताः वेदस्य सत्यभाषित्वादेवमेवैतदिति प्रतीतिमन्तः। अतएव नान्यदिति कर्म्मफलात् स्वर्गादन्यत् जीवांशिपरमार्थज्ञानं लभ्यं मोक्षलक्षणं निरतिशयं नित्यसुखं नास्ति। तत्प्रतिपादिकानां वेदान्त-वाचां कर्माङ्गकर्त्तृदेवतावेदकतया तच्छेषत्वादिति बदनशीला इत्यर्थः॥ ४२ ॥

गी०भू०—चित्तदोषमाह-कामात्मानः वैषयिकसुखवासनाग्रस्तचित्ताः। एवंचेत् तादृशं मोक्षं कुतो नेच्छन्ति तत्राह स्वर्गेति स्वर्ग एव सुधा—देवाङ्गनाद्युपेतत्वेन परः श्रेष्ठो येषां ते । तादृग्वासनाग्रस्तत्वात्तेषां नान्यद्भाषत इत्यर्थः। जन्म कर्मेति—जन्म च देहेन्द्रियसन्बन्धलक्षणं, तत्र कर्म च तत्तद्वर्णाश्रमविहितं, फलञ्च विनाशिपश्वन्नस्वर्गादि। तानि प्रकर्षेणाविच्छेदेन ददाति तां भोगैश्वर्य्ययोर्गतिं प्राप्तिं प्रति ये क्रियाविशेषा ज्योतिष्टोमादयस्ते बहुलाः प्रचुरा यत्र तां वाचं बदन्तीति पूर्व्वेणान्वयः। भोगः सुधापानदेवाङ्गनादिः, एश्वर्य्यञ्च देवादिस्वामित्वं तयोर्गतिमित्यर्थः ॥४३ ॥

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥४४॥

सारा०व०—ततश्च भोगैश्वर्ययोः प्रसक्तानां तया पुष्पितया वाचापहृतमाकृष्टं चेतो येषां ते तथा तेषां समाधिश्चित्तैकाग्र्यं परमेश्वरैकोन्मुखत्वं तस्मिन् निश्चयात्मिका बुद्धिर्न विधीयते—"कर्म्मकर्त्तरि प्रयोगो नोपपद्यते" इति स्वामिचरणाः ॥४४॥

गी०भू०—भोगेति–तेषां पूर्व्वोक्तयोर्भोगैश्वर्य्ययोः प्रसक्तानां क्षयित्वदोषास्फूर्त्त्या तयोरभिनिविष्टानां तया पुष्पितया वाचापहृतं विलुप्तं चेतो विवेकज्ञानं येषां तादृशानां समाधाविति योऽर्थम् । सम्यगाधीयतेऽस्मिन्नात्मतत्त्वयाथात्म्यमिति निरुक्तेः समाधिर्मनस्तस्मिन्नित्यर्थः ॥ ४४ ॥

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ॥४५॥

सारा०व०—त्वं तु चतुर्व्वर्गसाधनेभ्यो विरज्य केवलं भक्तियोगमेवाश्रयस्वेत्याह—त्रैगुण्येति । त्रैगुण्यास्त्रिगुणात्मिकाः कर्म्मज्ञानाद्याः प्रकाश्यत्वेन विषया येषां ते त्रैगुण्यविषया वेदाः—स्वार्थे ष्यञ्, एतच्च "भूम्ना व्यपदेशा भवन्ति" इति न्यायेनोक्तम् । किन्तु "भक्तिरेवैनं नयति" इति, "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ" इत्यादि-श्रुतयः पञ्चरात्रादिस्मृतयश्च गीतोपनिषद्-गोपालतापन्याद्युपनिषदश्च निर्गुणां भक्तिमपि विषयीकुर्व्वन्त्येव—वेदोक्तत्वाभावे भक्तेरप्रामाण्यमेव स्यात् । ततश्च वेदोक्ता ये त्रिगुणमया ज्ञानकर्म्मविधयस्तेभ्य एव निर्गतो भव तान् न कुरु । ये तु वेदोक्ता भक्तिविधयस्तांस्तु सर्व्वथैवानुतिष्ठ । तदनुष्ठाने "श्रुतिस्मृतिपुराणादिपञ्चरात्रविधिं विना । ऐकान्तिकी हरेर्भक्तिरुत्पातायैव कल्प्यते ॥" इति दोषो दुर्व्वार एव । तेन स-

गुणानां गुणातीतानामपि; वेदानां विषयास्त्रैगुण्या निस्त्रैगुण्याश्च । तत्र त्वं तु निस्त्रैगुण्यो भव । निर्गुणया मद्भक्त्यैव त्रिगुणात्मकेभ्यस्तेभ्यो निष्क्रान्तो भव; तत एव निर्द्वन्द्वो गुणमय-मानापमानादिरहितः, अतएव नित्यैः सत्त्वैः प्राणिभिर्मद्भक्तैरेव सह तिष्ठतीति तथा सः, नित्यं सत्त्वगुणस्थो भवेति व्याख्यायां निस्त्रैगुण्यो भवेति व्याख्यायां विरोधः स्यात् । अलब्धलाभो योगः, लब्धस्य रक्षणं क्षेमस्तद्रहितः । मद्भक्तिरसास्वादवशादेव तयोरननुसन्धानात्, 'योगक्षेमं वहाम्यहम्' इति भक्तवत्सलेन मयैव तद्भारवहनात् । आत्मवान् मद्दत्तबुद्धियुक्तः । अत्र निस्त्रैगुण्य-त्रैगुण्ययोर्विवेचनम्; यदुक्तमेकादशे—"मदर्पणं निष्फलं वा सात्त्विकं निजकर्म्म तत् । राजसं फलसङ्कल्पं हिंसाप्रायादि तामसम् ॥" निष्फलं वेति नैमित्तिकं निजकर्म्मफलाकाङ्क्षारहितमित्यर्थः । "कैवल्यं सात्त्विकं ज्ञानं रजो वैकल्पिकञ्च यत् । प्राकृतं तामसं ज्ञानं मन्निष्ठं निर्गुणं स्मृतम् ॥ वनन्तु सात्त्विको वासो ग्रामो राजस उच्यते । तामसं द्यूतसदनं मन्निकेतन्तु निर्गुणम् ॥ सात्त्विकः कारकोऽसङ्गी रागान्धो राजसः स्मृतः । तामसः स्मृतिविभ्रष्टो निर्गुणो मदपाश्रयः ॥ सात्त्विक्याध्यात्मिकी श्रद्धा कर्म्मश्रद्धा तु राजसी । तामस्यधर्म्मे या श्रद्धा मत्सेवायान्तु निर्गुणा ॥ पथ्यं पूतमनायस्तमाहार्य्यं सात्त्विकं स्मृतम् । राजसं चेन्द्रिय-प्रेष्ठं तामसं चार्त्तिदाशुचि ॥" "च-कारान्मन्निवेदितन्तु निर्गुणम्" इति श्रीस्वामिचरणानां व्याख्यानम् । "सात्त्विकं सुखमात्मोत्थं विषयोत्थन्तु राजसम् । तामसं मोह-दैन्योत्थं निर्गुणं मदपाश्रयम् ॥" इत्यन्तेन ग्रन्थेन त्रैगुण्यवस्तून्यपि प्रदर्श्य निर्गुणस्य सम्यङ् निस्त्रैगुण्यतासिद्ध्यर्थं निर्गुणयैव भक्त्या स्वस्मिन् कथञ्चित् स्थितस्य त्रैगुण्यस्य निर्जयोऽप्युक्तस्तदनन्तरमेव; यथा—"द्रव्यं देशस्तथा कालो ज्ञानं कर्म्म च

कारकः। श्रद्धावस्थाकृतिर्निष्ठा त्रैगुण्यः सर्व्व एव हि ॥ सर्व्वे गुणमया भावाः पुरुषाव्यक्तधिष्ठिताः। दृष्टं श्रुतमनुध्यातं बुद्ध्या वा पुरुषर्षभ ॥ एताः संसृतयः पुंसो गुणकर्म्मनिबन्धनाः। येनेमे निर्जिताः सौम्य गुणा जीवेन चित्तजाः। भक्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते ॥" इति। तस्माद्भक्त्यैव निर्गुणया त्रैगुण्यजयो नान्यथा। अत्राप्यग्रे 'कथं चैतांस्त्रीन् गुणानतिवर्त्तते' इति प्रश्ने वक्ष्यते—"माञ्च योऽव्यभिचारेण भक्तियोगेन सेवते। स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥" इति। श्रीस्वामिचरणानां व्याख्या च—"च—कारोऽत्रावधारणार्थः; मामेव परमेश्वरमव्यभिचारेण भक्तियोगेन यः सेवते" इत्येषा ॥४५॥

गी०भू०—ननु फलनैरपेक्ष्येण कर्माणि कुर्व्वाणानपि तानि स्वफलैर्योजयेयुस्तत् स्वाभाव्यात्ततः कथं तद्बुद्धेः सम्भव इति चेत्तत्राह त्रैगुण्येति। त्रयाणां गुणानां कर्म त्रैगुण्यम्। "गुणवचनब्राह्मणादिभ्यः कर्मणि चे"ति सूत्रात् ष्यञ्—सकामत्वमित्यर्थः। तद्विषया वेदाः—कर्मकाण्डानि त्वं तु तच्छिरोभूतवेदान्तनिष्ठो निस्त्रैगुण्यो निष्कामो भव। अयमर्थः :— पितृकोटिवत्सलो हि वेदोऽनादिभगवद्विमुखान्मायागुणैर्निबद्धांस्तद्गुणसृष्टसात्त्विकादि सुखसक्तान् प्रति तत्कामाननुरुध्य फलानि प्रकाशयन् स्वस्मिंस्तान् विश्रम्भयति। तद्विश्रम्भेण तत्परिशीलिनस्ते तन्मूर्द्धभूतोपनिषत्प्रतीतयाथात्म्यनिश्चयेन तां बुद्धिं यान्तीति न चाकामितान्यपि तान्यापतेयुः कामितानामेव तेषां फलत्वश्रवणात्। न च सर्व्वेषां वेदानां त्रैगुण्यविषयत्वं निस्त्रैगुण्यतायां अप्रामाणिकत्वापत्तेः। ननु शीतोष्णादिनिवारणाय वस्त्रादेः काम्यत्वात् कथं निष्कामत्वं तत्राह निर्द्वन्द्व इति। मात्रास्पर्शास्तु कौन्तेयेत्यादि विमर्शेन द्वन्द्वसह भव। तत्र हेतुर्नित्येति। नित्यं यत् सत्त्वमपरिणामित्वं जीवनिष्ठं तत्-

स्थस्तद्विभाव्येत्यर्थः। तत एव निर्योगक्षेमः। अलब्धलाभो योगः, लब्धस्य परिरक्षणं क्षेमं तद्रहितो भवेत्यर्थः। ननु क्षुत् पिपासे तथापि बाधिके इति चेत्तत्राह आत्मवानिति। आत्मा विश्वम्भरः परमात्मा स यस्य ध्येयतयास्ति तादृशो भवेत्यर्थः, स ते देहयात्रां सम्पादयेदित्यर्थः ॥ ४५ ॥

यावानर्थ उदपाने सर्वतः संप्लुतोदके।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥४६॥

सारा०व०—हन्त, किं वक्तव्यं निष्कामस्य निर्गुणस्य भक्तियोगस्य माहात्म्यं यस्यैवारम्भणमात्रेऽपि नाशप्रत्यवायौ न स्तः। स्वल्पमात्रेणापि कृतार्थतेत्येकादशेऽप्युद्धवायापि वक्ष्यते—"न ह्यङ्गोपक्रमे ध्वंसो मद्धर्म्मस्योद्धवाण्वपि। मया व्यवसितः सम्यङ्निर्गुणत्वादनाशिषः ॥" इति। किन्तु सकामो भक्तियोगोऽपि व्यवसायात्मिक-बुद्धि-शब्देनोच्यते इति दृष्टान्तेन साधयति—यावानिति। उदपान इति जात्यैकवचनम्—उदपानेषु कूपेषु; यावानर्थ इति कश्चित् कूपः शौचकर्म्मार्थकः, कश्चित् दन्तधावनार्थकः, कश्चिद्वस्त्रधावनाद्यर्थकः, कश्चित् केशादिमार्ज्जनार्थकः, कश्चित् स्नानार्थकः, कश्चित् पानार्थक इत्येवं सर्व्वतः सर्व्वेषूदपानेषु यावानर्थो यावन्ति प्रयोजनानीत्यर्थः। संप्लुतोदके महाजलाशये सरोवरेऽपि तावानेवार्थः—तस्मिन् एकस्मिन्नेव शौचादिकर्म्मसिद्धेः। किञ्च, तत्तत्कूपेषु पृथक् पृथक् परिभ्रमणश्रमेण, सरोवरे तु तं विनैव; तथा कूपेषु विरस-जलेन, सरोवरे तु सुरस-जलेनैवेत्यपि विशेषो द्रष्टव्यः। एवं सर्व्वेषु वेदेषु तत्तद्देवताराधनेन यावन्तोऽर्थास्तावन्त एकस्य भगवदाराधनेन विजानतो विज्ञस्य ब्राह्मणस्येति ब्रह्म वेदं वेत्तीति ब्राह्मणस्तस्य विजानतो वेदज्ञत्वेऽपि वेदतात्पर्य्यं भक्तिं विशेषतो जानतः; यथा द्वितीय-

स्कन्धे—"ब्रह्मवर्च्चसकामस्तु यजेत ब्रह्मणः पतिम । इन्द्रमिन्द्रियकामस्तु प्रजाकामः प्रजापतीन् ॥ देवीं मायान्तु श्रीकामः" इत्याद्युक्त्वा "अकामः सर्व्वकामो वा मोक्षकाम उदारधीः। तीव्रेण भक्तियोगेन यजेत पुरुषं परम ।।" इति मेघाद्यमिश्रस्य सौरकिरणस्य तीव्रत्वमिव भक्तियोगस्य ज्ञानकर्म्माद्यमिश्रत्वं तीव्रत्वं ज्ञेयम् । अत्र बहुभ्यो बहुकामसिद्धिरिति सर्व्वथा बहुबुद्धित्वमेव । एकस्माद्भगवत एव सर्व्वकामसिद्धिरित्यंशेनैकबुद्धित्वादेकबुद्धित्वमेव बिषयसाद्गुण्याज्ज्ञेयम् ॥४६॥

गी०भू०—ननु सर्व्वान् वेदानधीयानस्य बहुकालव्ययाद्बहुविक्षेपसम्भवाच्च कथं तद्बुद्धेरभ्युदयस्तत्राह—यावानिति । सर्व्वतः संप्लुतोदकेति । विस्तीर्णे उदपाने जलाशये स्नानाद्यर्थिनो यावान् स्नानपानादिरर्थः प्रयोजनं तावानेव स तेन तस्मात् संपद्यते । एवं सर्व्वेषु सोपनिषत्सु वेदेषु ब्राह्मणस्य वेदाध्यायिनो विजानत आत्मयाथात्म्यज्ञानं लब्धुकामस्य यावान् तज्ज्ञानसिद्धिलक्षणोऽर्थः स्यात्तावानेव तेन तेभ्यः संम्पाद्यते इत्यर्थः । तथाच स्वशाखयैव सोपनिषदाचिरेणैव तत् सिद्धौ तद्बुद्धिरभ्युदियादेवेति । इह दार्ष्टान्तिकेऽपि यावांस्तावानिति पदद्वयमनुषञ्जनीयम् ॥ ४६ ॥

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥४७॥

सारा०व०—एवमेकमेवार्ज्जुनं स्वप्रियसखं लक्ष्यीकृत्य ज्ञानभक्तिकर्म्मयोगानाचिख्यासुर्भगवान् ज्ञानभक्तियोगौ प्रोच्य तयोरर्ज्जुनस्यानधिकारः बिमृष्य निष्कामकर्म्मयोगमाह-कर्म्मणीति । मा फलेष्विति—फलाकाङ्क्षिणोऽप्यत्यन्ताशुद्धचित्ता भवन्ति ; त्वन्तु प्रायः शुद्धचित्त इति मया ज्ञात्वैबोच्यस इति भावः ।

ननु कर्म्मणि कृते फलमवश्यं भविष्यत्येवेति ? तत्राह—मा कर्म्मफलहेतुर्भूः फलकामनया हि कर्म्म कुर्व्वन् फलस्य हेतुरुत्पादको भवति ; त्वन्तु तादृशो मा भूरित्याशीर्मया दीयत इत्यर्थः । अकर्म्मणि स्वधर्म्माकरणे बिकर्म्मणि पापे वा सङ्गस्तव मास्तु, किन्तु द्वेष एवास्त्विति पुनरप्याशीर्दीयत इति । अत्राग्रिमाध्याये—"व्यामिश्रेणैव वाक्येन बुद्धिं मोहयसीव मे" इत्यर्ज्जुनोक्तिदर्शनादत्राध्याये पूर्व्वोत्तरबाक्यानामवतारिकाभिर्नातीव सङ्गतिर्विधित्सितेति ज्ञेयम् । किन्तु त्वदाज्ञायां सारथ्यादौ यथाहं तिष्ठामि, तथा त्वमपि मदाज्ञायां तिष्ठेति कृष्णार्ज्जुनयोर्मनोऽनुलापोऽयमत्र द्रष्टव्यः ॥४७॥

गी०भू०—ननु कर्मभिर्ज्ञानसिद्धिरिष्यते चेत्तर्हि तस्य शमादीन्येवान्तरङ्गत्वादनुष्ठेयानि सन्तु किं बहु प्रयासैस्तैरिति चेत्तत्राह-कर्मण्येवेति ; जातावेकवचनम । ते तव स्वधर्म्मेऽपि युद्धेऽधर्मबुद्धेरशुद्धचित्तस्य तावत् कर्मस्वेव युद्धादिष्वधिकारोऽस्तु मयैतानि कर्त्तव्यानीति तत् फलेषु बन्धकेषु तवाधिकारो मास्तु मयैतानि भोक्तव्यानीति । ननु फलेच्छाविरहेऽपि तानि स्वफलैर्योजयेयुरिति चेत्तत्राह मा कर्मेति । कर्मफलानां हेतुरुत्पादकस्त्वं माभूः कामनया कृतानि तानि स्वफलैर्योजयन्ति कामितानामेव फलानां नियोज्यविशेषणत्वेन फलत्वाम्नातात् । अतएव बन्धकानि फलानि आपतिष्यन्तीति भयादकर्म्मणि कर्म्माकरणे तव सङ्गः प्रीतिर्मास्तु किन्तु बिद्वेष एवास्त्वित्यर्थः । निष्कामतयानुष्ठितानि कर्म्माणि यष्टिधान्यवदन्तरेव ज्ञाननिष्ठां निष्पादयिष्यन्ति—शमादीनि तु तत्पृष्ठलग्नान्येव स्युरिति भावः ॥४७॥

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥४८॥

सारा०व०—निष्कामकर्म्मणः प्रकारं शिक्षयति—योगस्थ इति । तेन जयाजययोस्तुल्यबुद्धिः सन् संग्राममेव स्वधर्म्मं कुर्व्विति भावः । अयं निष्कामकर्म्मयोग एव ज्ञानयोगत्वेन परिणमतीति । ज्ञानयोगोऽप्येवं पूर्व्वोत्तरग्रन्थार्थतात्पर्य्यतो ज्ञेयः ॥४८॥

गी०भू०—पूर्व्वोक्तं विशदयति—योगस्थ इति । त्वं सङ्गं फलाभिलाषं कर्त्तृत्वाभिनिवेशं च त्यक्त्वा योगस्थः सन् कर्म्माणि कुरु युद्धादीनि । आद्येन मायानिमज्जनमेव ; द्वितीयेन तु स्वातन्त्र्यलक्षणपरेशधर्म्मचौर्य्यं, तेन तन्माया-व्याकोपः—अतस्तयोः परित्याग इति भावः । योगस्थपदं विवृणोति—सिद्ध्यसिद्ध्योरिति । तदनुषङ्गफलानां जयादीनां सिद्धावसिद्धौ च समो भूत्वा रागद्वेषरहितः सन् कुरु । इदमेव समत्वं मया योगस्थ इत्यत्र योगशब्देनोक्तं, चित्तसमाधानरूपत्वात् ॥४८॥

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥४९॥

सारा०व०—सकामकर्म्म निन्दति—दूरेणेति । अवरमतिनिकृष्टं काम्यं कर्म्म ; बुद्धियोगात् परमेश्वरार्पित-निष्कामकर्म्मयोगात् । बुद्धौ निष्कामकर्म्मण्येव, बुद्धियोगो निष्कामकर्म्मयोगः ॥४९॥

गी०भू०—अथ काम्यकर्म्मणो निकृष्टत्वमाह—दूरेणेति । बुद्धियोगादवरं कर्म्म दूरेण, हे धनञ्जय, आत्मयाथात्म्यबुद्धिसाधनभूतान्निष्कामकर्म्मयोगात् दूरेणातिविप्रकर्षेणावरमत्यपकृष्टं जन्ममरणाद्यनर्थनिमित्तं काम्यं कर्म्मेत्यर्थः । हि यस्मादेवमतस्त्वं बुद्धौ तद्याथात्म्यज्ञाने निमित्ते शरणमाश्रयं निष्कामकर्म्मयोगमन्विच्छ कुरु । ये तु फलहेतवः फलकामा अवरकर्म्मकारिणस्ते कृपणास्तत्फलजन्मकर्म्मादिप्रवाहपरवशा दीना इत्यर्थः । तथा च

त्वं कृपणो माभूरिति इह कृपणाः खलु कष्टोपार्जितवित्तादृष्टसुखलवलुब्धा वित्तानि दातुमसमर्था महता दानसुखेन वञ्चितास्तथा कष्टानुष्ठितकर्म्माणस्तुच्छतत्फललुब्धा महतात्मसुखेन वञ्चिता भवन्तीति व्यज्यते ॥४९॥

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥५०॥

सारा०व०—योगायोक्तलक्षणाय युज्यस्व घटस्व ; यतः कर्म्मसु सकाम-निष्कामेषु मध्ये योग एवोदासनित्वेन कर्म्मकरणमेव । कौशलं नैपुण्यमित्यर्थः ॥५०॥

गी०भू०—उक्तस्य बुद्धियोगस्य प्रभावमाह—बुद्धीति । इह कर्म्मसु यो बुद्धियुक्तः प्रधानफलत्यागविषयानुषङ्गफलसिद्ध्यसिद्धिसमत्वविषयया च बुद्ध्या युक्तस्तानि करोति, स उभे अनादिकालसञ्चिते ज्ञानप्रतिबन्धके सुकृतदुष्कृते जहाति विनाशयतीत्यर्थः । तस्मादुक्ताय बुद्धियोगाय युज्यस्व त्वं घटस्व । यस्मात् कर्म्मयोगस्तादृशबुद्धिसम्बन्धः । कौशलं चातुर्य्यम—बन्धकानामेव बुद्धिसम्पर्काद्विशोधित-विषपारदन्यायेन मोचकत्वेन परिणामात् ॥५०॥

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥५१॥

गी०भू०—कर्म्मजमिति । बुद्धियुक्तास्तादृशबुद्धिमन्तः कर्म्मजं फलं त्यक्त्वा कर्म्माण्यनुतिष्ठन्तो मनीषिणः कर्म्मान्तर्गतात्मयाथात्म्यप्रज्ञावन्तो भूत्वा जन्मबन्धेन विनिर्म्मुक्ताः सन्तोऽनामयं क्लेशशून्यं पदं वैकुण्ठं गच्छन्तीति । तस्मात्त्वमपि श्रेयो जिज्ञासुरेवं विधानि कर्म्माणि कुर्व्विति भावः । स्वात्मज्ञानस्य परमात्मज्ञानहेतुत्वात् तस्यापि तत्पदगतिहेतुत्वं युक्तम् ॥५१॥

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥५२॥

सारा०व०—एवं परमेश्वरार्पित-निष्कामकर्म्माभ्यासात् तव योगो भबिष्यतीत्याह—यदेति । तव बुद्धिरन्तःकरणं मोहकलिलं मोहरूपं गहनं बिशेषतोऽतिशयेन तरिष्यति, तदा श्रोतव्यस्य श्रोतव्येष्वर्थेषु श्रुतस्य श्रुतेऽप्यर्थेषु निर्व्वेदं प्राप्स्यसि असम्भावना-बिपरीतभावनयोर्नष्टत्वात् किं मे शास्त्रोपदेशबाक्यश्रवणेन ? साम्प्रतं मे साधनेष्वेव प्रतिक्षणमभ्यासः सर्व्वथोचित इति मंस्यस इति भावः ॥५२॥

गी०भू०—ननु निष्कामाणि कर्म्माणि कुर्व्वतो मे कदात्मविषया मनीषाभ्युदियादिति चेत् तत्राह—यदेति । यदा ते बुद्धिरन्तःकरणं मोहकलिलं तुच्छफलाभिलाषहेतुमज्ञानगहनं व्यतितरिष्यति परित्यक्ष्यतीत्यर्थः, तदा पूर्व्वं श्रुतस्यानन्तरं श्रोतव्यस्य च तस्य तुच्छफलस्य सम्बन्धिनं निर्व्वेदं गन्तासि गमिष्यसि "परीक्ष्य लोकान् कर्म्मचितान् ब्राह्मणो निर्व्वेदमायात्" इति श्रवणात् । निर्व्वेदेन फलेन तद्विषयां तां परिचेष्यति इति नास्त्यत्र कालनियम इत्यर्थः ॥५२॥

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥५३॥

सारा०व०—ततश्च श्रुतिषु नाना-लौकिक-वैदिकार्थश्रवणेषु बिप्रतिपन्नाऽसम्मता बिरक्तेति यावत् । तत्र हेतुः—निश्चला तेषु तेष्वर्थेषु चलितुं बिमुखीभूतेत्यर्थः । किन्तु समाधौ षष्ठेऽध्याये बक्ष्यमाण-लक्षणेऽचला स्थैर्य्यबती ; तदा योगमपरोक्षानुभबप्राप्त्या, जीबन्मुक्त इत्यर्थः ॥५३॥

गी०भू०—ननु कर्म्मफलानिर्व्विण्णतया कर्म्मानुष्ठानेन लब्धहृद्विशुद्धेरभ्युदितात्मज्ञानस्य मे कदात्मसाक्षात्कृतिरिति चेत्राह—श्रुतीति । श्रुत्या कर्म्मणां ज्ञानगर्भतां प्रबोधयन्त्या "तमेतम्" इत्यादिकया बिप्रतिपन्ना बिशेषेण संसिद्धा ते बुद्धिरचला असम्भावनाबिपरीतभावनाभ्यां बिरहिता यदा समाधौ मनसि निर्व्वातदीपशिखेव निश्चला स्थास्यति, तदा योगमात्मानुभवलक्षणमबाप्स्यसि । अयमर्थः—फलाभिलाषशून्यतयानुष्ठितानि कर्म्माणि स्थितप्रज्ञतारूपां ज्ञाननिष्ठां साधयन्ति, ज्ञाननिष्ठारूपा स्थितप्रज्ञता स्वात्मानुभबमिति ॥५३॥

अर्जुन उवाच—

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत ब्रजेत किम् ॥५४॥

सारा०व०—समाधावचला बुद्धिरिति श्रुत्वा तत्त्वतो योगिनो लक्षणं पृच्छति—स्थितप्रज्ञस्येति ; स्थिता स्थिराऽचला प्रज्ञा बुद्धिर्यस्येति । का भाषा ?—भाष्यतेऽनयेति भाषा लक्षणं कि लक्षणमित्यर्थः । कीदृशस्य समाधिस्थस्येति समाधौ स्थास्यतीति । अस्यार्थः—एबञ्च स्थितप्रज्ञ इति, समाधिस्थ इति जीबन्मुक्तस्य संज्ञाद्वयम् । किं प्रभाषेतेति सुखदुःखयोर्मानापमानयोः स्तुतिनिन्दयोः स्नेहद्वेषयोर्बा समुपस्थितयोः किं प्रभाषेत ?—स्पष्टं स्वगतं वा किं बदेदित्यर्थः । किमासीत ?—तदिन्द्रियाणां बाह्यबिषयेषु चलनाभावः कीदृशः ? ब्रजेत किम्—तेषु चलनं वा कीदृशमिति ॥५४॥

गी०भू०—एवमुक्तोऽर्जुनः पूर्व्वपद्योक्तस्य स्थितप्रज्ञस्य लक्षणं ज्ञातुं पृच्छति—स्थितेति । स्थितप्रज्ञेऽत्र चत्वारः प्रश्नाः—समाधिस्थे एकः, व्युत्थिते तु त्रयः । तथा हि स्थिता स्थिरा प्रज्ञा

धीर्यस्य तस्य समाधिस्थस्य का भाषा किं लक्षणम् ? भाष्यतेऽनयेतिव्युत्पत्तेः, केन लक्षणेन स्थितप्रज्ञोऽभिधीयत इत्यर्थः । तथा व्युत्थितः स्थितप्रज्ञः कथं भाषणादीनि कुर्य्यात् ?—तदीयानि तानि पृथग्जनविलक्षणानि कीदृशानीत्यर्थः । तत्र किं प्रभाषेत ? स्वयोः स्तुतिनिन्दयोः स्नेहद्वेषयोश्च प्राप्तयोर्मुखतः स्वगतं वा किं ब्रूयात् ? किमासीत बाह्यविषयेषु कथमिन्द्रियाणां निग्रहं कुर्य्यात् ? व्रजेत किम् ? किं तन्निग्रहाभावे च कथं विषयानवाप्नुयादित्यर्थः । त्रिषु सम्भावनायां लिङ् ॥ ५४ ॥

श्रीभगवानुवाच—

प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥५५॥

सारा०व०—चतुर्णां प्रश्नानां क्रमेणोत्तरमाह—प्रजहातीति यावदध्यायसमाप्ति । सर्व्वानिति कस्मिन्नप्यर्थे यस्य किञ्चिन्मात्रोऽपि नाभिलाष इत्यर्थः । मनोगतानिति कामानामनात्म-धर्म्मत्वेन परित्यागे योग्यता दर्शिता । यदि ते ह्यात्मधर्म्माः स्युस्तदा तांस्त्यक्तुमशक्येरन् वह्नेरौष्ण्यवदिति भावः । तत्र हेतुः—आत्मनि प्रत्याहृते मनसि प्राप्तो य आत्मानन्दरूपस्तेन तुष्टः । तथा च श्रुतिः—"यदा सर्व्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः । अथ मर्त्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥" इति ॥५५॥

गी०भू०—एवं पृष्टो भगवान् क्रमेण चतुर्णामुत्तरमाह यावदध्यायपूर्त्तिः । तत्र प्रथमस्याह प्रजहातीत्येकेन । हे पार्थ यदा मनोगतान् मनसि स्थितान् कामान् सर्व्वान् प्रजहाति संत्यजति तदा स्थितप्रज्ञ उच्यते । कामानां मनोधर्मत्वात् परित्यागो युक्तः, आत्मधर्मत्वे दुःशकत्यः स स्याद्वह्नेरुष्णतादीनामिवेतिभावः । ननु शुष्ककाष्ठवत् कथं तिष्ठतीति चेत्तत्राह—आत्मन्येवेति ।

आत्मनि प्रत्याहृते मनसि भासमानेन स्वप्रकाशानन्दरूपेणात्मना स्वरूपेण तुष्टः परितृप्तः क्षुद्रविषयाभिलाषान् संत्यज्यात्मानन्दारामः समाधिस्थः स्थितप्रज्ञ इत्यर्थः । "आत्मा पुंसि स्वभावेऽपि प्रयत्नमनसोरपि । धृतावपि मनीषायां शरीरब्रह्मणोरपी"ति मेदिनीकारः । ब्रह्म चात्र जीवेश्वरान्यतरद्ग्राह्यम ॥ ५५ ॥

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्म्मुनिरुच्यते ॥५६॥

सारा०व०—किं प्रभाषेतेत्यस्य उत्तरमाह—दुःखेषु क्षुत्पिपासा-ज्वर-शिरोरोगादिष्वाध्यात्मिकेषु सर्पव्याघ्राद्युत्थितेष्वाधिभौतिकेष्वतिवातवृष्ट्याद्युत्थितेष्वाधिदैविकेषूपस्थितेष्वनुद्विग्नमनाः प्रारब्धं दुःखमिदं मयाऽवश्यं भोक्तव्यमिति स्वगतं केनचित् पृष्टः सन् स्पष्टञ्च ब्रुवन्, न दुःखेषूद्विजत इत्यर्थः । तस्य तादृशमुखविक्रियाभाव एवानुद्वेगलिङ्गं सुधिया गम्यम्, कृत्रिमानुद्वेगलिङ्गवांस्तु कपटी—सुधिया परिचितो भ्रष्ट एवोच्यत इति भावः । एवं सुखेष्वप्युपस्थितेषु विगतस्पृह इति प्रारब्धमिदमवश्यभोग्यमिति स्वगतं स्पष्टञ्च ब्रुवाणस्य तस्य सुखस्पृहाराहित्यलिङ्गं सुधिया गम्यमेवेति भावः । तत्तल्लिङ्गमेव स्पष्टीकृत्य दर्शयति—वीतो विगतो रागोऽनुरागः सुखेषु, वीतं भयं स्वभोक्तृभ्यो व्याघ्रादिभ्यो वीतः क्रोधः स्वहन्तृषु बन्धुजनेषु यस्य सः । यथैवादि-भरतस्य देव्याः पार्श्वं प्रापितस्य स्वच्छेदचिकीर्षोर्वृषलराजान्न भयम्, नापि तत्र क्रोधोऽभूदिति ।.५६॥

गी०भू०—अथ व्युत्थितः स्थितप्रज्ञः किं भाषेतेत्यस्योत्तरमाह दुःखेष्विति द्वाभ्याम् । त्रिविधेष्वाध्यात्मिकादिषु दुःखेषु समुत्थितेषु सत्सु अनुद्विग्नमनाः प्रारब्धफलान्यमुनि मयावश्यं भोक्तव्यानीति केनचित् पृष्टः स्वगतं वा ब्रुवन् तेभ्यो नोद्विजत

इत्यर्थः । सुखेषु चोत्तमाहारसत्कारादिना समुपस्थितेषु विगतस्पृहस्तृष्णाशून्यः प्रारब्धाकृष्टान्यमुनि मयावश्यं भोक्तव्यानीति केनचित् पृष्टः स्वगतं वा ब्रुवन् तैरुपस्थितैः प्रहृष्टमुखो न भवतीत्यर्थः । वीतेति--वीतरागः कमनीयेषु प्रीतिशून्यः, वीतभयः विषयापहर्तृषु प्राप्तेषु दुर्व्वलस्य ममैतानि धर्म्म्यैर्भवद्भिर्ह्रियन्त इति दैन्यशून्यः, वीतक्रोधः तेष्वेव प्रवलस्य ममैतानि तुच्छैर्भवद्भिः कथमपहर्त्तव्यानीति क्रोधशून्यश्च । एवम्विधो मुनिरात्ममननशीलः स्थितप्रज्ञ इत्यर्थः । इत्थं स्वानुभवं परान प्रति स्वगतं वा वदन्ननुद्वेगो निस्पृहतादिवचः प्रभाषते इत्युत्तरम् ॥ ५६ ॥

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥५७॥

सारा०व०--अनभिस्नेहः सोपाधिस्नेहशून्यो दयालुत्वान्निरुपाधिरीषन्मात्रस्नेहस्तु तिष्ठेदेव । तत्तत्प्रसिद्धं सम्मान-भोजनादिभ्यः स्वपरिचरणं शुभं प्राप्याशुभमनादरणं मुष्टिप्रहारादिकञ्च प्राप्य क्रमेण नाभिनन्दति, न प्रशंसति—त्वं धार्म्मिकः परमहंस-सेवी सुखी भवेति न ब्रुते, न द्वेष्टि—त्वं पापात्मा नरके पतेति नाभिशपति, तस्य प्रज्ञा प्रतिष्ठिता—समाधि प्रति स्थिता, सुस्थितप्रज्ञा उच्यत इत्यर्थः ॥५७॥

गी०भू०--य इति सर्वेषु प्राणिषु अनभिस्नेह औपाधिकस्नेहशून्यः । कारुणिकत्वान्निरुपाधिरीषत्स्नेहस्त्वस्त्येव । तत्तत् प्रसिद्धं शुभमुत्तमभोजनस्रक् चन्दनार्पणरूपं प्राप्य नाभिनन्दति तदर्पकं प्रति धर्मिष्ठस्त्वं चिरञ्जीवेति न वदति । अशुभमपमानं यष्टिप्रहारादिकञ्च प्राप्य न द्वेष्टि, पापिष्ठस्त्वं म्रियस्वेति नाभिशपति । तस्य प्रज्ञेति--स स्थितप्रज्ञ इत्यर्थः । अत्र स्तुति-निन्दा-रूपं बचो न भाषत इति व्यतिरेकेण तल्लक्षणम ॥ ५७ ॥

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥५८॥

सारा०व०—किमासीतेत्यस्योत्तरमाह--यदेति । इन्द्रियार्थेभ्यः शब्दादिभ्य इन्द्रियाणि श्रोत्रादीनि संहरते । स्वाधीनानामिन्द्रियाणां वाह्यविषयेषु चलनं निषिध्यान्तरेव निश्चलतया स्थापनं स्थितप्रज्ञस्यासनमित्यर्थः । तत्र दृष्टान्तः--कूर्म्मोऽङ्गानि मुखनेत्रादीनि यथा स्वान्तरेव स्वेच्छया स्थापयति ॥५८॥

गी०भू०—अथ किमासीतेत्यस्योत्तरं यदेत्यादिभिः षड्भिराह । अयं योगी यदा चेन्द्रियार्थेभ्यः शब्दादिभ्यः स्वाधीनानीन्द्रियाणि श्रोत्रादीन्यनायासेन संहरति समाकर्षति तदा तस्य प्रज्ञा प्रतिष्ठितेत्यन्वयः । अत्र दृष्टान्तः कूर्म्मोऽङ्गानीवेति । मुखकरचरणानि यथानायासेन कमठः संहरति तद्वत् विषयेभ्यः समाकृष्टेन्द्रियानामन्तःस्थापनं स्थितप्रज्ञस्यासनम् ॥ ५८ ॥

विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्ज्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥५९॥

सारा०व०--ननु मूढ़स्याप्युपवासतो रोगादि-वशाद्वेन्द्रियाणां विषयेष्वचलनं सम्भवेत्तत्राह--विषया इति । रसवर्ज्जं रसो रागोऽभिलाषस्तं वर्जयित्वा--अभिलाषन्तु विषयेषु न निवर्त्तत इत्यर्थः । अस्य स्थितप्रज्ञस्य तु परं परमात्मानं दृष्ट्वा विषयेष्वभिलाषो निवर्त्तत इति न लक्षणव्यभिचारः । आत्मसाक्षात्कारसमर्थस्य तु साधकत्वमेव, न तु सिद्धत्वमिति भावः ॥५९॥

गी०भू०—ननु मूढ़स्यामयग्रस्तस्य विषयेष्विन्द्रियाप्रवृत्तिर्दृष्टा तत् कथमेतत् स्थितप्रज्ञस्य लक्षणं तत्राह विषया इति । निराहारस्य रोगभयाद्भोजनादीन्यकुर्व्वतो मूढ़स्यापि देहिनो जनस्य विषयास्तदनुभवा विनिवर्त्तन्ते । किन्तु रसो रागस्तृष्णा तद्वर्जं

विषयतृष्णा तु न निवर्त्तत इत्यर्थः। अस्य स्थितप्रज्ञस्य तु रसोऽपि विषयरागोऽपि विषयेभ्यः परं स्वप्रकाशानन्दमात्मानं दृष्ट्वानुभूय निवर्त्तते विनश्यतीति सराग-विषय-निवृत्तिस्तस्य लक्षणमिति न व्यभिचारः ॥ ५९ ॥

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः॥६०॥

सारा०व०--साधकावस्थायान्तु यत्न एव महान् , न त्विन्द्रियाणि परावर्त्तयितुं सर्व्वथा शक्तिरित्याह--यतत इति । प्रमाथीनि प्रमथनशीलानि क्षोभकराणीत्यर्थः ॥६०॥

गी०भू०—अथास्या ज्ञाननिष्ठया दौर्ल्लभ्यमाह यतत हीति । विपश्चितो विषयात्मस्वरूपविवेकज्ञस्य तत इन्द्रियजये प्रयतमानस्यापि पुरुषस्य इन्द्रियाणि श्रोत्रादीनि कर्तृणि मनः प्रसभं बलादिव हरन्ति । हृत्वा विषय-प्रवणं कुर्व्वन्तीत्यर्थः । ननु विरोधिनि विवेकज्ञाने स्थिते कथं हरन्ति तत्राह प्रमाथीनीति - अति बलिष्ठत्वात्तज्ज्ञानोपमर्द्दनक्षमाणीत्यर्थः । तस्मात् चौरेभ्यो महानिधेरिवेन्द्रियेभ्यो ज्ञाननिष्ठायाः संरक्षणं स्थितप्रज्ञस्यासनमिति ॥६०॥

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥६१॥

सारा०व०--मत्परो मद्भक्त इति, मद्भक्तिं बिना नैवेन्द्रियजय इत्यग्रिमग्रन्थेऽपि सर्व्वत्र द्रष्टव्यम् , यदुक्तमुद्धवेन--"प्रायशः पुण्डरीकाक्ष युञ्जन्तो योगिनो मनः । विषीदन्त्यसमाधानान्मनोनिग्रहकर्शिताः ॥ अथात आनन्ददुघं पदाम्बुजं, हंसाः श्रयेरन्" इति । वशे हीति स्थितप्रज्ञस्येन्द्रियाणि वशीभूतानि भवन्तीति साधकाद्विशेष उक्तः ॥६१॥

गी०भू०—ननु निर्जितेन्द्रियाणामप्यात्मानुभवो न प्रतीतस्तत्र कोऽभ्युपाय इति चेत्तत्राह । तानि सर्व्वाणि संयम्य मत्परो मन्निष्ठः सन् युक्तः कृतात्मसमाधिरासीत तिष्ठेत । मद्भक्तिप्रभावेन सर्व्वेन्द्रियविजयपूर्विका स्वात्मदृष्टिः सुलभेति भावः । एवं स्मरन्ति । "यथाग्निरुच्चैर्ध्मानूर्द्ध्वशिखः कक्षं दहति सानिलः। तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्विषमि"त्यादि । वशे हीति स्पष्टम् । इत्थं च वशीकृतेन्द्रियतयावस्थितिः किमासीतेत्यस्योत्तरमुक्तम् ॥ ६१ ॥

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते
क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥६३॥

सारा०व०--स्थितप्रज्ञस्य मनोवशीकार एव बाह्येन्द्रियवशीकार-कारणं सर्व्वथा मनोवशीकाराभावे तु यत् स्यात्तत् शृण्वित्याह--ध्यायत इति । सङ्ग आसक्तिः, आसक्त्या च तेष्वधिकः कामोऽभिलाषः, कामाच्च केनचित् प्रतिहतात् क्रोधः ॥६२॥

सारा०व०--क्रोधात् संमोहः कार्य्याकार्य्य-विवेकाभावः, तस्माच्च शास्त्रोपदिष्टस्वार्थस्य स्मृतिनाशः, तस्माच्च बुद्धेः सद्व्यवसायस्य नाशः, ततः 'प्रणश्यति' संसार-कूपे पतति ॥६३॥

गी०भू०—विजितेन्द्रियस्यापि मय्यनिवेशितमनसः पुनरनर्थो दुर्व्वार इत्याह--ध्यायत इति द्वाभ्याम् । विषयान् शब्दादीन् सुखहेतुत्त्वबुद्ध्या ध्यायतः पुनः पुनश्चिन्तयतो योगिनस्तेषु सङ्ग आसक्तिर्भवति । सङ्गाद्धेतोस्तेषु कामतृष्णा जायते । कामाच्च केनचित् प्रतिहतात् क्रोधः चित्तज्वालस्तत्प्रतिघातको भवति ॥६२॥

गी०भू०—क्रोधात् सम्मोहः कार्य्याकार्य्यविवेकविज्ञानविलोपः, संम्मोहात् स्मृतेरिन्द्रियविजयादिप्रयत्नानुसन्धेर्विभ्रमो विभ्रंशः, स्मृति-भ्रंशाद् वुद्धेरात्मज्ञानार्थकस्याध्यवसायस्य नाशः, बुद्धिनाशात् प्रणश्यति पुनर्विषयभोगनिमग्नो भवति संसरतीत्यर्थः। मदनाश्रयणाद्दुर्व्वलं मनस्तानि स्वविषयैर्योजयन्तीति भावः। तथा च मनोविजिगीषुणा मदुपासनं विधेयम् ॥६३॥

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥६४॥

सारा०व०--मानस-विषयग्रहणाभावे सति स्ववश्यैरिन्द्रियैर्विषयग्रहणेऽपि न दोष इति वदन् स्थितप्रज्ञो व्रजेत किमित्यस्योत्तरमाह--रागेति। विधेयो वचनेस्थित आत्मा मनो यस्य सः। "विधेयो विनयग्राही वचनेस्थित आश्रवः। वश्यः प्रणेयो निभृतविनीतप्रश्रिताः समाः ॥" इत्यमरः। प्रसादमधिगच्छतीत्येतादृशस्याधिकारिणो विषयग्रहणमपि न दोष इति किं वक्तव्यम्? प्रत्युत गुण एवेति। स्थितप्रज्ञस्य विषयत्याग-स्वीकारावेव आसनव्रजने ते उभे अपि तस्य भद्रे इति भावः ॥६४॥

गी०भू०--मनसि निर्जिते श्रोत्रादिनिर्जयाभावेऽपि न दोष इति ब्रुवन् व्रजेत किमित्यस्योत्तरमाह--रागेत्यादिभिरष्टभिः। विजितवर्हिरिन्द्रियोऽपि मदनर्पितमनाः परमार्थाद्विच्युत इत्युक्तम्। यो विधेयात्मा स्वाधीनमना मदर्पितमनास्तत एव निदग्धरागादिमनोमलः स स्वात्मवश्यैर्मनोऽधीनैरत एव रागद्वेषाभ्यां वियुक्तैरिन्द्रियैः श्रोत्राद्यैर्विषयान् निषिद्धान् शब्दादींश्चरन् भुञ्जानोऽपि प्रसादं विषयासक्त्यादिमलानागमाद्विमलमनस्तमधिगच्छति प्राप्नोतीत्यर्थः ॥ ६४ ॥

प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्य्यवतिष्ठते ॥६५॥

सारा०व०--बुद्धिः पर्य्यवतिष्ठते सर्व्वतोभावेन स्वाभीष्टं प्रति स्थिराभवतीति विषयग्रहणाभावादपि समुचितविषयग्रहणं तस्य सुखमिति भावः। प्रसन्नचेतस इति चित्तप्रसादो भक्त्यैवेति ज्ञेयम्, तया विना तु न चित्तप्रसाद इति प्रथमस्कन्ध एव प्रपञ्चितम्, कृतवेदान्तशास्त्रस्यापि व्यासस्याप्रसन्नचित्तस्य श्रीनारदोपदिष्टया भक्त्यैव चित्तप्रसाददृष्टेः ॥६५॥

गी०भू०—प्रसादे सति किं स्यादित्याह—अस्य योगिनो मनः प्रसादे सति सर्व्वेषां प्रकृतिसंसर्गकृतानां दुःखानां हानिरुपजायते। प्रसन्नचेतसः स्वात्मयाथात्म्यविषया बुद्धिः पर्य्यवतिष्ठते स्थिरा भवति ॥ ६५ ॥

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥६६॥

सारा०व०--उक्तमर्थं व्यतिरेकमुखेन द्रढ़यति--नास्तीति। अयुक्तस्यावशीकृतमनसो बुद्धिरात्मविषयिणी प्रज्ञा नास्त्ययुक्तस्य तादृशप्रज्ञा-रहितस्य भावना परमेश्वरध्यानञ्चाभावयतोऽकृतध्यानस्य शान्तिर्विषयोपरामो नास्त्यशान्तस्य सुखं आत्मानन्दो न ॥६६

गी०भू०—पूर्व्वोक्तमर्थं व्यतिरेकमुखेनाह-अयुक्तस्यायोगिनो मदनिवेशितमनसो बुद्धिरुक्तलक्षणा नास्ति न भवति। अत एव तस्य भावना तादृगात्मचिन्तापि नास्ति। तादृशमात्मानमभावयतः शान्तिर्विषयतृष्णानिवृत्तिर्नास्ति। अशान्तस्य तत्तृष्णाकुलस्य सुखं स्वप्रकाशानन्दात्मानुभवलक्षणं कुतः स्यात् ॥६६

इन्द्रियाणां हि चरतां यन्मनोऽनु विधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥६७॥
तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥६८॥

सारा०व०--अयुक्तस्य बुद्धिनास्तीत्युपपादयति--इन्द्रियाणां स्वस्वविषयेषु चरतां मध्ये यन्मन एकमिन्द्रियमनुविधीयते, पुंसा सर्व्वेन्द्रियानुवर्त्ति: क्रियते, तदेव मनोऽस्य प्रज्ञां बुद्धिं हरति, यथाम्भसि नीयमानां नावं प्रतिकूलो वायुः ॥६७॥

सारा०व०--यस्य निगृहीतमनसः, हे महाबाहो ! इति यथा शत्रून् निगृह्णासि, तथा मनोऽपि निगृहाणेति भावः ॥६८॥

गी०भू०—मन्निवेशितमनस्कतयेन्द्रियनियमनाभावे दोषमाह--इन्द्रियाणामिति । विषयेषु चरतामविजितानामिन्द्रियाणां मध्ये यदेकं श्रोत्रं वा चक्षुर्वानुलक्ष्यीकृत्य मनो विधीयते प्रवर्त्त्यते तदेकमेवेन्द्रियं मनसानुगतमस्य प्रवर्त्तकस्य प्रज्ञां विविक्तात्मविषयां हरत्यपनयति मनसस्तद्विषयाकृष्टत्वात् । किं पुनः सर्व्वाणि तानीति । प्रतिकुलो वायुर्यथाम्भसि नीयमानां नावं तद्वत् ॥६७॥

गी०भू०—तस्मादिति । यस्य मन्निष्ठमनसः प्रतिष्ठितात्मनिष्ठा भवति । हे महाबाहो इति—यथा रिपून्निगृह्णासि तथेन्द्रियाणि निगृहाणेत्यर्थः । एभिः श्लोकैर्भगवन्निविष्टतयेन्द्रियविजयः स्थितप्रज्ञस्य सिद्धस्य स्वाभाविकः । साधकस्य तु साधनभूत इति बोध्यम् ॥ ६८ ॥

या निशा सर्वभूतानां तस्यां जागर्त्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥६९॥

सारा०व०--स्थितप्रज्ञस्य तु स्वतःसिद्ध एव सर्व्वेन्द्रिय-निग्रह

इत्याह-येति । बुद्धिर्हि द्विविधा भवति-आत्मप्रवणा विषयप्रवणा च । तत्र या आत्मप्रवणा बुद्धिः, सा सर्व्वभूतानां निशा, निशायां किं किं स्यादिति तस्यां स्वपन्तो जना यथा न जानन्ति, तथैवात्मप्रवणबुद्धौ प्राप्यमाणं वस्तु सर्व्वभूतानि न जानन्ति । किन्तु तस्यां संयमी स्थितप्रज्ञो जागर्त्ति, न तु स्वपिति ; अत आत्मबुद्धिनिष्ठमानन्दं साक्षादनुभवति । यस्यां विषयप्रवणायां बुद्धौ भूतानि जाग्रति, तन्निष्ठं विषयसुखशोकमोहादिकं साक्षादनुभवन्ति, न तु तत्र स्वपन्ति सा मुनेः स्थितप्रज्ञस्य निशा तन्निष्ठं किमपि नानुभवतीत्यर्थः । किन्तु पश्यतः सांसारिकाणां सुखदुःखप्रदान् विषयान् तत्रौदासीन्येनावलोकयतः स्वभोग्यान् यथोचितं निर्लेपमाददानस्येत्यर्थः ॥६९॥

गी०भू०—साधकावस्थस्य स्थितप्रज्ञस्येन्द्रियसंयमः प्रयत्नसाध्य इत्युक्तम् । सिद्धावस्थस्य तु तस्य तन्नियमः स्वाभाविक इत्याह-या निशेति । विविक्तात्मनिष्ठा विषयनिष्ठा चेति बुद्धिर्द्विविधा । यात्मनिष्ठा बुद्धिः सर्वभूतानां निशारूपकेणोपमात्र व्यज्यते-रात्रितुल्या तद्वदप्रकाशिका । रात्राविवात्मनिष्ठायां बुद्धौ स्वपन्तो जनास्तल्लभ्यमात्मानं सर्वे नानुभवन्तीत्यर्थः । संयमी जितेन्द्रियस्तु तस्यां जागर्त्ति न तु स्वपिति । तया लभ्यमात्मानमनुभवतीत्यर्थः । यस्यां विषयनिष्ठायां बुद्धौ भूतानि जाग्रति विषयभोगाननुभवन्ति न तु तत्र स्वपन्ति सा मुनेः स्थितप्रज्ञस्य निशा । तस्य विषयभोगाप्रकाशिकेत्यर्थः । कीदृशस्येत्याह पश्यत इति । आत्मानं साक्षादनुभवतः प्रारब्धाकृष्टान् विषयानप्यौदासीन्येन भुञ्जानस्य चेत्यर्थः । नर्त्तकीमूर्द्ध घटावधानन्यायेनात्मदृष्टेर्न तदन्यरसग्रह इति भावः ॥ ६९ ॥

आपूर्यमाणमचलप्रतिष्ठं
समुद्रमापः प्रविशन्ति यद्वत् ।

तद्वत्कामा यं प्रविशन्ति सर्वे
स शान्तिमाप्नोति न कामकामी ॥७०॥

सारा०व०—विषयग्रहणे क्षोभराहित्यमेव निर्लेपतेत्याह—आपूर्य्यमाणमिति । यथा वर्षास्वितस्ततो नादेया आपः समुद्रं प्रविशन्ति, कीदृशम् ? आ—ईषदपि आपूर्य्यमाणं तावतीभिरप्यद्भिः पूरयितुं न शक्यम् । अचलप्रतिष्ठमनतिक्रान्तमर्य्यादं तद्वदेव कामा विषया यं प्रविशन्ति भोग्यत्वेनायान्ति । यथा अपां प्रवेशे अप्रवेशे वा समुद्रो न कमपि विशेषमापद्यते, एवमेव यः कामानां भोगे अभोगे च क्षोभरहित एव स्यात् स स्थितप्रज्ञः । शान्ति ज्ञानम् ॥७०॥

गी०भू०—उक्तं भावं स्फुटयन्नाह आपूर्य्येति । स्वरूपेणैवापूर्य्यमाणं तथाप्यचलप्रतिष्ठमनुलङ्घितवेलं समुद्रं यथापोऽन्या वर्षोद्भवाः नद्यः प्रविशन्ति न तु तत्र किञ्चिद्विशेषं शक्नुवन्ति कर्त्तुं, तद्वत् सर्वे कामाः प्रारब्धाकृष्टा विषया यं प्रविशन्ति न तु विकर्त्तुं प्रभवन्ति स शान्तिमाप्नोति । शब्दादिषु तदिन्द्रियगोचरेष्वपि सन् स्वात्मानन्दानुभवतृप्तस्तैर्विकारलेशमप्यविन्दन् स्थितप्रज्ञ इत्यर्थः । यः कामकामी विषयलिप्सुः स तूक्तलक्षणां शान्तिं नाप्नोति ॥ ७० ॥

विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः ।
निर्ममो निरहंकारः स शान्तिमधिगच्छति ॥७१॥

सारा०व०—कश्चित्तु कामेष्वविश्वसन् नैव तान् भुङ्क्त इत्याह—विहायेति । निरहङ्कारो निर्म्मम इति देह-दैहिकेष्वहंता-ममता-शून्यः ॥७१॥

गी०भू०—विहायेति-प्राप्तानपि कामान् विषयान् सर्व्वान्

विहाय शरीरोपजीवनमात्रेऽपि निर्म्ममो ममताशून्यः निरहङ्कारोऽनात्मनि शरीरे आत्माभिमानशून्यश्चरति तदुपजीवनमात्रं भक्षयति यत्र क्वापि गच्छति वा स शान्तिं लभते इति व्रजेत किमित्यस्योत्तरम् ॥ ७१ ॥

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वा स्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति॥७२॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां भीष्मपर्व्वणि श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्ज्जुनसंवादे सांख्ययोगो नाम द्वितीयोऽध्यायः ।

सारा०व०—उपसंहरति—एषेति । ब्राह्मी ब्रह्मप्रापिका, अन्तकाले मृत्युसमयेऽपि, किं पुनराबाल्यम् ॥७२॥

ज्ञानं कर्म्म च विस्पष्टमस्पष्टं भक्तिमुक्तवान् ।
अतएवायमध्यायः श्रीगीतासूत्रमुच्यते ॥
इति सारार्थवर्षिण्यां हर्षिण्यां भक्तचेतसाम् ।
श्रीगीतासु द्वितीयोऽयं सङ्गतः सङ्गतः सताम् ॥

गी०भू०—स्थितप्रज्ञतां स्तौति एषेति-ब्राह्मी ब्रह्मप्रापिका । अन्तकाले चरमे वयसि किं पुनराकौमारं ब्रह्म ऋच्छति लभते । निर्व्वाणममृतरूपं तत् प्रदमित्यर्थः । ननु तस्यां स्थितः कथं ब्रह्म प्राप्नोति, तत्प्राप्तेस्तद्भक्तिहेतुकत्वादिति चेदुच्यते । तस्यास्तद्भक्तिहेतुकत्वात्तद्भक्तिहेतुत्वाच्च तत्प्रापकतेति ॥ ७२ ॥

निष्कामकर्मभिर्ज्ञानी हरिमेव स्मरन् भवेत् ।
अन्यथा विघ्न एवेति द्वितीयोऽध्यायनिर्णयः ॥

इति श्रीमद्भगवद्गीतोपनिषद्भाष्ये द्वितीयोऽध्यायः ॥२॥

षष्ठोऽध्यायः

श्रीभगवानुवाच-

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥१॥

साराःब०-षष्ठेषु योगिनो योगप्रकारबिजितात्मनः।
मनसश्चञ्चलस्यापि नैश्चल्योपाय उच्यते॥ (१)

सारा०व०—अष्टाङ्गयोगाभ्यासे प्रवृत्तेनापि चित्तशोधकं निष्कामकर्म्म सहसा न त्याज्यमित्याह—कर्म्मफलमनाश्रितोऽनपेक्ष्यमाणः कार्य्यमवश्यकर्त्तव्यत्वेन शास्त्रविहितं कर्म्म यः करोति, स एव कर्म्मफलसन्न्यासात् सन्न्यासी, स एव विषयभोगेषु चित्ताभावाद्योगी चोच्यते। न च निरग्निरग्निहोत्रादिकर्म्मामात्रत्यागबानेव सन्न्यास्युच्यते। न चाक्रियो दैहिकचेष्टाशून्योऽर्द्ध निमीलितनेत्र एव योगी चोच्यते ॥ १ ॥

गी०भू०—षष्ठे योगविधिः कर्म्मशुद्धस्य विजितात्मनः।
स्थैर्य्योपायश्च मनसोऽस्थिरस्यापीति कीर्त्त्यते ॥

गी०भू०—प्रोक्तं कर्म्मयोगमष्टाङ्गयोगशिरस्कमुपदेक्ष्यन्नादौ तद्उपायत्वात्तं कर्म्मयोगं स्तौति भगवान्—अनाश्रित इति द्वाभ्याम्। कर्म्मफलं पश्वन्नपुत्रस्वर्गादि-कामनाश्रितोऽनिच्छन् कार्य्यमवश्यकर्त्तव्यतया विहितं कर्म्म यः करोति, स सन्न्यासी ज्ञानयोगनिष्ठः योगी चाष्टाङ्गयोगनिष्ठः स एव—कर्म्मयोगेनैव तयोः सिद्धिरिति भावः। न निरग्निरग्निहोत्रादिकर्म्मत्यागी यतिवेशः सन्न्यासी न चाक्रियः शारीरकर्म्मत्यागी अर्द्धमुद्रितनेत्रो योगी। अत्र योगमष्टाङ्गं चिकीर्षूणां सहसा कर्म्म न त्याज्यमिति मतम् ॥१॥

यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव ।
न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन ॥२॥

सारा०व०—कर्म्मफलत्याग एव सन्न्यास-शब्दार्थः, वस्तुतस्तथा विषयेभ्यश्चित्तनैश्चल्यमेव योग-शब्दार्थ । तस्मात् सन्न्यास-योग-शब्दयोरैकार्थ्यमेवागतमित्याह—यमिति । असंन्यस्तो न संन्यस्तस्त्यक्तः संकल्पः फलाकाङ्क्षा विषयभोगस्पृहा येन सः ॥ २ ॥

गी०भू०—ननु सर्व्वेन्द्रियवृत्तिविरतिरूपायां ज्ञाननिष्ठायां सन्न्यासशब्दश्चित्तवृत्तिनिरोधे योगशब्दश्च पठ्यते । स च सर्व्वेन्द्रियव्यापारात्मके कर्म्मयोगे स सन्न्यासी च योगी चेति ब्रुवता भवता कया वृत्त्या नीयत इति चेत्तत्राह—यमिति । यं कर्म्मयोगमर्थतात्पर्य्यज्ञाः सन्न्यासं प्राहुस्तमेव तं योगमष्टाङ्गं विद्धि । हे पाण्डव ! ननु 'सिंहो मानवकः' इत्यादौ शौर्य्यादिगुणसादृश्येन तथा प्रयोगः, प्रकृते: किं सादृश्यमिति चेत्तत्राह—न हीति । असंन्यस्तसङ्कल्पः कश्चन कश्चिदपि ज्ञानयोग्यष्टाङ्गयोगी च न भवत्यपि तु संन्यस्तसङ्कल्प एव भवतीत्यर्थः । संन्यस्तः परित्यक्तः सङ्कल्पः फलेच्छा च येन सः । तथा फलत्यागसादृश्यात्तृष्णारूपचित्तवृत्तिनिरोधसादृश्याच्च कर्म्मयोगिनस्तदुभयत्वेन प्रयोगो गौणवृत्त्येति ॥२॥

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥३॥

सारा०व०—ननु तर्ह्यष्टाङ्गयोगिनो यावज्जीवमेव निष्काम-कर्म्मयोगः प्राप्त इत्याशङ्क्य तस्यावधिमाह—आरुरुक्षोरिति । मुनेर्योगाभ्यासिनो योगं निश्चलध्यानयोगमारोढुमिच्छोस्तदारोहे

कारणं कर्म्म चोच्यते, चित्तशुद्धिकरत्वात् । ततस्तस्य योगं ध्यानयोगमारूढस्य ध्याननिष्ठाप्राप्तः शमः विक्षेपकसर्व्वकर्म्मोपरमः कारणम् । तदेवं सम्यक्चित्तशुद्धिरहितो योगारुरुक्षुः ॥३॥

गी०भू०—नन्वेवमष्टाङ्गयोगिनो यावज्जीवं कर्म्मानुष्ठानं प्राप्तमिति चेत्तत्राह—आरुरुक्षोरिति । मुनेर्योगाभ्यासिनो योगं ध्याननिष्ठामारुरुक्षोस्तदारोहे कर्म्म कारणं हृद्विशुद्धिकृत्वात् । तस्यैव योगारूढस्य ध्याननिष्ठस्य तद्दार्ढ्ये शमो विक्षेपक-कर्म्मोपरतिः कारणम् ॥३॥

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ।
सर्वसंकल्पसंयासी योगारूढस्तदोच्यते ॥४॥

सारा०व०—सम्यक् शुद्धचित्तस्तु योगारूढस्तज्ज्ञापकं लक्षणमाह—यदेति । इन्द्रियार्थेषु शब्दादिषु कर्म्मसु तत्साधनेषु ॥४॥

गी०भू०—योगारूढत्वज्ञापकं चिह्नमाह—यदेति । इन्द्रियार्थेषु शब्दादिषु तत्साधनेषु कर्म्मसु च यदात्मानन्दरसिकः सन्न सज्जते । तत्र हेतुः—सर्व्वेति । सर्व्वान् भोगविषयान् कर्म्मविषयांश्च सङ्कल्पानासक्तिमूलभूतान् सन्न्यसितुं परित्यक्तुं शीलं यस्य सः ॥४॥

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥५॥

सारा०व०—यस्मादिन्द्रियार्थासक्त्यैवात्मा संसारकूपे पातितस्तं यत्नेनोद्धरेदिति । आत्मना विषयासक्तिरहितेन मनसाऽऽत्मानं जीवमुद्धरेत् । विषयासक्तिसहितेन मनसा त्वात्मानं नावसादयेत् न संसारकूपे पातयेत् । तस्मादात्मा मन एव बन्धुर्मन एव रिपुः ॥ ५ ॥

नवमोऽध्यायः

श्रीभगवानुवाच--

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात ॥१॥

सारा०ब०--आराध्यत्वे प्रभोर्दासैरैश्वर्य्यं यदपेक्षितम् ।
ततशुद्धभक्तेरुत्कर्षश्चोच्यते नबमे स्फुटम् ॥ (१)

कर्म्मज्ञानयोगादिभ्यः सकाशात् भक्तेरेव उत्कर्षः । सा च भक्तिः 'प्रधानीभूता' 'केबला' चेति सप्तमाष्टमयोरुक्तम् । तत्रापि केबलाया अतिप्रबलाया ज्ञानबदन्तःकरणशुद्ध्याद्यनपेक्षिण्या भक्तेः स्पष्टतया एव सर्व्वोत्कर्षः । तस्यामपेक्षितमैश्वर्य्यञ्च वक्तु नवमोऽयमध्याय आरभ्यते । सर्व्वशास्त्रसार--भूतस्य गीताशास्त्रस्यापि मध्यममध्यायाष्टकमेव (मध्यममध्यायषट्कमेव) सारम्, तस्यापि मध्यमौ नवमदशमावेव साराबित्यतोऽत्र निरूपयिष्यमाणमर्थं स्तौति-इदन्त्विति त्रिभिः । द्वितीयतृतीयाध्यायादिषु यदुक्तं मोक्षोपयोगिज्ञानं 'गुह्यम्', सप्तमाष्टमयोर्मत्प्राप्त्युपयोगि-ज्ञानम्-ज्ञायतेऽनेन भगवत्तत्त्वमिति ज्ञानं भक्तितत्त्वम्' गुह्यतरं, अत्र तु केवलशुद्धभक्तिलक्षणं ज्ञानं 'गुह्यतमं' प्रकर्षेणैव तुभ्यं बक्ष्यामि । अत्र तु ज्ञान-शब्देन भक्तिरवश्यं व्याख्येया, न तु प्रथमषट्कोक्तं प्रसिद्धं ज्ञानम्, परश्लोकेऽव्ययमनश्वरमिति बिशेषणदानाद्गुणातीतत्वलाभाद्गुणातीता भक्तिरेव, न तु ज्ञानम्, तस्य सात्त्विकत्वात् । 'अश्रद्दधानाः पुरुषा धर्म्मस्यास्य' इत्यग्रिमश्लोके धर्म्मशब्देनापि भक्तिरेवोच्यते । अनसूयवेऽमत्सरायेत्यन्योऽपीदममत्सरायैबोपदिशेदिति विधि-

र्व्यञ्जितः । बिज्ञानसहितं मदपरोक्षानुभवपर्य्यन्तमित्यर्थः । अशुभात् संसाराद्भक्तिप्रतिबन्धकादन्तरायाद्वा ॥ १ ॥

गी०भू०—भक्त्युद्दीप्तिकरं स्वस्य पारमैश्वर्य्यमद्भुतम् ।
स्वभक्तेश्च महोत्कर्षं नवमे हरिरूचिवान् ॥

गी०भू०—विज्ञानानन्दघनोऽसंख्येयकल्याणगुणरत्नालयः सर्व्वेश्वरोऽहं शुद्धभक्तिसुलभ इति सप्तमादिभ्यामभिधायेदानीं भक्तेरुद्दीपकं निजैश्वर्य्यं तस्याः प्रभावं चाभिधास्यन्नादौ तां स्तौति—इदमिति त्रिभिः । इदं ज्ञानं मत्कीर्त्तनादिलक्षणभक्तिरूपम्-परत्र 'धर्म्मस्यास्य' इत्युक्तेः कीर्त्तनादेश्चित्तवृत्तिरूपत्वात्, 'ज्ञायतेऽनेन इति निरुक्तेश्च, तत् किल गुह्यतमम् । द्वितीयादावुपदिष्टं मदैश्वर्य्यज्ञानं गुह्यतरं, नवमादावुपदेश्यं तु केबलभक्तिलक्षणमिदं ज्ञानं गुह्यतममित्यर्थः । तच्च बिज्ञानसहितं मदनुभवावसानं ते बक्ष्यामि । कीदृशायेत्याह-अनसूयव इति । मद्गुणेषु दोषारोप-रहिताय दुर्गमस्य स्वरहस्यस्यानुकम्पयोपदेष्टरि मयि निजैश्वर्य्यप्रख्यापनेनात्मानं प्रशंससीति दोषदृष्टिशून्यायेत्यर्थः । तेनान्योऽप्येतदनसूयं प्रति ब्रूयादिति दर्शितम् । यज्ज्ञात्वा त्वमशुभात् संसारान्मोक्ष्यसे ॥१॥

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम् ।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥२॥

सारा०ब०—किञ्च, इदं ज्ञानं राजविद्या, विद्या उपासना बिविधा एव भक्तयः, तासां राजा राजदन्तादित्वात् परनिपातः । गुह्यानां राजेति भक्तिमात्रमेवातिगुह्यं तस्य बहुविधस्यापि राजेत्यतिगुह्यतमं पवित्रमिदमिति सर्व्वपापप्रायश्चित्तरात्वात् । त्वं--पदार्थज्ञानाच्च सकाशादपि पावित्र्यकरम् । अनेकजन्मसहस्र-

सञ्चितानां सर्व्वेषामपि पापानां स्थूलसूक्ष्मावस्थानां तत्कारणस्याज्ञानस्य च सद्य एवोच्छेदकम्, अतः सर्व्वोत्तमं पावनमिदमेवेति मधुसूदनसरस्वतीपादाः। प्रत्यक्ष एवावगमोऽनुभवो यस्य तत्। "भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः। प्रपद्यमानस्य यथाश्नतः स्युस्तुष्टिः पुष्टिः क्षुदपायोऽनुघासम् ॥" इत्येकादशोक्तेः प्रतिपदमेव भजनानुरूपभगवदनुभवलाभात्। धर्म्म्यं धर्म्मादनपेतं सर्व्वधर्म्माकरणेऽपि सर्व्वधर्म्मसिद्धेः "यथा तरोर्मूलनिषेचनेन, तृप्यन्ति तत्स्कन्धभुजोपशाखाः। प्राणोपहाराच्च यथेन्द्रियाणां, तथैव सर्व्वार्हणमच्युतेज्या ॥" इति नारदोक्तेः। कर्त्तुं सुसुखमिति कर्म्मज्ञानादाविव नात्र कोऽपि कायवाङ्मानस--क्लेशातिशयः, श्रवण--कीर्त्तनादिभक्तेः श्रोत्रादीन्द्रियव्यापारमात्रत्वादव्ययं कर्म्मज्ञानादिवन्न नश्वरं निर्गुणत्वात् ॥ २ ॥

गी०भू०—राजविद्येति । विद्यानां शाण्डिल्यवैश्वानरदहरादिशब्दपूर्व्वाणां राजा राजविद्या, गुह्यानां जीवात्मयाथात्म्यादिरहस्यानां राजा राजगुह्यमिदं भक्तिरूपं ज्ञानम्–"राजदन्तादित्वादुपसर्ज्जनस्य परनिपातः।" तथात्वं प्रतिपादयितुं विशिनष्टि–उत्तमं पवित्रं लिङ्गदेहपर्य्यन्तसर्व्वपापप्रशमनात्, यदुक्तं पाद्मे–"अप्रारब्धफलं पापं कूटं बीजं फलोन्मुखम् । क्रमेणैव प्रलीयन्ते विष्णुभक्तिरतात्मनाम् ।।" इति । क्रमोऽत्र पत्रशतकवेधवद् बोध्यः। प्रत्यक्षावगमम्–अवगम्यत इत्यवगमो विषयः, स यस्मिन् प्रत्यक्षेऽस्ति-श्रवणादिकेऽभ्यस्यमाने तस्मिंस्तद्विषयः पुरुषोत्तमोऽहमाविर्भवामि, एवमाह सूत्रकारः–"प्रकाशश्च कर्म्मण्यभ्यासात्" इति । धर्म्म्यं धर्म्मादनपेतं गुरुशुश्रूषादिधर्म्मैर्नित्यं पुष्यमाणम्, श्रुतिश्च–"आचार्य्यवान् पुरुषो वेद" इत्याद्या । कर्त्तुं सुसुखं सुखसाध्यम्-श्रोत्रादिव्यापारमात्रत्वात् तुलसी-

पात्राम्बुचुलुकमात्रोपकरणत्वाच्च । अव्ययमविनाशि-मोक्षेऽपि तस्यानुवृत्तेः। एवं वक्ष्यति–'भक्त्या मामभिजानाति' इत्यादिना, कर्म्मयोगादिकं तु नेदृशमतोऽस्य राजविद्यात्वम्, तत्राहुः–राज्ञां विद्या, राज्ञां गुह्यमिति राज्ञामिवोदारचेतसां कारुणिकानामिव दिनमपि तुच्छीकुर्व्वतामियं विद्या, न तु शीघ्रं पुत्रादिलिप्सया देवानभ्यर्च्चतां दीनचेतसां कर्म्मिणाम्, राजानो हि महारत्नादिसम्पद्दृष्यनिह्नुवानाः स्वमन्त्रं यथातियत्नान्निह्नुयते तथान्यां विद्यामनिह्नुवाना मद्भक्ता एतामतियत्नान्निह्नुवीरन्निति, समानमन्यत् ॥२॥

अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि ॥३॥

सारा०व०—नन्वेवमस्य धर्म्मस्यातिसुकरत्वे सति को नाम संसारी स्यात्? तत्राह—अश्रद्दधानाः। अस्येति कर्म्मणि षष्ठी आर्षी। इमं धर्म्ममश्रद्दधानाः शास्त्रवाक्यैः प्रतिपादितं भक्तेः सर्व्वोत्कर्षं स्तुत्यर्थवादमेव मन्यमाना आस्तिक्येन न स्वीकुर्व्वन्ति ये, त उपायान्तरैर्मत्प्राप्तये कृतप्रयत्ना अपि मामप्राप्य मृत्युव्याप्ते संसारवर्त्मनि नितरामतिशयेन वर्त्तन्ते ॥ ३ ॥

गी०भू०—नन्वेवं सुकरे धर्म्मे स्थिते न कोऽपि संसरेदिति चेत्तत्राह–अश्रद्दधाना इति । धर्म्मस्येति कर्म्मणि षष्ठी । इमं मद्भक्तिलक्षणं धर्म्मं श्रुत्यादिप्रसिद्धप्रभावमप्यश्रद्दधाना दृढविश्वासेन तमगृह्णन्तः स्तुतिमात्रमेवैतदिति ये मन्यन्ते, ते मत्प्राप्तये साधनान्तराण्यनुतिष्ठन्तोऽपि भक्त्यवहेलनान्मामप्राप्य मृत्युयुक्ते संसारवर्त्मनि नितरां वर्त्तन्ते ॥३॥

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥४॥

सारा०ब०—मद्दास्यभक्तावेतन्मात्रं मदैश्वर्य्यज्ञानं मद्भक्तैरपेक्षितव्यमित्याह सप्तभिः। अव्यक्ता अतीन्द्रिया मूर्त्तिः स्वरूपं यस्त तेन मया कारणभूतेन सर्व्वमिदं जगत् ततं व्याप्तम्। अतएव मत्स्थानि मयि कारणभूते पूर्णचैतन्यस्वरूपे स्थितानि सर्व्वाणि भूतानि चराचराणि सन्ति। एवमपि घटादिषु स्वकार्य्येषु मृदादिवत्तेषु भूतेषु नाहमवस्थितोऽसङ्गत्वात्॥ ४॥

गी०भू०—अथ स्वभक्त्युद्दीपकमद्भुत-स्वैश्वर्य्यमाह-मयेति। अव्यक्ता इन्द्रियाग्राह्या मूर्त्तिः स्वरूपं यस्य तेन मया सर्व्वमिदं जगत्तातं धर्त्तुं नियन्तुं च व्याप्तम्। अतएव सर्व्वाणि चराचराणि भूतानि व्यापके धारके नियामके च मयि स्थितानि भवन्तीति तेषां स्थितिर्मदधीना, तेषु सर्व्वेषु भूतेष्वहं न चावस्थितो मम स्थितिस्तदधीना नेत्यर्थः। इह निखिलजगदन्तर्यामिणा स्वांशेनान्तः प्रविश्य नियच्छामि दधामि चेत्युक्तम्, आह चैवं श्रुतिः-"यः पृथिव्यां तिष्ठन्" इत्यादिना, इहापि वक्ष्यति-'विष्टभ्याहमिदं कृत्स्नम्' इत्यादि ॥४॥

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम्।
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥५॥

सारा०ब०—तत एव मयि स्थितान्यपि भूतानि न मत्स्थानि ममासङ्गत्वादेवेति भावः। ननु तर्हि तव जगद्व्यापकत्वं जगदाश्रयत्वञ्च पूर्व्वोक्तं विरुद्धमित्याह—पश्य मे योगमैश्वरम् असाधारणं योगैश्वर्य्यमघटित--घटना--चातुर्य्यमयम्। अन्यदप्याश्चर्य्यं पश्येत्याह-भूतानि बिभर्त्ति धारयति इति भूतभृत्, भूतानि भावयति पालयतीति भूतभावनः। एवम्भूतोऽपि ममात्मा भूतस्थो न भवति ममेति भगवति देहिदेह-विभागाभावात् 'राहोः शिरः' इतिवत् अभेदेऽपि षष्ठी। अयं भावः-

यथा जीवो देहं दधत् पालयन्नपि तस्मिन्नासक्त्या देहस्थ एव भवति, एवमहं भूतानि दधत् पालयन्नपि मायिकसर्व्वभूतशरीरोऽपि न तत्रस्थो निःसङ्गत्वादिति॥ ५॥

गी०भू०—नन्वतिगुरुं भारं वहतस्ते महान् खेदः स्यादिति चेत्ताह-न चेति। घटादावुदकादीनीव भारभूतानि च भूतानि संसृष्टानि मयि न सन्ति। तर्हि मत्स्थानि सर्व्वभूतानीत्युक्तिविरुद्धेति चेत्ताह-पश्येति। ममश्वरं मदसाधारणं योगं पश्य जानीहि-"युज्यतेऽनेन दुर्घटेषु कार्य्येषु" इति निरुक्तेर्योगोऽविचिन्त्यशक्तिवपुः सत्यसङ्कल्पता-लक्षणो धर्म्मस्तमित्यर्थः। एतदेव विस्फुटयति-भूतभृदिति भूतभृत् भूतानां धारकः पालकश्चाहं भूतस्थो भूतसंपृक्तो नैव भवामि, यतो ममात्मा मन एव भूतभावनः सत्यसङ्कल्पता-लक्षणेनैश्वरेण योगेनैवाहं भूतानां धारणं पालनञ्च करोमि, न तु स्वमूर्त्तिव्यापारेणेत्यर्थः। श्रुतिश्चैवमाह-"एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्य्याचन्द्रमसौ विधृतौ तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः" इत्यादिना। यद्यपि स्वरूपान्न मनो भिन्नं, तथापि सत्ता सतीत्यादिवद्विशेषाद्वास्तवं भेदकार्य्यमादायैव तथोक्तं बोध्यम् ॥५॥

यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान्।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥६॥

सारा०ब०—असङ्गे मयि भूतानि स्थितान्यपि न स्थितानि तेष्वपि अहं स्थितोऽपि न स्थित इत्यत्र दृष्टान्तमाह-यथेति। यथैवासङ्गस्वभावे आकाशे स्थितो नित्यं वातीति वायुः सर्व्वदा चलनस्वभावः, अतएव सर्व्वत्र यच्छतीति सर्व्वत्रगः, महान् परिमाणतः यथा स्वाकाशस्य असङ्गत्वात् तत्र स्थितोऽपि न

स्थितः, आकाशोऽपि वायौ स्थितोऽपि न स्थितोऽसङ्गत्वात् एव, तथैव असङ्गस्वभावे मयि सर्व्वाणि भूतानि आकाशादीनि महान्ति सर्व्वत्रगानि स्थितानि नापि स्थितानि इत्युपधारय विमृश्य निश्चिनु। ननु तर्हि "पश्य मे योगमैश्वरम्" इति भगवदुक्तं योगैश्वर्य्यस्यातर्क्यत्वं कथं सिद्धमभूत् दृष्टान्तलाभात्? उच्यते- आकाशस्य जड़त्वादेवासङ्गत्वम्, चेतनस्य तु असङ्गत्वं जगदधिष्ठानाधिष्ठातृत्वे परमेश्वरं बिना नान्यत्रास्तीत्यतर्क्यत्वं सिद्धमेव, तदप्याकाशदृष्टान्तो लोकबुद्धिप्रवेशार्थं एव ज्ञेयः॥ ६॥

गी॰भू॰—चराचराणां सर्व्वेषां भूतानां मत्संकल्पायत्ता स्थितिर्वृत्तिश्चेत्यत्र दृष्टान्तमाह-यथेति। यथा निरालम्बे महत्याकाशे निरालम्बो महान् बायुः स्थितः सर्व्वत्र गच्छति, तस्य तस्य च निरालम्बतया स्थितिर्मत्सङ्कल्पादेव प्रवृत्तिश्चेत्यन्तर्य्यामिब्राह्मणात्-"यद्भीषा बातः पवते" इति श्रुत्यन्तराच्चोपधारयेति, तथा सर्व्वाणि स्थिरचराणि भूतानि मत्स्थानि तैरसंसृष्टे मयि स्थितानि मयैव सङ्कल्पमात्रेण धृतानि नियमितानि चेत्युपधारय, अन्यथा आकाशादीनि बिभ्रंशेरन्निति॥६॥

सर्व्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्॥७॥

सारा॰ब॰—ननु अधुना दृश्यमानानि एतानि भूतानि त्वयि स्थितानि इत्यबगम्यते महाप्रलये क्व यास्यन्तीत्यपेक्षायामाह-सर्व्वेति। मामिकां मदीयां मम त्रिगुणात्मिकायां मायाशक्तौ लीयन्त इत्यर्थः। पुनः कल्पक्षये प्रलयान्ते सृष्टिकाले तानि बिशेषेण सृजामि॥ ७॥

गी॰भू॰—स्वसंकल्पादेव भूतानां स्थितिरुक्ता। अथ तस्मा-

देव तेषां सर्गप्रलयावाह-सर्व्वेति। हे कौन्तेय, कल्पक्षये चतुर्मुखावसानकाले सर्व्वाणि भूतानि मत्सङ्कल्पादेव मामिकां प्रकृतिं यान्ति। प्रकृतिशक्तिके मयि बिलीयन्ते कल्पादौ पुनस्तान्यहमेव 'बहु स्याम्' इति सङ्कल्पमात्रेण वैविध्येन सृजामि॥७॥

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात्॥८॥

सारा॰ब॰—ननु असङ्गो निर्व्विकारश्च त्वं कथं सृजसीत्यपेक्षायामाह-प्रकृतिमिति। स्वां स्वीयाम् अवष्टभ्य अधिष्ठाय प्रकृतेर्व्वशात् स्वीयस्वभाववशात् प्राचीनकर्म्मनिमित्तादिति यावत् अवशं कर्म्मादि-परतन्त्रम्॥ ८॥

गी॰भू॰—प्रकृतिमिति। स्वामात्मीयां त्रिगुणां प्रकृतिमवष्टभ्याधिष्ठाय सङ्कल्पमात्रेण महदाद्यात्मना परिणमय्येमं चतुर्व्विधं भूतग्रामं विसृजामि पुनःपुनः काले काले। कीदृशमित्याह-प्रकृतेः प्राचीनकर्म्मवासनाया बशात् प्रभावादवशं परतन्त्रं तथा चाचिन्त्यशक्तेरसङ्गस्वभावस्य मम सङ्कल्पमात्रेण तत्तत् कुर्व्वतो न तत्संसर्गगन्धो, न च कोऽपि खेदलेश इति॥८॥

न च मां तानि कर्माणि निबध्नन्ति धनंजय।
उदासीनवदासीनमसक्तं तेषु कर्मसु॥९॥

सारा॰ब॰—नन्वेवञ्च नाना-कर्म्माणि कुर्व्वतस्तव जीवबद्बन्धः कथं न स्यादत आह-न चेति। तानि सृष्ट्यादीनि। कर्म्मासक्तिर्हि बन्धहेतुः, स चाप्तकामत्वान्मम नास्ति उदासीनवदिति। अन्य उदासीनो यथा बिवदमानानां दुःख-शोकादिसंसृष्टो न भवति, तथैवाहमित्यर्थः॥ ९॥

गी॰भू॰—ननु बिषमाणि सृष्टिपालनलक्षणानि कर्म्माणि

वैषम्यादिना त्वां बध्नीयुरिति चेत्तत्राह—न चेति । तानि विषमसृष्ट्यादीनि कर्म्माणि न मयि वैषम्यादि प्रसञ्जयन्ति । तत्र हेतुगर्भविशेषणम्—उदासीनवदिति । जीवानां देवमानवतिर्य्यगादिभावे तत्तदभ्युदयतारतम्ये च तेषां पूर्व्वार्ज्जितानि कर्म्माण्येव कारणानि, अहं तु तेषु विषमेषु कर्म्मस्वौदासीन्येन स्थितोऽसक्त इति न मयि वैषम्यादि-दोषगन्धः । एवमाह सूत्रकारः—"वैषम्यनैर्घृण्ये न" इत्यादिना । उदासीनत्वे कर्त्तृत्वं न सिद्ध्येदत उक्तम्—उदासीनवदिति ॥९॥

मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥१०॥

साराᳶब०—ननु सृष्ट्यादिकर्त्तुस्तवेदमौदासीन्यं न प्रत्येमि इत्यत आह—मयेति । अध्यक्षेण मम निमित्तभूतेन प्रकृतिः सचराचरं जगत् सूयते प्रकृतिरेव जगत् जनयति, मम अत्राध्यक्षता-मात्रम् ;—यथा कस्यचित् अम्बरीषादेरिव भूपतेः प्रकृतिभिरेव राज्यकृत्यं निर्व्वाह्यते, अत्रोदासीनस्य भूपतेः सत्तामात्रमिति यथा तस्य राजसिंहासने सत्तामात्रेण विना प्रकृतिभिः किमपि न शक्यते कर्त्तुम्, तथैव ममाधिष्ठानलक्षणमध्यक्षत्वं विना प्रकृतिरपि जडा किमपि कर्त्तुं न शक्नोतीति भावः । अनेन मदधिष्ठानेन हेतुनेदं जगत् विपरिवर्त्तते पुनः पुनर्जायते ॥ १० ॥

गी०भू०—तत् प्रतिपादयति—मयेति । सत्यसङ्कल्पेन प्रकृत्यध्यक्षेण मया सर्व्वेश्वरेण जीवपूर्व्वपूर्व्वकर्म्मानुगुणतया वीक्षिता प्रकृतिः सचराचरं जगत् सूयते जनयति विषमगुणा सती—अनेन जीवपूर्व्वकर्म्मानुगुणेन मद्वीक्षणेन हेतुना तज्जगद्विपरिवर्त्तते पुनः पुनरुद्भवति । हे कौन्तेय ! श्रुतिश्चैवमाह—"विकारजननीमज्ञामष्टरूपामजां ध्रुवाम् । ध्यायतेऽध्यासिता तेन तन्यते प्रेरिता

पुनः । सूयते पुरुषार्थञ्च तेनैवाधिष्ठिता जगत् ॥" इति सन्निधिमात्रेणाधिष्ठातृत्वात् कर्त्तृत्वमुदासीनञ्च न विरुद्धम् । 'यथा सन्निधिमात्रेण गन्धः क्षोभाय जायते" इत्यादि स्मरणाच्चैतदेवं मदधिष्ठातृमात्रं खलु प्रकृतेरपेक्ष्यम् । मद्विना किमपि कर्त्तुं न सा प्रभवेत्—न ह्यसति राज्ञः सिंहासनाधिष्ठातृत्वे तदमात्याः कार्य्ये प्रभवः ॥१०॥

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो मम भूतमहेश्वरम् ॥११॥

सारा०ब०—ननु च, सत्यमनन्तकोटीब्रह्माण्डव्यापी सच्चिदानन्दविग्रहः कारणार्णवशायी महापुरुषः स्वप्रकृत्या जगत् सृजतीति यः प्रसिद्धः, स एव हि भवान् ; किन्तु वसुदेवसूनोस्तवेयं मानुषी तनुरित्येतदंशेनैव केचित्तव निकर्षं वदन्तीत्यत आह—अवजानन्तीति । मम मानुष्यास्तनोरस्याः परं भावं कारणार्णवशायिमहापुरुषादिभ्योऽप्युत्कृष्टं स्वरूपमजानन्त एव ते । कीदृशम् ? भूतं सत्यं यद्ब्रह्म, तच्च तन्महेश्वरञ्चेति, तन्महेश्वरपदं सत्यान्तरव्यावर्त्तकमत्र ज्ञेयम्—"युक्ते क्ष्मादावृते भूतम्" इत्यमरः । 'तमेकं गोविन्दं सच्चिदानन्दविग्रहं वृन्दावनसुरभूरुहभावनासीनं सततं समरुद्गणोऽहं परमया स्तुत्या तोषयामि" इति श्रुतेः ; "नराकृति परब्रह्म" इति स्मृतेश्च, ममास्याः मानुष्यास्तनोः सच्चिदानन्दमयत्वं मदभिज्ञभक्तैरुच्यत एव, तथा सर्व्वब्रह्माण्डव्यापित्वञ्च बाल्ये मन्मात्रा श्रीयशोदया दृष्टमेव ; यद्वा, मानुषीं तनुमेव विशिनष्टि—परमुत्कृष्टं भावं सत्तां विशुद्धं सत्त्वं सच्चिदानन्दस्वरूपमित्यर्थः । 'भावः सत्ता स्वभावाभिप्रायः" इत्यमरः । परं भावमपि विशिनष्टि—मम भूतमहेश्वरं मम सृज्यानि भूतानि ये ब्रह्माद्यास्तेषामपि महान्त-

मीश्वरम् । तस्माज्जीवस्येव मम परमेश्वरस्य तनुर्न भिन्ना; तनुरेवाहम्, अहमेव तनुः, साक्षाद्ब्रह्मैव—"शाब्दं ब्रह्म दधद्वपुः" इति मदभिज्ञशुकोक्तेरिति भवादृशैस्तु विश्वस्यतामिति भावः ॥११॥

गी०भू०—नन्वीदृशमहिमानं त्वां किमिति केचिन्नाद्रियन्ते? तत्राह—अवजानन्तीति । भूतमहेश्वरं निखिलजगदेकस्वामिनं सत्यसङ्कल्पं सर्व्वज्ञं महाकारुणिकञ्च मां मूढास्तेऽवजानन्ति । अत्र प्रकारं दर्शयन् विशिनष्टि—मानुषीमिति मानुषसन्निवेशिनीं मानुषचेष्टाबहुलां तनुं श्रीमूर्त्तिमाश्रितं तादात्म्यसम्बन्धेन नित्यं प्राप्तं मामितरराजकुमारतुल्यः कश्चिदुग्रपुण्यो मनुष्योऽयमिति बुद्ध्यावमन्यन्त इत्यर्थः । मानुषी तनुः खलु पाञ्चभौतिक्येव, न च भगवत्तनुस्तादृक्—"सच्चिदानन्दरूपाय कृष्णाय" इति "तमेकं गोविन्दं सच्चिदानन्दविग्रहम्" इति श्रवणात्, तथात्वे तदवज्ञातृणां मौढ्यान्ध्ययोगाद्ब्रह्मादिवन्द्यत्वायोगाच्च । एवंबुद्धिस्तेषां कुतो यया ते मूढा भण्यन्ते? तत्राह—परमिति, परमसाधारणं भावं स्वभावमजानन्तः मानुषाकृतेस्तस्य ज्ञानानन्दात्मत्व-सर्व्वेशत्व-मोक्षदत्वादिस्वभावानामज्ञानादित्यर्थः । एवञ्च सति तनुमाश्रितमित्युक्तिर्विशेषविभातं भेदकार्य्यमादाय बोध्या । यत्तु वसुदेवसूनोर्द्वारिकाधिपतेः सूतिकागृहाविर्भूतमेव स्वरूपं नैजं चतुर्भुजत्वात्ततो व्रजं गच्छतः स्वरूपन्तु मानुषं द्विभुजत्वादत उक्तम्—"बभूव प्राकृतः शिशुः" इतिवत्, अस्ति तन्निरवधानम्,—'मानुषीं तनुमाश्रितम्' इति तदुक्तेः, 'तेनैव रूपेण चतुर्भुजेन' इति पार्थप्रार्थनया चतुर्भुजं तं प्रति 'दृष्ट्वेदं मानुषं रूपम्' इत्यादि पार्थवाक्याच्च तस्मान्मानुष्यसंनिवेशित्वमेव तत्तनोर्मनुष्यत्वमित्युक्तम्—"यत्रावतीर्णं कृष्णाख्यं परं ब्रह्म नराकृति" इति श्रीवैष्णवे, "गूढं परं ब्रह्म मनुष्यलिङ्गम्" इति श्रीभागवते च । मनुष्यचेष्टाप्राचुर्य्याच्च तस्यास्तत्त्वम् । यथा मनुष्योऽपि राजा देव-

वत् सिंहवच्च विचेष्टनान्नृदेवो नृसिंहश्च व्यपदिश्यते, तस्माद्द्विभुजश्चतुर्भुजश्च स मनुष्यभावेनोक्तहेतुद्वयाद्व्यपदिश्यः न खलु भुजभूम्ना परेशत्वम्—कार्त्तवीर्य्यादौ व्यभिचारात्, विभुचैतन्यत्वं जगज्जन्मादिहेतुत्वं वा परेशत्वम्, तच्च द्विभुजेऽपि तस्मिन्नस्त्येव तच्छ्रुतम् न च द्विभुजत्वं सादि—"सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम् । द्विभुजं मौनमुद्राढ्यं वनमालिनमीश्वरम्" इति तस्यानादिसिद्धत्वश्रवणात् प्राकृतः शिशुरित्यत्र—प्रकृत्या स्वरूपेणैव व्यक्तः शिशुरित्येवार्थः । तस्माद्वैदूर्य्यमणौ नानारूपाणि इव तस्मिन् द्विभुजत्वादीनि युगपत् सिद्धान्येव यथारुच्युपास्यानीति शान्तोदितत्व-नित्योदितत्व-कल्पना दूरोत्सारिता ॥११॥

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ॥१२॥

सारा०व०—ननु ये मानुषीं मायामयीं तनुमाश्रितोऽयमीश्वर इति मत्वा त्वामवजानन्ति, तेषां का गतिस्तत्राह—मोघाशा इति । यदि भक्ता अपि स्युस्तदपि मोघाशा भवन्ति, मत्सालोक्यादिमभिवाञ्छितं न प्राप्नुवन्ति । यदि ते कर्म्मिणस्तदा मोघकर्म्माणः कर्म्मफलं स्वर्गादिकं न लभन्ते; यदि ते ज्ञानिनस्तर्हि मोघज्ञाना ज्ञानफलं मोक्षं न विदन्ति, तर्हि ते किं प्राप्नुवन्तीत्यत आह—राक्षसीमिति । ते राक्षसीं प्रकृतिं राक्षसानां स्वभावं श्रिताः प्राप्ता भवन्तीत्यर्थः ॥ १२ ॥

गी०भू०—ननु पाञ्चभौतिक-मानुषतनुमानुग्रपुण्यः पुरुतेजाः कोऽप्ययमिति भावेन त्वामवजानतां का गतिः स्यात्तत्राह—मोघेति । यदि ते ईश्वरभक्ता अपि स्युस्तदापि मोघाशा निष्फलमोक्षवाञ्छाः स्युः, यदि तेऽग्निहोत्रादिकर्म्मनिष्ठास्तदा मोघकर्म्माणः परिश्रमरूपाग्निहोत्रादिकाः स्युः, यदि ते ज्ञानाय वेदा-

न्तादिशास्त्रपरिशीलिनस्तदा मोघज्ञाना निष्फलतद्बोधाः स्युः । एवं कुतः ? यतस्ते विचेतसः नित्यसिद्धमनुष्यसन्निवेशि-साक्षात्-परब्रह्ममदवज्ञाजनितपापप्रतिबद्धविवेकज्ञाना इत्यर्थः । अतएव-मुक्तं बृहद्वैष्णवे-"यो वेत्ति भौतिकं देहं कृष्णस्य परमात्मनः । स सर्व्वस्माद्बहिष्कार्य्यः श्रौतस्मार्त्तविधानतः । मुखं तस्याव-लोक्यापि सचेलं स्नानमाचरेत्" इति । तर्हि ते किं फलं लभन्ते ? तत्राह-राक्षसीं हिंसादिप्रचुरां तामसीं आसुरीं कामगर्व्वादि-प्रचुरां राक्षसीं मोहिनीं बिबेकबिलोपिनीं प्रकृतिं स्वभावं श्रिता नरके निवासार्हास्तिष्ठन्ति ॥१२॥

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥१३॥

सारा०ब०—तस्माद् ये महात्मानो याहच्छिक-मद्भक्तिकृपया महात्मत्वं प्राप्तास्ते तु मानुषा अपि दैवीं प्रकृतिं देवानां स्वभावं प्राप्ताः सन्तो मां मानुषाकारमेव भजन्ते । न विद्यतेऽन्यत्र ज्ञानकर्म्मान्यकामनादौ मनो येषां ते । मां भूतादिं 'मया तत-मिदं सर्व्वम्', इत्यादि मदैश्वर्य्यज्ञानेन भूतानां ब्रह्मादिस्तम्बपर्य्य-न्तानां कारणम् । अव्ययं सच्चिदानन्दबिग्रहत्वादनश्वरं ज्ञात्वेति ममाराध्यत्वे मद्भक्तैरेतावन्मात्रं मज्ज्ञानमपेक्षितव्यम् । इयमेव त्वं--पदार्थज्ञानकर्म्माद्यनपेक्षा भक्तिरनन्या सर्व्वश्रेष्ठा राजविद्या राजगुह्यमिति द्रष्टव्यम ॥ १३ ॥

गी०भू०—तर्हि के त्वामाद्रियन्ते ? तत्राह-महात्मान इति । ये नराकृतिपरब्रह्ममत्तत्त्वबिरसत्प्रसङ्गेन तादृशमन्निष्ठया बिस्ती-र्णगाधमनसो मदीयेऽपि सहस्रशीर्षाद्याकारेऽरुचयस्ते मनुष्या अपि दैवीं प्रकृतिमाश्रिताः सन्तो नराकृतिं मां मध्यभूतादिबि-धिरुद्रादि-सर्व्वकारणमव्ययं नित्यञ्च ज्ञात्वा निश्चित्य भजन्ति

सेवन्ते, अनन्यमनसो नराकार एव मयि निखातचित्ताः ॥१३॥

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः ।
नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥१४॥

सारा०ब०—भजन्तीत्युक्तं तद्भजनमेव किमित्यत आह-सततं सदेति नात्र कर्म्मयोग इव कालदेशपात्रशुद्ध्याद्यपेक्षा कर्त्तव्येत्यर्थः,-"न देशनियमस्तत्र न कालनियमस्तथा । नोच्छि-ष्टादौ निषेधोऽस्ति श्रीहरेर्नाम्नि लुब्धक ॥" इति स्मृतेः । यतन्तो यतमानाः—यथा कुटुम्बपालनार्थं दीनाः गृहस्थाः धनिकद्वारादौ धनार्थं यतन्ते तथैव मद्भक्ताः कीर्त्तनादिभक्तिप्राप्त्यर्थं साधु-सभादौ यतन्ते, प्राप्य च, भक्तिमधीयमानं शास्त्रं पठतः इव पुनः पुनरभ्यस्यन्ति च । एतावन्ति नामग्रहणानि एतावत्यः प्रणतयः एतावत्यः परिचर्य्याश्चावश्यकर्त्तव्याः इत्येवं दृढानि व्रतानि नियमाः येषां ते, यद्वा, दृढानि अपतितानि एकादश्यादि-व्रतानि नियमा येषां ते । नमस्यन्तश्च इति चकारः श्रवण-पादसेवनाद्यनुक्तसर्व्वभक्तिसंग्रहार्थः । नित्ययुक्ता भाविनं मन्नि-त्यसंयोगमाकाङ्क्षन्तः आशंसायां भूतवच्चेति वर्त्तमानेऽपि भूतकालिकः क्त-प्रत्ययः । अत्र मां कीर्त्तयन्त एव मामुपासत इति मत्कीर्त्तनादिकमेव मदुपासनमिति वाक्यार्थः । अतो मामिति न पौनरुक्त्यमाशङ्कनीयम् ॥ १४ ॥

गी०भू०—भक्तिप्रकारमाह-सततमिति द्वयेन । सततं सर्व्वदा देशकालादिबिशुद्धिनैरपेक्ष्येण मां कीर्त्तयन्तः सुधा-मधु-राणि मम कल्याणगुणकर्म्मानुबन्धीनि गोबिन्द-गोवर्द्धनोद्धरणा-दीनि नामान्युच्चैरुच्चारयन्तो मामुपासते, नमस्यन्तश्च मदर्च्चना-निकेतेषु गत्वा धूलिपङ्कान्तेषु भूतलेषु दण्डवत् प्रणिपतन्तो भक्त्या प्रीतिभरेण । कीर्त्तयन्तो मामुपासत इति मत्कीर्त्तनादिकमेव

मदुपासनमिति वाक्यार्थः। अतो मामिति न पौनरुक्त्यम्। 'च' शब्दोऽनुक्तानां श्रवणार्चनवन्दनादीनां समुच्चायकः। यतन्तः समानाशयैः साधुभिः सार्द्धं मत्स्वरूपगुणादियाथात्म्यनिर्णयाय यतमानाः, दृढ़व्रता दृढ़ान्यस्खलितान्येकादशीजन्माष्टम्युपोषणादीनि व्रतानि येषां ते, नित्ययुक्ता भाविनं मन्नित्यसंयोगं वाञ्छन्तः "आशंसायां भूतवच्च" इति सूत्राद्वर्त्तमानेऽपि भूतकालिक-'क्त'प्रत्ययः ॥१४॥

ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते।

एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥१५॥

साराॅब०—तदेवं अत्राध्याये पूर्व्वाध्याये च अनन्यभक्त एव महात्म-शब्दवाच्यः, आर्त्तादिसर्व्वभक्तेभ्यः श्रेष्ठ इति दर्शितम्। अथान्येऽपि अनुक्तपूर्व्वा ये त्रिविधा भक्ताः पूर्व्वतो न्यूनाः अहंग्रहोपासकाः प्रतीकोपासका विश्व-रूपोपासकास्तान् दर्शयति। ज्ञानयज्ञेनेति अन्ये न महात्मनः पूर्व्वोक्त साधनानुष्ठानासमर्था इत्यर्थः, ज्ञानयज्ञेन "तं वा अहमस्मि भगवो देवता अहं वै त्वमसि" इत्यादि-श्रुत्युक्तमहंग्रहोपासनं ज्ञानं स एव परमेश्वरयजनरूपत्वात् यज्ञस्तेन, चकार एवार्थे, अपि-शब्दः साधनान्तरत्यागार्थः, एकत्वेन उपास्योपासकयोरभेदचिन्तनरूपेण। ततोऽपि न्यूना अन्ये पृथक्त्वेन भेदचिन्तनरूपेण "आदित्यो ब्रह्मेत्यादेशः" इत्यादि श्रुत्युक्तेन प्रतीकोपासनेन ज्ञानयज्ञेन। "अन्ये ततोऽपि मन्दा बहुधा बहुभिः प्रकारैर्विश्वतोमुखं विश्वरूपं सर्व्वात्मानं मामेवोपासते" इति मधुसूदनसरस्वतीपादानां व्याख्या। अत्र 'नादेवो देवमर्च्चयेत्' इति तान्त्रिकदृष्ट्या गोपालोऽहम् इति भावनावत्त्वे या गोपालोपासना, सा अहंग्रहोपासना। तथा यः परमेश्वरो विष्णुः स

हि सूर्य्य एव नान्यः; स हि इन्द्र एव नान्यः, स हि सोम एव नान्यः' इत्येवं भेदेन एकस्या एव भगवद्विभूतेर्या उपासना सा 'प्रतीकोपासना'। विष्णुः सर्व्वः इति समस्त-विभूत्युपासना विश्वरूपोपासनेति ज्ञानयज्ञस्य त्रैविध्यम्, यद्वा, एकत्वेन पृथक्त्वेन इत्येक एव 'अहंग्रहोपासना'—'गोपालोऽहं' 'गोपालस्य दासोऽहम्' इत्युभयभावनामयी समुद्रगामिनी नदीव समुद्राभिन्नाऽभिन्ना चेति। तदा च ज्ञानयज्ञस्य द्वैविध्यम् ॥ १५ ॥

गी०भू०—एवं केवलस्वरूपानिष्ठान् कीर्त्तनादिशुद्धभक्तिप्रधानान्महात्मशब्दितानभिधाय गुणीभूत-तत्कीर्त्तनादिज्ञानप्रधानान् भक्तानाह—ज्ञानेति। पूर्व्वतोऽन्ये केचन भक्ताः पूर्व्वोक्तेन कीर्त्तनादिज्ञानयज्ञेन च यजन्तो मामुपासते। तत्र प्रकारमाह—बहुधा बहुप्रकारेण पृथक्त्वेन प्रपञ्चाकारेण प्रधानमहदाद्यात्मना विश्वतोमुखमिन्द्रादिदैवतात्मना चावस्थितं मामेकत्वेनोपासते। अयमत्र निष्कर्षः—सूक्ष्मचिदचिच्छक्तिमान् सत्यसङ्कल्पः कृष्णो "बहु स्याम्" इति स्वीयेन सङ्कल्पेन स्थूलचिदचिच्छक्तिमानेक एव ब्रह्मादिस्तम्बान्तविचित्रजगद्रूपतयावतिष्ठत इत्यनुसन्धिना तादृशस्य मम कीर्त्तनादिना च मामुपासत इति ॥१५॥

अहं क्रतुरहं यज्ञः स्वधाहमहमौषधम्।

मन्त्रोऽहमहमेवाज्यमहमग्निरहं हुतम् ॥१६॥

पिताहमस्य जगतो माता धाता पितामहः।

वेद्यं पवित्रमोंकार ऋक्साम यजुरेव च ॥१७॥

गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत्।

प्रभवः प्रलयः स्थानं निधानं वीजमव्ययम् ॥१८॥

तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥१९॥

सारा०ब०—बहुधोपासते कथं त्वामेव इत्याशङ्क्य आत्मनो विश्वरूपत्वं प्रपञ्चयति चतुर्भिः । क्रतुः श्रौतोऽग्निष्टोमादिः, यज्ञः स्मार्त्तो वैश्वदेवादिः,औषधम् औषधि-प्रभवमन्नम् , पिता व्यष्टि-समष्टिसर्व्वजगदुत्पादनात् , माता जगतोऽस्य स्वकुक्षि—मध्य एव धारणात्, धाता जगतोऽस्य पोषणात् , पितामहः जगत्स्रष्टुः ब्रह्मणोऽपि जनकत्वात् , वेद्यं ज्ञेयं वस्तु, पवित्रं शोधकं वस्तु, गतिः फलं, भर्त्ता पतिः, प्रभुर्नियन्ता, साक्षी शुभाशुभद्रष्टा, निवासः आस्पदं , शरणं विपद्भ्यस्त्राता, सुहृत् निरुपाधिहितकारी , प्रभवाद्याः सृष्टिसंहार-स्थितयः क्रियाश्चाहं, निधानं निधिः पद्मशङ्खादिः, बीजं कारणम् , अव्ययम् अविनाशि, न तु व्रीह्यादिवन्नश्वरम् , आदित्यो भूत्वा निदाघे तपामि, प्रावृषि वर्षम् उत्सृजामि, कदाचिच्चैव ग्रहरूपेण वर्षं निगृह्णामि च । अमृतं मोक्षः, मृत्युः संसारः, सदसत् स्थूलसूक्ष्मः, --एतत् सर्व्वम् अहमेव इति मत्वा विश्वतोमुखं मामुपासते इति पूर्व्वेणान्वयः ॥ १६-१९ ॥

गी०भू०—अहमेव जगद्रूपतयावस्थित इत्येतत् प्रदर्शयति-अहमिति चतुर्भिः । क्रतुर्ज्योतिष्टोमादिः श्रौतो, यज्ञो वैश्वदेवादिः स्मार्त्तः, स्वधा पित्रर्थे श्राद्धादिः, औषधं भेषजमौषधिप्रभव-मन्नं वा, मन्त्रो "याज्यापुरो नु' वाक्यादिर्य्येनोद्दिश्य हविर्दे-वेभ्यो दीयते, आज्यं घृतहोमादिसाधनम् , अग्निर्होमादिकारण-माहवनीयादिः, हुतं होमो हविःप्रक्षेपः, एतत् सर्व्वात्मनाहमेवा-स्थितः । पिताहमिति–अस्य स्थिरचरस्य जगतस्तत्र तत्र पितृत्वेन मातृत्वेन पितामहत्वेन चाहमेव स्थितः,धाता धारकत्वेन पोषकत्वेन

च तत्र तत्र स्थितो राजादिश्चाहमेव–चिदचिच्छक्तिमतस्तदन्तर्य्यामिणो मत्तोषामनतिरेकात् , वेद्यं ज्ञेयं वस्तु, पवित्रं शुद्धिकरं गङ्गादिवारि, ज्ञेये ब्रह्मणि ज्ञानहेतुरोङ्कारः सर्व्ववेदबीजभूतः, ऋगादिस्त्रिविधो वेदश्चशब्दादथर्व्व च ब्राह्मम्–तेषु नियताक्षरः पादा ऋक् , सैव गीतिविशिष्टा साम, सामपदं तु गीतिमात्र-स्यैव वाचकमित्यन्यत् , गीतिशून्यमनियताक्षरं यजुः, एतत्त्रिविधं कर्म्मोपयोगिमन्त्रजातमहमेवेत्यर्थः । गतिः साध्यसाधनभूता 'गम्यते इयमनया च' इति निरुक्तेः, भर्त्ता पतिः, प्रभुर्नियन्ता, साक्षी शुभाशुभद्रष्टा, निवासः भोगस्थानं–'निवसत्यत्र'इति निरुक्तेः, शरणं प्रपन्नार्त्तिहृत-'शीर्य्यते दुःखमस्मिन्'इति निरुक्तेः, सुहृन्निमित्ताहितकृत् , प्रभवादयः स्वर्गप्रलयस्थितयः क्रिया, निधानं निधिर्महापद्मादिर्नववविधः, बीजं कारणमव्ययमविनाशि, न तु व्रीह्यादिवद्विनाशि । तपामीति – सूर्य्यरूपेणाहमेव निदाघे जगत्तपामि, प्रावृषि वर्षं जलं विसृजामि मेघरूपेन, कदाचिदवग्रह-रूपेण वर्षं निगृह्णामि आकर्षामि, अमृतं मोक्षः, मृत्युः संसारः, सत् स्थूलम् , असत् सूक्ष्मम् , एतत् सर्व्वमहमेव तथा चैवं बहु-विधनामरूपावस्थ निखिलजगद्रूपतया स्थित एक एव शक्तिमान् वासुदेव इत्येकत्वानुसन्धित्ना ज्ञानयज्ञेन चैके यजन्तो मामु-पासते ॥१६-१९॥

त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ।
ते पुण्यमासाद्य सुरेन्द्रलोक मश्नन्ति दिव्यान्दिवि देवभोगान् ॥२०

सारा०ब०—एवं त्रिविधोपासनावन्तोऽपि भक्ता एव मामेव परमेश्वरं जानन्तो मुच्यन्ते । ये तु कर्म्मिणस्ते न मुच्यन्त एव इत्याह द्वाभ्यां—त्रैविद्या इति । ऋग्यजुःसामलक्षणास्तिस्रो

विद्या अधीयन्ते जानन्ति वा त्रैविद्या वेदत्रयोक्तकर्म्मपरा इत्यर्थः। यज्ञैर्मामिष्ट्वा इन्द्रादयो ममैव रूपाणीत्यजानन्तोऽपि वस्तुत इन्द्रादिरूपेण मामेव इष्ट्वा यज्ञशेषं सोमं पिबन्तीति सोमपास्ते पुण्यं प्राप्य ॥ २० ॥

गी०भू०—एवं स्वभक्तानां वृत्तिमभिधाय तेषामेव विशेषं बोधयितुं स्वविमुखानां वृत्तिमाह-त्रैविद्येति द्वाभ्याम्। तिसृणां विद्यानां समाहारस्त्रिविद्यं, तद्येऽधीयते विदन्ति च ते त्रैविद्याः- "तदधीते तद्वेद" इति सूत्रादण्- ऋग्यजुःसामोक्तकर्म्मपरा इत्यर्थः। त्रयीविहितैर्ज्योतिष्टोमादिभिर्यज्ञैर्मामिष्ट्वा-इन्द्रादयो ममैव रूपाण्यविद्वन्तोऽपि वस्तुतस्तत्तद्रूपेणावस्थितं मामेवाराध्येत्यर्थः। सोमपा यज्ञशेषं सोमं पिबन्तः, पूतपापा विनष्टस्वर्गादि-प्राप्तिविरोधिकल्मषाः सन्तो ये स्वर्गतिं प्रार्थयन्ते ते पुण्यमित्यादि विस्फुटार्थः। मयैव दत्तामिति शेषः ॥२०॥

ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति।
एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते ॥२१॥

सारा०ब०—गतागतं पुनः पुनर्मृत्युजन्मनी ॥ २१ ॥

गी०भू०—ततश्च, ते तर्मिति ते स्वर्गप्रार्थकाः प्रार्थितं तं स्वर्गलोकं भुक्त्वा तत्प्रापके पुण्ये क्षीणे सति मर्त्यलोकं विशन्ति पञ्चाग्निविद्योक्तरीत्या भुवि ब्राह्मणादिजन्मानि लभन्ते पुनरप्येवमेव त्रयीविहितं धर्म्ममनुतिष्ठन्तः कामकामाः स्वर्गभोगेच्छवो गतागतं लभन्ते संसरन्तीत्यर्थः ॥२१॥

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥२२॥

शारा०ब०—मदनन्यभक्तानां सुखन्तु न कर्म्मप्राप्यं किन्तु

मद्दत्तमेव इत्याह—अनन्या इति। नित्यमेव सदैवाभियुक्तानां पण्डितानामिति तदन्ये नित्यमपण्डिता इति भावः; यद्वा नित्यसंयोगस्पृहावतां योगध्यानादिलाभः क्षेमं तत्पालनञ्च तैरनपेक्षितमप्यहमेव वहामि, अत्र करोमीत्यप्रयुज्य वहामीति-प्रयोगात् तेषां शरीरपोषणभारो मयैवोह्यते, यथा स्व-कलत्र-पुत्रादिपोषणभारो गृहस्थेनेति भावः। न चान्येषामिव तेषामपि योगक्षेमं कर्म्म प्राप्यमेवेत्यत आत्मारामस्य सर्व्वत्रोदासीनस्य परमेश्वरस्य तव किं तद्वहनेनेति वाच्यम्—"भक्तिरस्य भजनं तदिहामुत्रोपाधिनैरास्येनामुष्मिन् मनःकल्पनमेतदेव नैष्कर्म्यम्" इति श्रुतेर्मदनन्यभक्तानां निष्कामत्वेन नैष्कर्म्यात् तेषु दृष्टं सुखं मद्दत्तमेव तत्र मम सर्व्वत्रोदासीनस्यापि स्व-भक्तवात्सल्यमेव हेतुर्ज्ञेयः। न चैवं त्वयि स्वेष्टदेवे स्वनिर्व्वाह-भारं ददानास्ते भक्ताः प्रेमशून्या इति वाच्यम्; तैर्मयि स्व-भारस्य सर्व्वथैवानर्पणात् मयैव स्वेच्छया ग्रहणात्। न च सङ्कल्पमात्रेण विश्वसृष्ट्यादिकर्त्तुं ममायं भारो ज्ञेयः, यद्वा भक्तजनासक्तस्य मम स्वभोग्यकान्ताभारवहनमिव तदीय-योग-क्षेमवहनमतिसुखप्रदमिति ॥ २२ ॥

गी०भू०—अथ स्वभक्तानां विशेषं निरूपयति-अनन्या इति। ये जना अनन्या मदेकप्रयोजना मां चिन्तयन्तो ध्यायन्तः परितः कल्याणगुणरत्नाश्रयतया विचित्राद्भुतलीलापीयूषाश्रयतया दिव्यविभूत्याश्रयतया चोपासते भजन्ति तेषां नित्यं सर्व्वदैव मय्यभियुक्तानां विस्मृतदेहयात्राणामहमेव योगक्षेममन्नाद्याहरणं तत्संरक्षणञ्च वहामि। अत्र करोमीत्यनुक्त्वा वहामीत्युक्तिस्तु तत्पोषणभारो मयैव वोढव्यो गृहस्थस्येव कुटुम्बपोषणभार इति व्यनक्ति। एवमाह सूत्रकारः—"स्वामिनः फलश्रुतेरित्यात्रेयः" इति। अत्राहु—तेषां नित्यं मया सार्द्धमभियोगं

वाञ्छतां योगं मत्प्राप्तिलक्षणं क्षेमञ्च मत्तोऽपुनरावृत्तिलक्षण-महमेव वहामि, तेषां मत्प्रापणभारो ममैव, न त्वर्च्चिरादेर्देवगण-स्येति। एवमेवाभिधास्यति द्वादशे-'ये तु सर्व्वाणि कर्म्माणि' इत्यादिद्वयेन। सूत्रकारोऽप्येवमाह-"वशेषञ्च दर्शयति "इति ॥२२॥

येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः ।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥२६॥

सारा०व०—ननु च ज्ञानयज्ञेन चाप्यन्ये इत्यनेन त्वया स्वस्यैवोपासना त्रिविधोक्ता, तत्र बहुधा: विश्वतोमुखमिति तृतीयाया उपासनाया ज्ञापनार्थम् "अहं क्रतुरहं यज्ञः" इत्यादिना स्वस्य विश्वरूपत्वं दर्शितम्, अतः कर्म्मयोगेन कर्म्माङ्गभूते-न्द्रादियाजकास्तथा प्राधान्येनैव देवतान्तरभक्ता अपि त्वद्भक्ता एव। कथं तर्हि ते न मुच्यन्ते? यदुक्तं—त्वया "गतागतं कामकामा लभन्ते" इति, "अन्तवत्तु फलं तेषाम्" इति च तत्राह—येऽपीति। सत्यं मामेव यजन्तीति किन्त्वविधि-पूर्व्वकं—मत्प्रापकं विधिं विनैव यजन्त्य पुनरावर्त्तन्ते ॥२३॥

गी०भू०—नन्विन्द्रादियाजिनोऽपि वस्तुतस्त्वद्याजिन एव तेषां कुतो गतागतमिति चेत्तत्राह-येऽपीति। ये जना अन्यदेव-ताभक्ताः केवलेष्विन्द्रादिषु भक्तिमन्तः श्रद्धया अत एव फलप्रदा इति दृढविश्वासेनोपेताः सन्तो यजन्ते यज्ञैस्तानर्चयन्ति, तेऽपि मामेव यजन्ति इति सत्यमेतत्, किन्त्वविधिपूर्व्वकं ते यजन्ति-येन विधिना गतागतनिवर्त्तिका मत्प्राप्तिः स्यात् तं विधिं विनैव। अतस्तत्तो लभन्ते ॥२३॥

अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥२४॥

सारा०व०—अविधिपूर्व्वकत्वमेवाह-अहमिति। देवतान्तर-रूपेणाहमेव भोक्ता प्रभुः स्वामी फलदाता चाहमेवेति। मान्तु तत्त्वेन न जानन्ति—यथा सूर्य्यस्याहमुपासकः सूर्य्य एव मयि प्रसीदतु, सूर्य्य एव मदभीष्टं फलं ददातु--सूर्य्य एव परमेश्वर इति तेषां बुद्धिर्न तु परमेश्वरो नारायण एव सूर्य्यः स एव तादृशश्रद्धोत्पादकः, स एव मह्यं सूर्य्योपासनाफलप्रद इति बुद्धिरतस्तत्त्वतो मदभिज्ञानाभावात्ते च्यवन्ते भगवान्नारायण एव सूर्य्यादिरूपेणाराध्यत इति भावनया विश्वतोमुखं मामुपासी-नास्तु मुच्यन्त एव। तस्मान्मद्विभूतिषु पूजा सूर्य्यादिषु मद्विभू-तिज्ञानपूर्व्विकैव कर्त्तव्या' न त्वन्यथेति द्योतितम् ॥ २४ ॥

गी०भू०—अविधिपूर्व्वकतां दर्शयति-अहं हीति। अहमेवे-न्द्रादिरूपेण सर्व्वेषां यज्ञानां भोक्ता प्रभुः स्वामी पालकः फल-दश्चेत्येवं तत्त्वेन मां नाभिजानन्ति, अतस्ते च्यवन्ति संसरन्ति ॥२४

यान्ति देवव्रता देवान्पितॄन्यान्ति पितृव्रताः ।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ।२५

सारा०व०--ननु च तत्तद्देवतापूजापद्धतौ यो यो विधि-रुक्तस्तेनैव विधिना सा सा देवता पूज्यत एव। यथा विष्णु-पूजापद्धतौ य एव विधिस्तेनैव वैष्णवा विष्णुं पूजयन्त्यतो देवतान्तरभक्तानां को दोषः इति चेत्? सत्यं, तां तां देवतां तद्भक्ताः प्राप्नुवन्त्येव इत्ययं न्याय एव इत्याह-यान्तीति। तेन त-त्तद्देवतानामपि नश्वरत्वात् तत्तद्देवताभक्ताः कथमनश्वरा भवन्तु। अहन्त्वनश्वरो नित्यो मद्भक्ता अप्यनश्वराः इति ते नित्या एवेति द्योतितम्--भवानेकः शिष्यते शेषसंज्ञः इति, "एको नारायण एवासीन्न ब्रह्मा न च शङ्कर"इति, परार्द्धान्ते सोऽ-बुध्यत गोपरूपो मे पुरस्तादाविर्बभूव इति, न च्यवन्ते च

मद्भक्ता महत्यां प्रलयादपि इत्यादि-श्रुतिभ्यः ॥ २५ ॥

गी०भू०—वस्तुतो मम तत्तद्देवतादिरूपतया स्थितत्वेऽपि तद्रूपतया मज्ज्ञानाभावादेव ते मां नाप्नुवन्तीत्याह—यान्तीति। अत्राद्यपर्य्याये व्रत-शब्दः पूजाभिधायी परत्रेज्या-शब्दात्। देवव्रता देवपूजकाः सात्त्विकदर्शपौर्णमास्यादिकर्म्मभिरिन्द्रादीन् यजन्तस्तानेव यान्ति, पितृव्रता राजसाः श्राद्धादिकर्म्मभिः पितॄन् यजन्तस्तानेव यान्ति, भूतेज्यास्तामसास्तत्तद्बलिभिर्यक्षरक्षोविनायकान् पूजयन्तस्तान्येव भूतानि यान्ति। मद्याजिनस्तु निर्गुणाः सुलभैर्द्रव्यैर्मामर्च्चयन्तो मामेव यान्ति। अपिरवधारणे। अयमर्थः—इन्द्रादीनां वयमुपासकास्त एवास्माकमीश्वराः पूजाभिः प्रसीदन्तः फलान्यभीष्टानि दद्युरिति मदन्यदेवसेवकानां भावना, सर्व्वशक्तिः सर्व्वेश्वरो वासुदेवस्तद्देवतादिरूपेणावस्थितोऽस्मत्स्वामी सुलभोपचारैः कर्म्मभिराराधितः सर्व्वाण्यस्मदभीष्टानि दद्यादिति मत्सेवकानां भावना। ततश्च समानान्येव कर्म्माण्यनुतिष्ठन्तोऽपि देवादिसेविनो मद्भावना-वैमुख्यात्तान्निजेष्टानेवाचिरायुषोऽल्पविभूतिनासाद्य तैः सह परिमितान् भोगान् भुक्त्वा तद्विनाशे विनश्यन्ति। मत्सेविनस्तु मामनादिनिधनं सत्यसङ्कल्पमनन्तविभूतिं विज्ञानानन्दमयं भक्तवत्सलं सर्व्वेश्वरं प्राप्य मत्तः पुनर्न निवर्त्तन्ते—मया साकमनन्तानि सुखानि अनुभवन्तो मद्धाम्नि दिव्ये विलसन्तीति ॥२५॥

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥२६॥

सारा०व०—वरं देवतान्तरभक्तवायासाधिक्यं, न तु मद्भक्तावित्याह—पत्रमिति। अत्र भक्त्येति करणं,—तृतीयायां भक्त्युपहृतमिति पौनरुक्त्यं स्यात्, अतः सहार्थे तृतीया, भक्त्या

सहिता मद्भक्ता इत्यर्थः। तेन मद्भक्तभिन्नो जनस्तात्कालिक्या भक्त्या यत् प्रयच्छति, तत् तेनोपहृतमपि पत्रपुष्पादिकं नैवाश्नामीति द्योतितम्। ततश्च मद्भक्त एव पत्रादिकं यद्ददाति तत् तस्याहमश्नामि यथोचितमुपयुञ्जे। कीदृशम्? भक्त्या उपहृतं न तु कस्यचिदनुरोधादिना दत्तमित्यर्थः। किञ्च मद्भक्तस्याप्यपवित्रशरीरत्वे सति नाश्नामीत्याह—प्रयतात्मनः शुद्धशरीरस्येति रजस्वलादयो, व्यावृत्ताः, यद्वा प्रयतात्मनः शुद्धान्तःकरणस्य, मद्भक्तं विना नान्यः शुद्धान्तःकरण इति। "धौतात्मापुरुषः कृष्णपादमूलं न मुञ्चति" इति परीक्षिदुक्तेर्मत्पादसेवात्यागासामर्थ्यमेव शुद्धचित्तत्वचिह्नम्, अतः कांचित् कामक्रोधादिसत्त्वेऽपि उत्खातदंष्ट्रोरगदंशवत्तस्याकिञ्चित्करत्वं ज्ञेयम्॥२६

गी०भू०—एवमत्यानन्तफलत्वान्मद्भक्तिः कार्य्येत्युक्त्वा सुखसाध्यत्वाच्च सा कार्य्येत्याह—पत्रमिति। पत्रं वा पुष्पं वान्यद्वा, यत्सुलभं वस्तु यो भक्त्या प्रीतिभरेण मे सर्व्वेश्वराय प्रयच्छति, तस्य भक्त्युपहृतं प्रीत्यर्पितं तत्तादनन्तविभूतिः पूर्णकामोऽप्यहमश्नामि यथोचितमुपभुञ्जे, तत्प्रीत्युदितत्तृष्णः सन् तद्भक्त्यावेशात्त सर्व्वमद्मीति वा। तस्य कीदृशस्येत्याह—प्रयतात्मनो विशुद्धमनसो निष्कामस्येत्यर्थः। तथा च निष्कामेण मदनुरक्तेनार्पितं तदश्नामि, तद्विपरीतेनार्पितं तु नाश्नामीत्युक्तम्, 'भक्त्या' इत्युक्त्वापि पुनर्भक्त्युपहृतमित्युक्तिर्भक्तिरेव मत्तोषिका, न तु द्विजत्व-तपस्वित्वादिति सूचयति। इह 'सततम्', 'अनन्यः' 'पत्रम्' इत्यादिभिस्त्रिभिरुक्ता कीर्त्तनादिरूप--विशुद्धभक्तिरर्पितैव क्रियेत, न तु कृत्वार्पितेति। "इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा। क्रियेत भगवत्यद्धा तन्मन्येऽधीतमुत्तमम्" इति प्रह्लादवाक्यात्; अतस्तथात्र नोक्तेः ॥२६॥

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥२७॥

सारा०ब०—ननु च "आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी" इत्यारभ्य एतावतीषु त्वदुक्तासु भक्तिषु मध्ये खल्वहं कां भक्तिं करवै इत्यपेक्षायां, भो अर्ज्जुन ! साम्प्रतं तावत्तव कर्म्मज्ञानादीनां त्यक्तुमशक्यत्वात् सर्व्वोत्कृष्टायां केवलायामनन्यभक्तौ नाधिकारो नापि निकृष्टायां सकामभक्तौ, तस्मात्त्वं निष्कामां कर्म्मज्ञानमिश्रां प्रधानीभूतामेव भक्तिं कुर्व्विबत्याह—यत् करोषीति द्वाभ्याम् । लौकिकं वैदिकं वा यत् कर्म्म त्वं करोषि, यदश्नासि व्यवहारतो भोजनपानादिकं यत् करोषि, यत्तपस्यसि तपः करोषि, तत् सर्व्वं मय्येवार्पणं यस्य तद् यथा स्यात् , तथा कुरु । न चायं निष्कामकर्म्मयोग एव न तु भक्तियोग इति वाच्यम् । निष्कामकर्म्मिभिः शास्त्रविहितं कर्म्मैव भगवत्पर्य्यते, न तु व्यवहारिकं किमपि कृतम् , तथैव सर्व्वत्र दृष्टेः । भक्तैस्तु स्वात्ममनःप्राणेन्द्रियव्यापारमात्रमेव स्वेष्टदेवे भगवत्यर्प्यते । यदुक्तं भक्तिप्रकरण एव—"कायेन वाचा मनसेन्द्रियैर्व्वा बुद्ध्यात्मना वानुसृतस्वभावात् । करोति यद् यत् सकलं परस्मै नारायणायेति समर्पयेत्तत् ॥" इति । ननु च जुहोषीति हवनमिदमर्च्चनभक्त्यङ्गभूतं विष्णूद्देश्यकमेव, तपस्यतीति तपोऽप्येतदेकादश्यादिव्रतरूपमेव अत इयमनन्यैव भक्तिः किमिति नोच्यते ? सत्यम् अनन्या भक्तिर्हि कृत्वापि न भगवत्यर्प्यते किन्तु भगवत्यर्पितैव क्रियते, यदुक्तं श्रीप्रह्लादेन—"श्रवणं कीर्त्तनं विष्णोः स्मरणम्" इत्यत्र "इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा क्रियेत" इत्यस्य व्याख्या च श्रीस्वामिचरणानां—"भगवति विष्णौ भक्तिः क्रियते, सा चार्पितैव सती यदि क्रियते न तु कृता सती पश्चादर्प्येत इत्यतः पद्यमिदं न केवलायां पर्य्यवसेदिति ॥२७॥

गी०भू०—सततम् इत्यादिभिर्निरपेक्षाणां भक्तिर्मया त्वां प्रत्युक्ता, त्वया तु परिनिष्ठितेन कीर्त्तनादिकां भक्तिं कुर्व्वतापि लोकसंग्रहाय निखिलकर्म्मार्पणान्ममापि भक्तिः कार्य्येति भावेनाह—यदिति । यत्त्वं देहयात्रा-साधकं लौकिकं कर्म्म करोषि, यच्च देहधारणार्थं अन्नादिकमश्नासि, तथा यज्जुहोषि वैदिकमग्निहोत्रादिहोममनुतिष्ठसि, यच्च सत्पात्रेभ्यः अन्नहिरण्यादिकं ददासि, प्रत्यब्दमज्ञातदुरितक्षतये चान्द्रायणाद्याचरसि, तत् सर्व्वं मदर्पणं यथा स्यात्तथा कुरुष्व—तेन मन्निर्म्मितस्यास्य लोकस्य संग्रहात्त्वयि मत्प्रसादो भूयान् भावीति । न चेयं सर्व्वकर्म्मार्पणरूपा भक्तिः सनिष्ठानामिति वाच्यम्—तैर्वैदिकानामेव तत्रार्प्यमाणात् ; किन्तु परिनिष्ठितानामेवेयम्—तैः यत् करोषि इत्यादि स्वामिनिर्द्देशेन सर्व्वकर्म्मणां तत्रार्पणात् । ते हि स्वामिनो लोकसंग्रहं प्रयाससमर्पनिनीषवस्तथा तान्याचरन्तस्तं प्रसादयन्तीति ॥२७॥

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।
संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥२८॥

सारा०ब०—शुभाशुभफलैरनन्तैः कर्म्मरूपैर्बन्धनैर्विमोक्ष्यसे । "भक्तिरस्य भजनं तदिहामुत्रोपाधिनैरास्येनामुष्मिन्मनःकल्पनमेतदेव नैष्कर्म्म्यम्" इति श्रुतेः । सन्न्यासः कर्म्मफलत्यागः स एव योगः तेन युक्त आत्मा मनो यस्य सः । न केवलं युक्त एव भविष्यसि, अपि तु विमुक्तो मुक्तेष्वपि विशिष्टः सन् मामुपैष्यसि साक्षात् परिचरितुं मन्निकटमेष्यसि,—"मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने ॥" इति स्मृतेः । "मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगम्" इतिशुकोक्तेः, मुक्तेः सकाशादपि साक्षान्मत्प्रेमसेवया उत्कर्षोऽयमेवेति भावः ॥ २८ ॥

गी०भू०—ईदृशभक्तेः फलमाह-शुभेति । एवं मन्निदेशकृतायां सर्व्वकर्म्मार्पणलक्षणायां भक्तौ सत्यां कर्म्मरूपैर्बन्धनैस्त्वं मोक्ष्यसे । कीदृशैरित्याह-शुभेतीष्टानिष्टफलैस्तत्प्राप्तिप्रतीपैः प्राचीनैरित्यर्थः । कीदृशस्त्वमित्याह, संन्यासेति मयि कर्म्मार्पणं संन्यासः, स एव चित्तविशोधकत्वाद्योगस्तद्युक्त आत्मा मनो यस्य सः । न केवलं मुक्त एव कर्म्मभिर्भविष्यस्यपि तु विमुक्तः सन् मामुपैष्यसि-मुक्तेषु विशिष्टः सन् मां साक्षात् सेवितुं मदन्तिकं प्राप्स्यसि ॥२८॥

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः ।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ॥२९॥

सारा०ब०—ननु भक्तानेव विमुक्तीकृत्य स्वं प्रापयसि, न त्वभक्तानिति चेत्तर्हि तवापि किं रागद्वेषादिकृतं वैषम्यमस्ति ? नेत्याह-समोऽहमिति । ते भक्ता मयि वर्त्तन्ते, अहमपि तेषु वर्त्ते इति व्याख्याने भगवत्येव सर्व्वं जगद्वर्त्तत एव, भगवानपि सर्व्वजगत्सु वर्त्तत एव इति नास्ति विशेषः, तस्मात् "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इति न्यायेन, मयि ते आसक्ता भक्ता वर्त्तन्ते यथा तथाहमपि तेष्वासक्त इति व्याख्येयम । अत्र कल्पवृक्षादिदृष्टान्तस्त्वेकांशेनैव ज्ञेयः, न हि कल्पवृक्षफलाकाङ्क्षया तदाश्रिता आसज्जन्ति नापि कल्पवृक्षः स्वाश्रितेष्वासक्तः नापि स आश्रितस्य वैरिणो द्वेष्टि, भगवांस्तु स्वभक्तवैरिणं स्वहस्तेनैव हिनस्ति; यदुक्तं प्रल्हादाय-"यदा द्रुह्येद्धनिष्येऽपि वरोर्जितम्" इति । केचित्तु तु-कारस्य भिन्नोपक्रमार्थत्वमाख्याय भक्तवात्सल्यलक्षणन्तु वैषम्यं मयि विद्यत एवेति, तच्च भगवतो भूषणं न तु दूषणमिति व्याचक्षते । तथा हि भगवतो भक्तवात्सल्यमेव प्रसिद्धं न तु ज्ञानि-

वात्सल्यं योगिवात्सल्यं वा—यथा ह्यन्यो जनः स्व-दासेष्वेव वत्सलो, नान्यदासेषु तथैव भगवानपि स्वभक्तेष्वेव वत्सलो न रुद्रभक्तेषु, नापि देवीभक्तेष्विति ॥ २९ ॥

गी०भू०—ननु भक्तानेव विमोच्यान्तिकं नयसि, नाभक्तानिति तवापि किं सर्व्वेश्वरस्य रागद्वेषकृतं वैषम्यमस्ति ? तत्राह-समोऽहमिति । देवमनुष्यतिर्य्यक्स्थावरादिषु जात्याकृतिस्वभावैर्विषमेषु सर्व्वेषु भूतेषु तत्तत्कर्म्मानुगुण्येन सृष्टिपालनकृत् सर्व्वेश्वरोऽहं समः पर्जन्य इव नानाविधेषु तत्तद्वीजेषु, न तेषु मे कोऽपि द्वेष्यः प्रियो वेत्यर्थः । भक्तानामभक्तेभ्यो विशेषं बोधयितुमिह तु-शब्दः । ये तु मां भजन्ति श्रवणादिभक्तिभिरनुकूलयन्ति, ते भक्त्यानुरक्त्या मयि वर्त्तन्ते, तेष्वहं च सर्व्वेश्वरोऽपि भक्त्या वर्त्ते-'मणिसुवर्ण'-न्यायेन भगवतोऽपि भक्तेषु भक्तिरस्ति-"भगवान् भक्तभक्तिमान्" इत्यादि-श्रीशुकवाक्यादिति प्रेम्णा मिथो वर्त्तनविशेषो दर्शितः । अन्यथा त्वविशेषापत्तिः । तस्य प्रतिज्ञा त्वीदृश्येवावगम्यते-"ये यथा माम्" इत्यादिना । कल्पद्रुमदृष्टान्तोऽप्यत्रांशिक एव-तत्र मिथः प्रीत्यप्रतीतेः पक्षपाताप्रतीतेश्च ; तथाच सर्व्वत्राविषमेऽपि मयि स्वाश्रितवात्सल्यलक्षणं वैषम्यमस्तीत्युक्तम् । एवमाह सूत्रकारः-"उपपद्यते चाभ्युपलभ्यते च" इति । ननु भक्तेरपि कर्म्मत्वानुसारेण तेषु तद्वात्सल्यान्न तल्लक्षणे तदिति चेन्मैवमेतत्-स्वरूपशक्तिवृत्तेर्भक्तेः कर्म्मान्यत्वात् । श्रुतिश्च, "सच्चिदानन्दैकरसे भक्तियोगे तिष्ठति" इति । न च स्वरूपप्रयुक्तत्वाद्दूषणमेतदिति वाच्यम्-गुणश्रेष्ठत्वेन स्तूयमानत्वात् ॥२९॥

अपि चेत्सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥३०॥

सारा०ब०--स्वभक्तेष्वासक्तिर्मम स्वाभाविक्येव भवति सा दुराचारेऽपि भक्ते नापयाति तमप्युत्कृष्टमेव करोमीत्याह–अपि चेदिति। सुदुराचारः परहिंसा-परदार-परद्रव्यादिग्रहण-परायणोऽपि मां भजते चेत्,कीदृग्भजनवानित्यत आह–अनन्य-भाक् मत्तोऽन्यदेवतान्तरं मद्भक्तेरन्यत् कर्म्मज्ञानादिकं, मत्काम-नातोऽन्यां राज्यादिकामनां न भजते स साधुः। नन्वेतादृशे कदाचारे दृष्टे सति कथं साधुत्वम्? तत्राह–मन्तव्यो मननीयः साधुत्वेनैव स ज्ञेय इति यावत्; मन्तव्यमिति विधिवाक्यं अन्यथा प्रत्यवायः स्यात्; अत्र मदाज्ञैव प्रमाणमिति भावः। ननु त्वां भजत इत्येतदंशेन साधुः परदारादिग्रहणांशेनासाधुश्च स मन्तव्यस्तत्राह–एवेति। सर्व्वेणाप्यंशेन साधुरेव मन्तव्यः कदापि तस्यासाधुत्वं न द्रष्टव्यमिति भावः। सम्यग्व्यवसितं निश्चयो यस्य सः। दुस्त्यजेन स्वपापेन नरकं तिर्य्यग् योनीर्वा यामि ऐकान्तिकं श्रीकृष्णभजनन्तु नैव जिहासामीति स शोभनमध्यवसायं कृतवा-नित्यर्थः ॥ ३० ॥

गी०भू०—मम शुद्धभक्तिवश्यता-लक्षणः स्वभावो दुस्त्यज एव; यदहं जुगुप्सितकर्म्मण्यपि भक्तेऽनुरज्यंस्तमुत्कर्षयामीति पूर्व्वार्थं पुष्णन्नाह–अपि चेदिति। अनन्यभाक् जनश्चेत् सुदुरा-चारोऽतिविगर्हितकर्म्मापि सन् मां भजते–मत्कीर्त्तनादिभिर्मां सेवते, तदापि स साधुरेव मन्तव्य; मत्तोऽन्यां देवतां न भज-त्याश्रयतीति मदेकान्ती मामेव स्वामिनं परमपुमर्थञ्च जानन्नि-त्यर्थः। उभयथा वर्त्तमानोऽपि साधुत्वेन स पूज्य इति बोध-यितुमेव-कारः। तस्य तथात्वेन मनने 'मन्तव्य' इति स्वनिदेश-रूपो विधिश्च दर्शितः–इतरथा प्रत्यवायादिति भावः। उभय-थापि वर्त्तमानस्य साधुत्वमेवेत्यत्रोक्तः हेतुः पुष्णन्नाह–सम्य-गिति-यदसौ सम्यग्व्यवसितो मदेकान्तनिष्ठारूप-श्रेष्ठनिश्चयवा-

नित्यर्थः। एवमुक्तं नारसिंहे–"भगवति च हरावनन्यचेता भृश-मलिनोऽपि विराजते मनुष्यः। न हि शशकलुषच्छविः कदाचि-त्तिमिरपराभवतामुपैति चन्द्र"इति॥३०॥

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति।
कौन्तेय प्रति जानीहि न मे भक्तः प्रणश्यति ॥३१॥

सारा०ब०—ननु तादृशस्याधर्मिणः कथं भजनं त्वं गृह्णासि कामक्रोधादिदूषितान्तःकरणेन निवेदितमन्नपानादिकं कथमश्ना-सीत्यत आह--क्षिप्रं शीघ्रमेव स धर्म्मात्मा भवति। अत्र क्षिप्रं भावी स धर्म्मात्मा शश्वच्छान्तिं गमिष्यति इति अप्रयुज्य भवति गच्छति इति वर्त्तमानप्रयोगात् अधर्म्मकरणानन्तरमेव मामनुस्मृत्य कृतानुतापः क्षिप्रमेव धर्म्मात्मा भवति। हन्त हन्त! मत्तुल्यः कोऽपि भक्तलोकं कलङ्कयन्नधमो नास्ति, तद्धिङ्मा-मिति शश्वत् पुनः पुनरपि शान्तिं निर्व्वेदं नितरां गच्छति, यद्वा, कियतः समयादनन्तरं तस्य भावि धर्म्मात्मत्वं तदानीमपि सूक्ष्मरूपेण वर्त्तत एव। तन्मनसि भक्तेः प्रवेशात् यथा पीते महौ-षधे सति तदानीं कियत्कालपर्य्यन्तं नश्यदवस्थो ज्वरदाहो वा विषदाहो वर्त्तमानोऽपि न गण्यत इति ध्वनिः। ततश्च तस्य भक्तस्य दुराचारत्वगमकाः कामक्रोधाद्या उत्खातदंष्ट्रोरगदंशवदकिञ्चित्करा एव ज्ञेया इत्यनुध्वनिः। अतएव शश्वत् सर्व्वदैव शान्तिं काम-क्रोधाद्युपशमं नितरां गच्छति अतिशयेन प्राप्नोतीति दुरा-चारत्वदशायामपि स शुद्धान्तःकरण एवोच्यत इति भावः। ननु यदि स धर्म्मात्मा स्यात्तदा नास्ति कोऽपि विवादः, किन्तु कश्चिद्दुराचारभक्तो जन्मपर्य्यन्तमपि दुराचारत्वं न जहाति तस्य का वार्त्तेत्यतो भक्तवत्सलो भगवान् सप्रौढ़ि सकोपमिवाह—कौन्तेयेति। मे भक्तो न प्रणश्यति, तदपि

द्वितियोऽध्यायः

संजय उवाच—

तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम् ।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः॥१॥

श्रीभगवानुवाच--

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥२॥

सारा०व०—आत्मानात्म-विवेकेन शोकमोहतमो नुदन् ।
द्वितीये कृष्णचन्द्रोऽत्र प्रोचे मुक्तस्य लक्षणम् ॥ १ ॥

कश्मलं मोहः, विषमेऽत्र संग्रामसंकटे; कुतो हेतोः, उपस्थितं त्वां प्राप्तमभूत् ? अनार्यजुष्टम्—सुप्रतिष्ठितलोकैरसेवितम, अस्वर्ग्यमकीर्तिकरमिति—पारत्रिकैहिकसुखप्रतिकूलमित्यर्थः ॥२॥

गी०भू०—द्वितीये जीवयाथात्म्यज्ञानं तत्साधनं हरिः ।
निष्कामकर्म्म च प्रोचे स्थितप्रज्ञस्य लक्षणम् ॥

गी०भू०-- एवमर्ज्जुनवैराग्यमुपश्रुत्य स्वपुत्रराज्याभ्रंशाशया हृष्यन्तं धृतराष्ट्रमालक्ष्य सञ्जय उवाच--तं तथेति । मधुसूदन इति तस्य शोकमपि मधुवन्निहनिष्यतीति भावः ॥१॥

गी०भू०-- तद्वाक्यमनुवदति-श्रीभगवानिति । "ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशयः श्रियः । ज्ञानवैराग्ययोश्चापि षण्णां भग इतीङ्गना।" इति पराशरोक्तं रैश्वर्य्यादिभिः षड्भिर्नित्यं विशिष्टः, समग्रस्येत्येतत् षट्सु योज्यम् । हे अर्ज्जुन, इदं स्वधर्म्मवैमुख्यं कश्मलं शिष्टनिन्द्यत्वान्मलिनं कुतो हेतोस्त्वां क्षत्रियचूड़ामणिं समुपस्थितमभूत् ? विषमे युद्धसमये । न च मोक्षाय स्वर्गाय कीर्त्यै वैतद्युद्धवैराग्यमित्याह—अनार्य्येति, आर्य्यैर्मुमुक्षुभिर्न जुष्टं

प्राणनाशे अधःपातं न याति। कुतर्ककर्कशवादिनो नैतम्मन्ये-
रन्निति शोकशङ्काव्याकुलमर्ज्जुनं प्रोत्साहयति—हे कौन्तेय,
पटहकाहलादि--महाघोषपूर्व्वकं विवदमानानां सभां गत्वा बाहु-
मुत्क्षिप्य निःशङ्कं प्रतिजानीहि प्रतिज्ञां कुरु। कथम्? मे मम
परमेश्वरस्य भक्तो दुराचारोऽपि न प्रणश्यत्यपि तु कृतार्थ
एव भवति ततश्च ते तत्प्रौढ़िविजृम्भितविध्वंसितकुतर्काः सन्तो
निःसंशयं त्वामेव गुरुत्वेनाश्रयेरन् इति स्वामिचरणाः। ननु
कथं भगवान् स्वयमप्रतिज्ञाय प्रतिज्ञातुमर्ज्जुनमेवातिदिदेश,-
यथैवाग्रे "मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे" इति
वक्ष्यते तथैवात्रापि "कौन्तेय! प्रतिजानेऽहं न मे भक्तः प्रणश्यति"
इति कथं नोक्तम्? उच्यते--भगवता तदानीमेव विचारितं
भक्तवत्सलेन मया स्वभक्तापकर्षलेशमप्यसहिष्णुना स्वप्रतिज्ञां
खण्डयित्वापि स्वापकर्षमङ्गीकृत्यापि भक्तप्रतिज्ञैव रक्षिता बहुत्र;
यथा तत्रैव भीष्मयुद्धे स्वप्रतिज्ञामप्यपाकृत्य भीष्मप्रतिज्ञैव
रक्षिष्यते। बहिर्म्मुखा वादिनो वैतण्डिका मत्प्रतिज्ञां श्रुत्वा
हसिष्यन्ति, अर्ज्जुनप्रतिज्ञा तु पाषाणरेखेवेति ते प्रतियन्ति।
अतोऽर्ज्जुनमेव प्रतिज्ञां कारयामीत्यत्रैतादृशदुराचारस्याप्यनन्य-
भक्तिश्रवणादनन्यभक्ताभिधायकवाक्येषु सर्व्वत्र न विद्यतेऽ-
न्यत्स्त्रीपुत्राद्यासक्तिविधर्म्मशोकमोहकामक्रोधादिकं यत्रेति कुप-
ण्डितव्याख्या न ग्राह्येति॥ ३१॥

गी०भू०—ननु "नाविरतो दुश्चरितान्नाशान्तो नासमाहितः।
नाशान्तमनसो वापि प्रज्ञानेनैनमाप्नुयात्" इति दुराचारिणस्त-
द्वैमुख्यश्रवणात् कथं तस्य साधुत्वमिति चेत्तत्राह—क्षिप्रमिति।
स्वाभाविकदुराचारिविषयमिदं श्रवणं, मदेकान्ती तु मनसि धृते-
नातिपूतेन सर्व्वेश्वरेण मयागन्तुकं दुराचारं विनिर्धूय क्षिप्रमेव
धर्म्मात्मा सदाचारनिष्ठमना भवति; शश्वत् पुनःपुनरनुतप्यन्

मत्स्मृतिप्रतिकूलात्तस्माच्छान्तिं निवृत्तिं नितरां गच्छति। नन्व-
मत्स्मृतिप्रतिकूलात्तस्माच्छान्तिं निवृत्तिं नितरां गच्छति। नन्व-
कृतप्रायश्चित्तमेवं स्मार्त्ताः साधुं न मन्येरन्निति चेत्तत्र भक्तानु-
रक्तिविवशः सकोपमिवाह—कौन्तेयेति। त्वं तेषां सभां गतः
प्रतिजानीहि—मे ममैकान्ती भक्तः प्रमादात् सुदुराचारोऽपि न
प्रणश्यति—मत्तो भ्रष्टः सन् दुर्गतिं नाप्नोति—अपि तु तादृशेन
मया पूतो मत्प्राप्तियोग्यश्चकास्ति—"स्वपादमूलं भजतः प्रियस्य
त्यक्तान्यभावस्य हरिः परेशः। विकर्म्म यच्चोत्पतितं कथञ्चि-
द्धुनोति सर्व्वं हृदि सन्निविष्टः॥" इत्यादि स्मृतिभ्यः। स्मार्त्तैस्तु
मदेकान्तितोऽन्यत्र विधायकैर्भाव्यं—स्मार्त्तं प्रायश्चित्तमपेक्ष्य
यदुक्तं, मत्स्मृतिरूपं तत्तु प्रबलमिति सुकुलीनैरेव, न तु दुष्कु-
लीनैराहर्त्तव्यमिति बोधयितुं कौन्तेयेति॥३१॥

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्॥३२

सारा०व०—एवं कर्म्मणा दुराचाराणामागन्तुकान् दोषान्
मद्भक्तिर्न गणयतीति किं चित्रम्? यतो जात्यैव दुराचाराणां
स्वभाविकानपि दोषान् मद्भक्तिर्न गणयतीत्याह—मामिति।
पापयोनयोऽन्त्यजा म्लेच्छा अपि; यदुक्तम्—"किरातहूणान्ध्र-
पुलिन्दपुक्कशा, आभीरकङ्का यवनाः खशादयः। येऽन्ये च
पापास्तदुपाश्रयाश्रयाः, शुध्यन्ति तस्मै प्रभविष्णवे नमः॥"
"अहो बत श्वपचोऽतो गरीयान् यज्जिह्वाग्रे वर्त्तते नाम तुभ्यम्।
तेपुस्तपस्ते जुहुवुः सस्नुरार्य्या, ब्रह्मानूचुर्नाम गृणन्ति ये ते॥"
किं पुनः स्त्रीवैश्याद्या अशुद्धयलीकादिमन्तः?॥ ३२॥

गी०भू०—महाघोषपूर्व्वकं विवदमानानां सभां गत्वा बाहु-
मुत्क्षिप्य निःशङ्कं प्रतिजानीहि प्रतिज्ञां कुरु—सर्व्वेश्वरोऽहं मदे-
कान्तिनां आगन्तुकदोषान् विधुनोमीति किं चित्रम्? यदति-

पापिनोऽपि मद्भक्तप्रसङ्गाद्विधूताविद्या विमुच्यन्त इत्याह-मां हीति। ये पापयोनयोऽन्त्यजाः सहजदुराचाराः स्युस्तेऽपि मद्भक्तप्रसङ्गेन मां सर्व्वेशं वसुदेवसुतं व्यपाश्रित्य शरणमागत्य परां योगिदुर्लभां गतिं मत्प्राप्तिं यान्ति हि निश्चितमेतत्। एवमाह श्रीमान् शुकः-"किरातहूणान्ध्रपुलिन्दपुक्कशा आभीरकङ्का यवनाः खशादयः। येऽन्ये च पापा यदपाश्रयाश्रयाः शुध्यन्ति तस्मै प्रभविष्णवे नमः॥" इति। स्त्र्यादयो येऽशुद्धयलीकादिमन्तस्तेऽपि ॥३२॥

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥३३॥

सारा०ब०—ततोऽपि किं पुनर्ब्राह्मणाः पुण्याः सत्कुलाः सदाचाराश्च ये भक्ताः? तस्मात्त्वं मां भजस्व ॥ ३३ ॥

गी०भू०—किमिति। यद्येवं तर्हि ब्राह्मणा राजर्षयः क्षत्रियाश्च सत्कुलाः पुण्याः सदाचारिणो भक्ताः सन्तः परां गतिं यान्तीति किं पुनर्व्वाच्यम्? नास्त्यत्र संशय-लेशोऽपि; तस्मात्त्वमपि राजर्षिरिमं लोकं प्राप्य मां भजस्व अनित्यं नश्वरमसुखमीषत्सुखं विनाशिन्यल्पसुखेऽस्मिँल्लोके राज्यस्पृहां विहाय नित्यमनन्तानन्दं मामुपास्य प्राप्नुहीति त्वरात्र व्यज्यते। अत्रास्य लोकस्यानित्यत्वं कण्ठतो ब्रुवन् हरिर्मिथ्यात्वं तस्य निरासात् ॥३३

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥३४॥

सारा०ब०—भजनप्रकारं दर्शयन्नुपसंहरति-मन्मना इति। एवमात्मानं मनो देहञ्च युक्त्वा मयि नियोज्य ॥ ३४ ॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां भीष्मपर्व्वणि श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्ज्जुनसंवादे राजगुह्ययोगो नाम नवमोऽध्यायः।

सारा०ब०—पात्रापात्रविचारित्वं स्वस्पर्शात् सर्व्वशोधनम्।
भक्तेरेवात्रैतदस्या राजगुह्यत्वमीर्य्यते ॥
इति सारार्थवर्षिण्यां हर्षिण्यां भक्तचेतसाम्।
गीतासु नवमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥

गी०भू०—अथ परिनिष्ठितस्यार्ज्जुनस्याभीष्टां शुद्धां भक्तिमुपदिशन्नुपसंहरति-मन्मना इति। राजभक्तोऽपि राजभृत्यः पत्न्यादिमनास्तथा स तन्मना अपि न तद्भक्तो भवति; त्वं तु तद्विलक्षणभावेन मन्मना मद्भक्तो भव मयि नीलोत्पलश्यामलत्वादिगुणवति वसुदेवसूनौ स्वस्वामित्व-स्वपुमर्थत्वबुद्धयानवच्छिन्नमधुधारावत् सततं मनो यस्य सः, तथा मद्याजी तादृशस्यातिमात्रप्रियस्य ममार्च्चने निरतो भव; तादृशं मामतिप्रेम्णा नमस्कुरु दण्डवत् प्रणम। एवमात्मानं मनो देहञ्च युक्त्वा मयि निवेद्य मत्परायणो मदेकाश्रयः सन् मामुपैष्यसि। एषा भक्तिरर्पितैव क्रियेतेति बोध्यम् ॥३४॥

पात्रापात्रधिया शून्या स्पर्शात् सर्व्वाघनाशिनी।
गङ्गेव भक्तिरेवेति राजगुह्यमिह स्मृता ॥

इति श्रीमद्भगवद्गीतोपनिषद्भाष्ये नवमोऽध्यायः।

दशमोऽध्यायः

श्रीभगवानुवाच-

भूय एव महाबाहो शृणु मे परमं वचः।
यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥१॥

पर्व्वणि श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्ज्जुनसंवादे ज्ञानयोगो नाम चतुर्थोऽध्यायः ।

सारा०व०—उपसंहरति तस्मादिति । इत्थं हृद्गतं संशयं छित्त्वा योगं निष्कामकर्म्मयोगमातिष्ठाश्रय, उत्तिष्ठ युद्धं कर्त्तुमिति भावः ॥४२॥

उक्तेषु मुक्त्युपायेषु ज्ञानमत्र प्रशस्यते ।
ज्ञानोपायन्तु कर्म्मैवेत्यध्यायार्थो निरूपितः ॥ (२)
इति सारार्थवर्षिण्यां हर्षिण्यां भक्तचेतसाम् ।
गीतास्वयं चतुर्थो हि सङ्गतः सङ्गतः सताम् ॥

गी०भू०—तस्मादिति । इत्थं हृद्गतमात्मविषयकं संशयं मदुपदिष्टेन ज्ञानासिना छित्त्वा योगं निष्कामं कर्म मयोपदिष्टमातिष्ठ तदर्थमुत्तिष्ठेति ॥४२॥

द्व्यंशकं धान्यवत् कर्म्म तुषांशादिव तण्डुलः ।
श्रेष्ठं द्रव्यांशतो ज्ञानमिति तुर्य्यस्य निर्णयः ॥

इति श्रीभगवद्गीतोपनिषद्भाष्ये चतुर्थोऽध्यायः ।

पञ्चमोऽध्यायः

अर्ज्जुन उवाच—

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥१॥

सा०व०-प्रोक्तं ज्ञानादपि श्रेष्ठं कर्म्म तद्दार्ढ्यसिद्धये ।
तत्पदार्थस्य च ज्ञानं साम्याद्या अपि पञ्चमे ॥ (१)

सारा०व०—पूर्व्वाध्यायान्ते श्रुतेन बाक्यद्वयेन विरोधमाशङ्कमानः पृच्छति—सन्न्यासमिति । "योगसंन्यस्तकर्म्माणं ज्ञानसंछिन्नसंशयम् । आत्मवन्तं न कर्म्माणि निवध्नन्ति धनञ्जय ॥" इति बाक्येन त्वं कर्म्मयोगेनोत्पन्नज्ञानस्य कर्म्मसन्न्यासं ब्रूषे ; "तस्मादज्ञानसम्भूतं हृत्थं ज्ञानासिनात्मनः छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥" इत्यनेन पुनस्तस्यैव कर्म्मयोगञ्च ब्रूषे । न च कर्म्मसन्न्यासः कर्म्मयोगश्चैकस्यैकदैव सम्भवतः स्थितिगतिवद्बिरुद्धस्वरूपत्वात् । तस्मात् ज्ञानी कर्म्मसन्न्यासं कुर्य्यात् कर्म्मयोगं वा कुर्य्यादिति त्वदभिप्रायमनवगतोऽहं पृच्छामि-एतयोर्म्मध्ये यदेकं श्रेयस्त्वया सुनिश्चितं तन्मे ब्रूहि ॥१

गी०भू०—ज्ञानतः कर्म्मणः श्रैष्ठ्यं सुकरत्वादिना हरिः ।
शुद्धस्य तदकर्त्तृत्वं त्वेत्यादि प्राह पञ्चमे ॥

गी०भू०—द्वितीये मुमुक्षु प्रत्यात्मबिज्ञानं मोचकमभिधाय तदुपायतया निष्कामं कर्म्म कर्त्तव्यमभ्यधात् । लब्धविज्ञानस्य न किञ्चित् कर्म्मास्तीति "यस्त्वात्मरतिरेव स्यात्" इति तृतीये, "सर्बं कर्म्माखिलं पार्थ" इति चतुर्थे चावादीत्, अन्ते तु तस्मादज्ञानसम्भूतम्" इत्यादिना तस्यैव पुनः कर्म्मयोगं प्राबोचत् । तत्राऽर्ज्जुनः पृच्छति सन्न्यासमिति । हे कृष्ण ? कर्म्मणां सन्न्यासं सर्व्वेन्द्रियव्यापारबिरतिरूपं ज्ञानयोगमित्यर्थः, पुनर्योगं कर्म्मानुष्ठानञ्च सर्व्वेन्द्रियव्यापाररूपं शंससि । न चैकस्य युगपत्तौ संभवेतां स्थितिगतिवत्तामस्तेजोबच्च विरुद्धस्वरूपत्वात् । तस्माल्लब्धज्ञानः कर्म्म सन्न्यसेदनुतिष्ठेद्वेति भवदभिमतं वेत्तुमशक्तोऽहं पृच्छामि । एतयोः कर्म्मसन्न्यासकर्म्मानुष्ठानयोर्यदेकं श्रेयस्त्वया सुनिश्चितं तत्त्वं मे ब्रूहि इति ॥ १ ॥

भगवानुवाच—

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥२॥

सारा०व०--कर्म्मयोगो विशिष्यत इति ज्ञानिनः कर्मकरणे न कोऽपि दोषः ; प्रत्युत निष्कामकर्मणा चित्तशुद्धिदार्ढ्याज्ज्ञान-दार्ढ्यमेव स्यात् ; सन्न्यासिनस्तु कदाचिच्चित्तवैगुण्ये सति तदु-पशमनार्थं किं कर्म्म निषिद्धम् ? ज्ञानाभ्यासप्रतिबन्धकन्तु चित्त-वैगुण्यमेव, विषयग्रहणे तु वान्ताशित्वमेव स्यादिति भावः ॥२॥

गी०भू०—एवं पृष्टो भगवानुवाच,—सन्न्यास इति । निःश्रे-यसकरौ मुक्तिहेतु कर्म्मसन्न्यासाज् ज्ञानयोगाद्विशिष्यते श्रेष्ठो भवति । अयं भावः,—न खलु लब्धज्ञानस्यापि कर्म्मयोगो दोषावहः, किन्तु ज्ञानगर्भत्वाज् ज्ञानदार्ढ्यकृदेव । ज्ञाननिष्ठतया कर्म्मसन्न्यासिनस्तु चित्तदोषे सति तद्दोषविनाशाय कर्म्मानुष्ठेयं प्रतिषेधकशास्त्रात् । कर्म्मत्यागवाक्यानि त्वात्मनि रतौ सत्यां कर्म्माणि तं स्वयं त्यजन्तीत्याहुः । तस्मात् सुकरत्वादप्रमाद-त्वाज्ज्ञानगर्भत्वाच्च कर्म्मयोगः श्रेयानिति ॥२॥

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥३॥

सारा०व०-- न च सन्न्यासप्राप्यो मोक्षोऽकृतसन्न्यासेनैव तेन न प्राप्य इति वाच्यमित्याह—ज्ञेय इति । स तु शुद्धचित्तः कर्म्मी नित्यसन्न्यासी एव ज्ञेयः । 'हे महाबाहो' इति मुक्ति-नगरीं जेतुं स एव महावीर इति भावः ॥३॥

गी०भू०—कुतो विशिष्यते तत्राह—ज्ञेय इति । स विशुद्ध-चित्तः कर्म्मयोगी नित्यसन्न्यासी स सर्व्वदा ज्ञानयोगनिष्ठो

ज्ञेयः, यः कर्म्मान्तर्गतात्मानुभवानन्दपरितृप्तस्ततोऽन्यत किञ्चित न काङ्क्षति, न च द्वेष्टि, निर्द्वन्द्वो द्वन्द्वसहिष्णुः सुखमनायासेन सुकरकर्म्मनिष्ठयेत्यर्थः ॥३॥

सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥४॥

सारा०व०--तस्माद्यच्छ्रेय एवैतयोरिति त्वदुक्तमपि वस्तुतो न घटते, विवेकिभिरुभयोः पार्थक्याभावस्य दृष्टत्वा-दित्याह--सांख्ययोगाविति । सांख्य-शब्देन ज्ञाननिष्ठावाचिना तदङ्गः सन्न्यासो लक्ष्यते । सन्न्यास-कर्म्मयोगौ पृथक् स्वतन्त्रा-विति बाला वदन्ति न तु विज्ञाः, 'ज्ञेयः स नित्यसन्न्यासी' इति पूर्व्वोक्तेः, अत एकमपीत्यादि ॥४॥

गी०भू०—यः श्रेय एतयोरेकमिति त्वद्वाक्यञ्च न घटत इत्याह-सांख्येति—ज्ञानयोगकर्म्मयोगौ फलभेदात् पृथग्भूता-विति बालाः प्रवदन्ति, न तु पण्डिताः । अतएव एकमित्यादि-फलमात्मावलोकलक्षणम् ॥४॥

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥५॥

सारा०व०--एतदेव स्पष्टयति--यदिति । सांख्यैः सन्न्यासेन योगैर्निष्कामकर्म्मणा, बहुवचनं गौरवेण, अतएव तद्द्वयं पृथग्-भूतमपि यो विवेकेनैकमेव पश्यति स पश्यति-चक्षुष्मान् पण्डित इत्यर्थः ॥५॥

गी०भू०—एतद्विशदयति-यदिति । सांख्यैर्ज्ञानयोगिभिर्योगैः निष्कामकर्म्मभिः "अर्श आद्यच्" । स्थानमात्मावलोकलक्षणम्-'तिष्ठन्त्यस्मिन्', न तु कदाचित् प्रच्यवन्त इति व्युत्पत्तेः । अत-

एव तद्द्वयं निवृत्तिप्रवृत्तिरूपतया भिन्नरूपमपि फलैक्यादेकं यः पश्यति वेत्ति, स पश्यति स चक्षुष्मान् पण्डित इत्यर्थः ॥५॥

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ॥६॥

सारा०व०--किन्तु सम्यक् चित्तशुद्धिमनिद्धार्यतो ज्ञानिनः सन्न्यासो दुःखदः कर्म्मयोगस्तु सुखद एवेति पूर्व्वव्यञ्जितमर्थं स्पष्टमेवाह--सन्न्यासस्त्विति । चित्तवैगुण्ये सतीति शेषः । अयोगतः कर्म्मयोगाभावाच्चित्त--वैगुण्यप्रशामककर्म्मयोगस्य सन्न्यासिन्यभावात् तत्रानधिकारादित्यर्थः। सन्न्यासो दुःखमेव प्राप्तुं भवति । तदुक्तं वार्त्तिककृद्भिः--"प्रमादिनो बहिश्चित्ताः पिशुनाः कलहोत्सुकाः । सन्न्यासिनोऽपि दृश्यन्ते दैवसंदूषिताशयाः ॥" इति, श्रुतिरपि--"यदि न समुद्धरन्ति यतयो हृदि कामजटाः" इति, भगवतापि--"यस्त्वसंयतषड्वर्गः" (भा ११ । १८ । ४०) इत्याद्युक्तम् । तस्माद्योगयुक्तः निष्काम-कर्म्मवान् मुनिर्ज्ञानी सन् ब्रह्म शीघ्रं प्राप्नोति ॥६॥

गी०भू०--ज्ञानयोगस्य दुष्करत्वात् सुकरकर्म्मयोगः श्रेयानित्याह—सन्न्यासस्त्विति । सन्न्यासः सर्व्वेन्द्रियव्यापारविनिवृत्तिरूपो ज्ञानयोग अयोगतः कर्म्मयोगं विना दुःखं प्राप्तुं भवति-दुष्करत्वात् सप्रमादत्वाच्च दुःखहेतुरेव स्यादित्यर्थः । योगयुक्तनिष्कामकर्म्मी तु मुनिरात्ममननशीलः सन्नचिरेण शीघ्रमेव ब्रह्माधिगच्छति ॥६॥

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥७॥

सारा०व०--कृतेनापि कर्म्मणा ज्ञानिनस्तस्य न लेप इत्याह—

योगेति । योगयुक्तो ज्ञानी त्रिविधः—विशुद्धात्मा विजितबुद्धिरेकः, विजितात्मा विशुद्धचित्तो द्वितीयः, जितेन्द्रियस्तृतीय इति पूर्व्वपूर्व्वेषां साधनतारतम्यादुत्कर्षः । एतादृशे गृहस्थे तु सर्व्वेऽपि जीवा अनुरज्यन्तीत्याह--सर्व्वेषामपि भूतानामात्मभूतः प्रेमास्पदीभूत आत्मा देहो यस्य सः ॥७॥

गी०भू०—ईदृशो मुमुक्षुः सर्व्वेषां प्रेयानित्याह-योगेति-योगे निष्कामे कर्म्मणि युक्तो निरतः, अतएव विशुद्धात्मा निर्म्मलबुद्धिः, अतएव विजितात्मा वशीकृतमनाः, अतएव जितेन्द्रियः शब्दादि-विषयरागशून्यः, अतएव सर्व्वेषां भूतानां जीवानामात्मभूतः प्रेमास्पदतां गत आत्मा देहो यस्य सः । न चात्र पार्थसारथिना सर्व्वात्मैक्यमाभिमतम् ,-"न त्वेवाहम्" इत्यादिना सर्व्वात्मनां मिथो भेदस्य तेनाभिधानात् , तद्वादिनापि विज्ञाज्ञाभेदस्य वक्तुमशक्यत्वाच्च । एवम्भूतः कुर्व्वन्नपि विविक्तात्मानुसन्धानादनात्मन्यात्माभिमानेन न लिप्यते अचिरेणात्मानमधिगच्छति । अतः कर्म्मयोगः श्रेयान् ॥७॥

नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्श्वसन् ॥८॥
प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥९॥

सारा०व०--येन कर्म्मणा लेपस्तं प्रकारं शिक्षयति—नैवेति । युक्तः कर्म्मयोगी दर्शनादीनि कुर्व्वन्नपीन्द्रियार्थेषु वर्त्तन्त इति धारयन् बुद्ध्या निश्चिन्वन् निरभिमानः किञ्चिदप्यहं नैव करोमीति मन्येत ॥८-९॥

गी०भू०—शुद्धस्यात्मनोऽधिष्ठानादि-पञ्चापेक्षित-कर्म्मकर्त्तृत्वं

नास्तीति उपदिशति—नैवेति। युक्तो निष्कामकर्म्मी प्राधानिकदेहेन्द्रियादिसंसर्गादर्शनादीनि कर्म्माणि कुर्व्वन्नपि तत्त्ववित् विविक्तमात्मतत्त्वमनुभवन् इन्द्रियार्थेषु रूपादिषु इन्द्रियाणि चक्षुरादीनि मद्वासनानुगुणपरमात्मप्रेरितानि वर्त्तन्त इति धारयन्निश्चिन्वन्नहं किञ्चिदपि न करोमीति मन्यते। पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन्निति चक्षुःश्रोत्रत्वग्घ्राणरसनानां ज्ञानेन्द्रियाणां दर्शनश्रवणस्पर्शनघ्राणाशनानि व्यापाराः; गच्छन् प्रलपन् विसृजन् गृह्णन् इति गमनादयः कर्म्मेन्द्रियव्यापाराः। तत्र गमनं पादयोः प्रलापो वाचः विसर्गानन्दः पायूपस्थयोः ग्रहणं हस्तयो इति बोध्यम्, श्वसन्निति प्राणादीनामुन्मिषन्निमिषन्निति नागादीनां प्राणभेदानां, स्वपन्नित्यन्तःकरणानामित्यर्थः क्रमाद्व्याख्येयम्। विज्ञानसुखैकरसस्य ममानादिवासनाहेतुकप्राधानिकदेहादिसम्बन्धनिम्मितं तदीदृशकर्म्मकर्त्तृत्वम्, न तु स्वरूपैकनिम्मितमिति मन्यत इत्यर्थः। न स्वरूपप्रयुक्तमात्मनः कर्त्तृत्वं किञ्चिदपि नास्तीति शक्यमभिधातुं निर्द्धारणे मनने च तस्याभिधानात्। तच्च ज्ञानमेव तच्चात्मनो नित्यं—"न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते" इति श्रुतेः। तत्सिद्धिश्च—"हरिणा धर्म्मभूतेन ज्ञानेन च" इत्याहुः ॥८-९॥

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥१०॥

सारा०व०—किञ्च, ब्रह्मणि परमेश्वरे मयि कर्म्माणि समर्प्य सङ्गं त्यक्त्वा साभिमानोऽपि कर्म्मासक्तिं विहाय यः कर्म्माणि करोति। पापेनेत्युपलक्षणम्। सोऽपि कर्म्ममात्रेणैव न लिप्यते ॥१०

गी०भू०—उक्तं विशदयन्नाह—ब्रह्मणीति। ब्रह्म-शब्देनात्र त्रिगुणावस्थं प्रधानमुक्तम्, "तस्मादेतद्ब्रह्म नामरूपमन्नञ्च

जायते" इति श्रवणात्, "मम योनिर्महद्ब्रह्म" इति वक्ष्यमाणाच्च। देहेन्द्रियादीनि प्रधानपरिणामविशेषाणि भवन्ति तद्रूपतया परिणते प्रधाने दर्शनादीनि कर्म्माण्याधाय तस्यैवैतानि, न तु तद्विविक्तस्य शुद्धस्य ममेति निर्द्धार्य्येत्यर्थः। सङ्गं तत्फलाभिलाषं तत्कर्त्तृत्वाभिनिवेशं च त्यक्त्वा यस्तानि करोति, स तादृग्देहादिमत्तया सन्नपि देहाद्यात्माभिमानेन पापेन न लिप्यते—यथोपरिनिक्षिप्तेनाम्भसा स्पृष्टमपि पद्मपत्रं तद्वत्। न च "मयि संन्यस्य कर्म्माणि" इति पूर्व्वस्वारस्याद्ब्रह्मणि परमात्मनीति व्याख्येयम्। प्राधानिकदेहादिसंसृष्टस्यैव जीवस्य दर्शनादिकर्म्मकर्त्तृत्वं, न तु तद्विविक्तस्येत्यर्थस्य प्रकृतत्वात् ॥१०॥

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि।
योगिनः कर्म्म कुर्व्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥११॥

सारा०व०—केवलैरपीन्द्रियैरिति। 'इन्द्राय स्वाहा' इत्यादिना हविराद्यर्पणकाले यद्यपि मनः काप्यन्यत्र तदपीत्यर्थः। आत्मशुद्धये मनःशुद्ध्यर्थम् ॥११॥

गी०भू०—सदाचारं प्रमाणयन्नेतद्विवृणोति—कायेनेति। कायादिभिः साध्यं कर्म्म कायाद्यहंभावशून्या योगिनः कुर्व्वन्ति। केवलैर्विशुद्धैः। सङ्गं त्यक्त्वेति प्राग्वत् आत्मशुद्धये अनादिदेहात्माभिमाननिवृत्तये ॥११॥

युक्तः कर्म्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥१२॥

सारा०व०—कर्म्मकरणेऽनासक्त्यासक्ती एव मोक्षबन्धहेतू इत्याह—युक्तो योगी निष्कामकर्म्मीत्यर्थः। नैष्ठिकीं निष्ठाप्राप्तां शान्तिं मोक्षमित्यर्थः। अयुक्तः सकाम-कर्म्मीत्यर्थः। कामकारेण कामप्रवृत्त्या ॥१२॥

गी०भू०—युक्त आत्मार्पितमनाः कर्म्मफलं त्यक्त्वा कुर्व्वन्नैष्ठिकीं स्थिरां शान्तिमात्मावलोकलक्षणामाप्नोति। अयुक्त आत्मानर्पितमनाः कर्म्मफले सक्तः कामकारेण कामतः कर्म्माणि प्रवृत्त्या निवध्यते संसरति॥१२॥

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन्॥१३॥

सारा०व०—अतोऽनासक्तः कर्म्माणि कुर्व्वन्नपि 'ज्ञेयः स नित्यसन्न्यासी' इति पूर्व्वोक्तवत् वस्तुतः सन्न्यासी एवोच्यत इत्याह—सर्व्वकर्म्माणि मनसा संन्यस्य कायादिव्यापारेण वहिष्कुर्व्वन्नपि वशी जितेन्द्रियः सुखमास्ते। कुत्र?—नवद्वारे पुरे पुरवदहं-भावशून्ये देहे देही उत्पन्नज्ञानो जीवो नैव कुर्व्वन्निति कर्म्मसुखस्य वस्तुतः कर्त्तृत्वं नैवास्तीति जानन्, न कारयन्निति नापि तेषु स्वस्य प्रयोजकत्वमित्यपि जानन्नित्यर्थः॥१३॥

गी०भू०—सर्व्वेति। विवेकवता मनसा तादृशि प्रधाने सर्व्वकर्म्माणि संन्यस्यार्पयित्वा देहादिना वहिस्तानि कुर्व्वन्नपि वशी जितेन्द्रियः सुखमास्ते। नवद्वारे पुरे पुरवदहम्भाववर्जिते देहे—द्वे नेत्रे द्वे नासिके द्वे श्रोत्रे मुखञ्चेति शिरसि सप्त द्वाराणि अधस्तात्तु पायूपस्थाख्ये द्वे इति नव द्वाराणि देही लब्धज्ञानो जीवः। नैवेति—देहादिविविक्तस्यात्मनः कर्म्मसु कर्त्तृत्वं कारयितृत्वञ्च नास्तीति विजानन्नित्यर्थः।१३॥

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते॥१४॥

सारा०व०—ननु च यदि जीवस्य वस्तुतः कर्त्तृत्वादिकं नैवास्ति, तर्हि परमेश्वरसृष्टे जगति सर्व्वत्र जीवस्य कर्त्तृत्वभोक्तृत्वादि-दर्शनान्मन्ये परमेश्वरेणैव बलात्तस्य कर्त्तृत्वादिकं सृष्टम्। तथा सति तस्मिन् वैषम्य-नैर्घृण्ये प्रसक्ते, तत्र न हि न हीत्याह—न कर्त्तृत्वमिति। नापि तत्कर्त्तव्यत्वेन कर्म्माण्यपि, न च कर्म्मफलैर्भोगैः संयोगमपि, किन्तु जीवस्य स्वभावोऽनाद्यविद्यैव प्रवर्त्तते, तं जीवं कर्त्तृत्वाद्यभिमानमारोहयितुमिति भावः॥१४॥

गी०भू०—एतद्द्वयं शुद्धस्य नास्तीति विशदयति—नेति। प्रभुर्देहेन्द्रियादीनां स्वामी जीवो लोकस्य जनस्य कर्त्तृत्वं न सृजतीति त्वं कुर्व्विति कारयिता न भवति, नापि तस्येप्सिततमानि कर्म्माणि माल्याम्बरादीनि सृजतीति स्वयं कर्त्तापि न भवति। न च कर्म्मफलेन सुखेन दुःखेन च संयोगं सम्बन्धं सृजतीति भोजयिता भोक्ता च न भवतीत्यर्थः। यद्येवं, तर्हि कः कारयन् कुर्व्वंश्च प्रतीयते? तत्राह—स्वभावस्त्विति। अनादिप्रवृत्ता प्रधानवासनात्र स्वभावशब्देनोक्तप्राधानिकदेहादिमान् जीवः कारयिता कर्त्ता चेति न विविक्तस्य तत्त्वमिति। शुद्धेऽपि किञ्चित्कर्त्तृत्वमस्त्येव पूर्व्वत्र सुखासने तत्त्वस्योक्तेः भानादाविवैतद्बोध्यं, धात्वर्थः खलु क्रिया, तन्मुख्यत्वं हि कर्त्तृत्वमुक्तम्॥१४॥

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः॥१५॥

सारा०व०—यस्मादसाधु-साधुकर्म्मणामीश्वरो न कारयिता, तस्मादेव न तस्य पापपुण्यभागित्वमित्याह—नादत्ते न गृह्णाति, किन्तु तदीया खलु या शक्तिरविद्या, सैव जीवज्ञानमावृणोतीत्याह—अज्ञानेनाविद्यया। ज्ञानं जीवस्य स्वाभाविकम्, तेन हेतुना॥१५॥

गी०भू०—ननु यदि विशुद्धस्य जीवस्य तादृशकर्म्मकर्त्तृ-

त्वादि नास्तीति ब्रूषे, तर्हि कौतुकाक्रान्तः परमात्मा प्रधानं तद्गले निपात्य तत्परिणामदेहेन्द्रियादिमतस्तस्य तद्रचितवानित्यापद्यते। युक्तञ्चैतत्, अन्यथा "एष उ ह्येव साधु कर्म्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते। एष उ एवासाधु कर्म्म कारयति तं यमधो निनीषते" इति श्रुतिः। "अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः। ईश्वरप्रेरितो गच्छेत् स्वर्गं वाश्वभ्रमेव च॥" इति स्मृतिश्च व्याकुप्येत्। तथा च पापपुण्यमयीमवस्थां नयति। प्रयोजके तस्मिन् वैषम्यादिकं पापादिभागित्वञ्च स्यादिति चेत्तत्राह—नादत्त इति। विभुरपरिमितविज्ञानानन्दोऽनन्तशक्तिपूर्णः स्वानन्दैकरसिकस्ततोऽन्यत्रोदासीनः परमात्मानादिप्रधानवासनानिवन्धं वुभुक्षुं स्व-सन्निधिमात्रपरिणतप्रधानमयदेहादिमन्तं जीवं तद्वासनानुसारेण कर्म्माणि कारयन् कस्यचिज्जीवस्य पापं सुकृतञ्च नादत्तो न गृह्णाति, एवमुक्तं श्रीवैष्णवे—"यथा सन्निधिमात्रेण गन्धः क्षोभाय जायते। मनसो नोपकर्त्तृत्वात्तथासौ परमेश्वरः॥ सन्निधानाद्यथाकाशकालाद्याः कारणं तरोः। तथैवापरिणामेन विश्वस्य भगवान् हरिः॥" इति। औदासीन्यमात्रेऽयं गन्धादिदृष्टान्तो, न त्विच्छाया अभावे तस्याः—"सोऽकामयत" इति श्रुतत्वात्। तर्हि जीवास्तं विषमं कुतो वदन्ति, तत्राह—अज्ञानेनेति। अनादितद्वैमुख्येनाज्ञानेन जीवानां नित्यमपि ज्ञानमावृतं तिरोहितं तेन हेतुना जन्तवो जीवा मुह्यन्ति—सममपि तं विमूढा विषमं वदन्ति न विज्ञा इत्यर्थः। आह चैवं सूत्रकारः—"वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति", "न कर्म्माविभागादिति चेन्नानादित्वात्" इति॥१५॥

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्॥१६॥

सारा०व०—यथाऽविद्या तस्य ज्ञानमावृणोति, तथैवापरा तस्य विद्याशक्तिरविद्यां विनाश्य ज्ञानं प्रकाशयतीत्यर्थः। ज्ञानेन विद्याशक्त्याऽज्ञानमविद्याम्, तेषां जीवानां ज्ञानमेव कर्त्तृ, आदित्यवदित्यादित्यप्रभा यथान्धकारं विनाश्य घटपटादिकं प्रकाशयति, तथैव विद्यैवाविद्यां विनाश्य तज्जीवनिष्ठं ज्ञानं परमप्राकृतं प्रकाशयति। तेन परमेश्वरो न कमपि बध्नाति, नापि कमपि मोचयति। किन्त्वज्ञानज्ञाने प्रकृतेरेव धर्म्मः क्रमेण बध्नाति मोचयति च। कर्त्तृत्वभोक्तृत्व-तत्प्रयोजकत्वादयो बन्धकाः, अनासक्तिशान्त्यादयो मोचकाश्च प्रकृतेरेव धर्म्माः। किन्तु परमेश्वरस्यान्तर्य्यामित्व एव प्रकृतेस्ते ते धर्म्मा उद्बुध्यन्त इत्येतदंशेनैव तस्य प्रयोजकत्वमिति न तस्य वैषम्य-नैर्घृण्ये॥१६॥

गी०भू०—विज्ञा न मुह्यन्तीत्येतदाह—ज्ञानेनेति। "सर्वं ज्ञानप्लवेन" इति, "ज्ञानाग्निः सर्व्वकर्म्माणि" "न हि ज्ञानेन सदृशम्" इति चोक्तमहिम्ना सद्गुरुप्रसादलब्धेन स्वपरात्मविषयकेन ज्ञानेन येषां सत्प्रसङ्गिनां तद्वैमुख्यमज्ञानं नाशितं प्रध्वंसितं तेषां तज्ज्ञानं कर्त्तृपरं प्रकाशयति। देहादेः परं जीवं वैषम्यादिदोषात् परमीश्वरञ्च बोधयति। आदित्यवत् यथा रविरुदित एव तमो निरस्यन् यथावद्वस्तु प्रदर्शयति, तथा सद्गुरूपदेशलब्धमात्मज्ञानं यथावदात्मवस्त्विति। अत्र विनष्टाज्ञानानां जीवानां बहुत्वं निगदता पार्थसारथिना मोक्षे तेषां तद्दर्शितं औपाधिकत्वं तस्य प्रत्युक्तं "नेमे जनाधिपाः" इत्युपक्रमोक्तं च तत् सोपपत्तिकमभूत्॥१६॥

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः॥१७॥

सारा०व०—किन्तु विद्या जीवात्मज्ञानमेव प्रकाशयति, न

तु परमात्मज्ञानम्—"भक्त्याहमेकया ग्राह्यः" इति भगवदुक्तेः। तस्मात् परमात्मज्ञानार्थं ज्ञानिभिरपि पुनर्बिशेषतो भक्तिः कार्य्येत्यत आह--तद्बुद्धय इति। तत्पदेन पूर्व्वमुपक्रान्तो बिभुः परामृश्यते। तस्मिन् परमेश्वर एव बुद्धिर्येषां ते, तन्मननपरा इत्यर्थः। तदात्मानस्तन्मनस्कास्तमेव ध्यायन्त इत्यर्थः। तन्निष्ठाः "ज्ञानञ्च मयि संन्यसेत्" इति भगवदुक्तेः। देहाद्यतिरिक्तात्मज्ञानेऽपि सात्त्विके निष्ठां परित्यज्य तदेकनिष्ठास्तत्परायणास्तदीयश्रवण-कीर्त्तनपराः, यद्वक्ष्यते--'भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः। ततो मां तत्त्वतो ज्ञात्वा बिशते तदनन्तरम्॥" इति। ज्ञाननिर्धूतकल्मषा ज्ञानेन बिद्ययैव पूर्व्वमेव ध्वस्तसमस्ताबिद्याः ॥१७॥

गी०भू०—परमात्मन्यबैषम्यादि-ध्यायतां फलमाह—तदिति। तस्मिंस्तद्वैषम्यादिके गुणगणे बुद्धिर्निश्चयात्मिका येषां ते। तदात्मानस्तस्मिन्निबिष्टमनसः तन्निष्ठास्तत्तात्पर्य्यबन्तस्तत्परायणास्तत्समाश्रयाः, एवमभ्यस्तेन तद्बैषम्यादिगुणज्ञानेन निर्धूतकल्मषा बिनष्ट-तद्वैमुख्याः सन्त अपुनरावृत्तिं मुक्तिं गच्छन्तीति ॥१७॥

बिद्याबिनयसंपन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥१८॥

सारा०व०--ततश्च गुणातीतानां तेषां गुणमये बस्तुमात्र एव तारतम्यमयं बिशेषमजिघृक्षूणां समबुद्धिरेव स्यादित्याह-बिद्येति। ब्राह्मणे गवीति सात्त्विकजातित्वात्, हस्तिनि मध्यमे, शुनि च श्वपाके चेति तामसजातित्वादधमेऽपि तत्तद्विशेषाग्रहणात् समदर्शिनः पण्डिता गुणातीताः, बिशेषाग्रहणमेव समं गुणातीतं ब्रह्म, तद्द्रष्टुं शीलं येषां ते ॥१८॥

गी०भू०—तान् स्तौति—बिद्येति। तादृशे ब्राह्मणे श्वपाके चेति कर्म्मणैतौ बिषमौ गवि हस्तिनि शुनि चेति जात्यैते बिषमाः, एवं बिषमतया सृष्टेषु ब्राह्मणादिषु ये परमात्मानं समं पश्यन्ति, त एव पण्डिताः। तत्कर्म्मानुसारिणी तेन तेषां तथा तथा सृष्टिः, न तु रागद्वेषानुसारिणीति,-पर्ज्जन्यवत् सर्व्वत्र समः परमात्मेति ॥१८॥

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥१९॥

सारा०व०--समदृष्टित्त्वं स्तौति-इहैव इह लोक एव सृज्यत इति सर्गः संसारो जितः पराभूतः ॥१९॥

गी०भू०—इहेति—इह साधनदशायामेव तैः सर्गः संसारो जितः पराभूतः। कैः ?—येषां मनः साम्येऽबैषम्याख्ये ब्रह्मधर्म्मे स्थितं निबिष्टम्। कुतो ब्रह्माबिषमम्? तत्राह—निर्दोषं हीति। हि यतो ब्रह्म निर्दोषं रागद्वेषशून्यमतः सममबिषममित्यर्थः। यतो ब्रह्मण्यबैषम्यादिकं निश्चिक्युस्तस्मात् प्रपञ्चे तिष्ठन्तोऽपि ते ब्रह्मण्येव स्थिताः मुक्तिस्तेषां सुलभेत्यर्थः ॥१९॥

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम्।
स्थिरबुद्धिरसंमूढो ब्रह्मबिद् ब्रह्मणि स्थितः ॥२०॥

सारा०व०--एवं लौकिकप्रियाप्रियादिष्वपि तेषां साम्यमाह-न प्रहृष्येदिति। न प्रहृष्येत न प्रहृष्यति, नोद्विजेत् नोद्विजते। साधनदशायामेबमभ्यस्येदिति बिबक्षया बा लिङ्। असंमूढो हर्षशोकादीनामभिमाननिबन्धनत्वेन संमोहमात्रत्वात् ॥२०॥

गी०भू०-ब्रह्मणि स्थितस्य लक्षणमाह-नेति। बर्त्तमाने देहे स्थितः प्रारब्धाकृष्टं प्रियमप्रियञ्च प्राप्य न प्रहृष्येन्न चोद्विजेत्। कुतः ?-

स्थिरा स्वात्मनि बुद्धिर्यस्य सः, असंमूढोऽनित्येन देहेन नित्यमात्मानमेकीकृत्य मोहं न लब्धः, ब्रह्मवित् तादृशं ब्रह्मानुभवन्। एवंलक्षणो ब्रह्मणि स्थितो बोध्यः ॥२०॥

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥२१॥
ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥२२॥

साराॅव०--स च बाह्यस्पर्शेषु विषयसुखेष्वसक्तात्मा अनासक्तमनास्तत्र हेतुः--आत्मनि जीवात्मनि परमात्मानं विन्दति सति प्राप्ते यत् सुखं तदक्षयं सुखम् । स एवाश्नुते प्राप्नोति, न हि निरन्तरममृतास्वादिने मृत्तिका रोचत इति भावः ॥२१॥

साराॅव०--विवेकवानेव वस्तुतो विषयसुखेनैव सज्जतीत्याह--ये हीति ॥२२॥

गी०भू०—पौर्व्वापर्य्येण स्वपरात्मानावनुभवतीत्याह--बाह्येति । बाह्यस्पर्शेषु शब्दादिविषयानुभवेष्वसक्तात्मा सन् यदात्मनि स्वस्वरूपेऽनुभूयमाने सुखं तदादौ विन्दति, तदुत्तरं ब्रह्मणि परमात्मनि योगः समाधिस्तद्युक्तात्मा सन् यदक्षयं महदनुभवलक्षणं सुखं, तदश्नुते लभते ॥२१॥

गी०भू०--अदृष्टाकृष्टेषु विषयभोगेष्वनित्यत्वविनिश्चयान्न सज्जतीत्याह--ये हीति । संस्पर्शजा विषयजन्या विषयजन्या भोगाः सुखानि । स्फुटमन्यत् ॥२२॥

शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥२३॥

साराॅव०--संसारसिन्धौ पतितोऽप्येष एव योगी एष एव सुखीत्याह--शक्नोतीति ॥२३॥

गी०भू०--कामादि-वेगो हि ज्ञाननिष्ठा-प्रतिकूलोऽतस्तस्य सहने प्रयत्नवता भाव्यमित्याह--शक्नोतीति । कामात् क्रोधाच्चोद्भवति यो वेगो मनोनेत्रक्षोभादिवपुस्तमिह तदुद्भवकाल एवात्मानुभवप्रीत्या यः सोढुं निरोद्धुं शक्नोति शरीरविमोक्षणात् प्राक् यावच्छरीरत्यागम् , स एव युक्तः कृतात्मसमाधिः, स एव सुखी आत्मानुभवानन्दवान् । तथा तद्वेगसहने तीव्रप्रयत्नो योग्यः ॥२३॥

योऽन्तः सुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः ।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥२४॥

साराॅव०--यस्तु संसारातीतस्तस्य तु ब्रह्मानुभव एव सुखमित्याह--य इति । अन्तरात्मन्येव सुखं यस्य सः-यतोऽन्तरात्मन्येव रमते, अतोऽन्तरात्मन्येव ज्योतिर्दृष्टिर्यस्य सः ॥२४॥

गी०भू०--यत्प्रीत्या तं सोढुं शक्तस्तदाह-योऽन्तरिति । अन्तर्व्विचिनानुभूतेनात्मना सुखं यस्य सः, तेनैवारामः क्रीड़ा यस्य सः, तस्मिन्नेव ज्योतिर्दृष्टिर्यस्य सः । ईदृशो योगी निष्कामकर्म्मी ब्रह्मभूतो लब्धशुद्धजैवस्वरूपो ब्रह्माधिगच्छति परमात्मानं लभते । निर्व्वाणं मोक्षरूपं, तेनैव तल्लाभात् ॥२४॥

लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥२५॥

साराॅव०—एवं बहव एव साधनसिद्धा भवन्तीत्याह—लभन्त इति ॥ २५ ॥

गी०भू०--एवं साधनसिद्धा बहवो भवन्तीत्याह—लभन्त

इति । ऋषयस्तत्त्वद्रष्टारः, छिन्नद्वैधा विनष्टसंशयाः स्फुटमन्यत् ॥२५

कामक्रोधविमुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्त्तते विदितात्मनाम् ॥२६॥

सारा०व०——ज्ञात 'त्वं' पदार्थानामप्राप्तपरमात्मज्ञानानां कियता कालेन ब्रह्मनिर्व्वाणसुखं स्यादित्यपेक्षायामाह--कामेति-यतचेतसामुपरतमनसां क्षीणलिङ्गशरीराणामित्ति यावत्, अभितः सर्व्वतोभावेनैव वर्त्तत एवेति ब्रह्मनिर्व्वाणे तस्य नैवार्तिविलम्ब-मिति भावः ॥ २६ ॥

गी०भू०---ईदृशान् परमात्माप्यनुवर्त्तत इत्याह--कामेति । यतीनां प्रयत्नवतां तानभितो ब्रह्म वर्त्तत इत्यर्थः । यदुक्तं--"दर्शनध्यानसंस्पर्शैर्मत्स्यकूर्म्मविहङ्गमाः । स्वान्यपत्यानि पुष्णन्ति तथाहमपि पद्मज ॥" इति ॥२६॥

स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः ।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥२७॥
यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥२८॥

सारा०व०——तदेवमीश्वरार्पितनिष्कामकर्म्मयोगेनान्तःकरण-शुद्धिः, ततो ज्ञानं 'त्वं' पदार्थविषयकम्, ततः 'तत्'पदार्थज्ञानार्थं भक्तिः, तदुत्थज्ञानेन गुणातीतेन ब्रह्मानुभव इत्युक्तम् । इदानीं निष्कामकर्म्मयोगेन शुद्धान्तकरणःस्याष्टाङ्गयोगं ब्रह्मानुभवसाधनं ज्ञानयोगादप्युत्कृष्टत्वेन षष्ठाध्याये वक्तुं तत्सुत्ररूपं श्लोकत्रय-माह—स्पर्शानिति । बाह्या एव शब्दस्पर्शरूपरसगन्धाः स्पर्श-शब्दवाच्याः । मनसि प्रविश्य ये वर्त्तन्ते तान्, तस्मान्मनसः

सकाशाद्बहिष्कृत्य विषयेभ्यो मन प्रत्याहृत्येत्यर्थः । चक्षुषी च भ्रुवोरन्तरे मध्ये कृत्वा नेत्रयोः सम्पूर्णनिमीलने निद्रया मनो लीयत उन्मीलनेन बहिः प्रसरति । तदुभयदोषपरिहारार्थमर्द्ध-निमीलनेन भ्रूमध्ये दृष्टिं निधायोच्छ्वास-निश्वासरूपेण नासिक-योरभ्यन्तरे चरन्तौ प्राणापानावूर्द्ध्वाधोगतिनिरोधेन समौ कृत्वा, यता वशीकृता इन्द्रियादयो येन सः ॥ २७–२८ ॥

गी०भू०---अथ कर्म्मणा निष्कामेण विशुद्धमनाः समुदि-तात्मज्ञानस्तद्दर्शनाय समाधिं कुर्य्यादिति साङ्गं योगं सूचयन्नाह–स्पर्शानिति । स्पर्शाः शब्दादयो विषयास्ते बाह्या एव स्मृताः सन्तो मनसि प्रविशन्ति, तांस्तत्स्मृतिपरित्यागेन बहिष्कृत्य विष-येभ्यो मनः प्रत्याहृत्येत्यर्थः । भ्रुवोरन्तरे मध्ये चक्षुश्च कृत्वा नेत्रयोः सन्निमीलने निद्रया मनसो लयः, प्रोन्मीलने च बहिस्तस्य प्रसारः स्यात्, तदुभयविनिवृत्तयेऽर्द्धनिमीलनेन भ्रूमध्ये दृष्टिं निधायेत्यर्थः । तथा नासाभ्यन्तरचारिणौ प्राणापानावूर्द्धाधोगति-निरोधेन समौ तुल्यौ कृत्वा कुम्भयित्वेत्यर्थः । एतेनोपायेन यता आत्मावलोकनाय स्थापिता इन्द्रियादयो येन सः, मुनिरात्ममनन-शीलः, मोक्षपरायणो मोक्षैकप्रयोजनः, अतो विगतेच्छादिः । ईदृशो यः सर्व्वदा फलकालवत् साधनकालेऽपि मुक्त एव ॥२७–२८

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥२९॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां भीष्म-पर्व्वणि श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्री-कृष्णार्ज्जुनसंवादे कर्म्मसंन्यासयोगो नाम पञ्चमोऽध्यायः ।

सारा०व०—एवम्भूतस्य योगिनोऽपि ज्ञानिन इव भक्त्य् त्थेन परमात्मज्ञानेनैव मोक्ष इत्याह—भोक्तारमिति । यज्ञानां कर्म्मिकृतानां तपसाञ्च ज्ञानिकृतानां भोक्तारं पालयितारमिति कर्म्मिणां ज्ञानिनां चोपास्यम्, सर्व्वलोकानां महेश्वरं महानियन्तारमन्तर्य्यामिनं योगिनामुपास्यम्, सर्व्वभूतानां सुहृदं कृपया स्वभक्तद्वारा स्वभक्त्युपदेशेन हितकारिणमिति भक्तानामुपास्यं मां ज्ञात्वेति सत्त्वगुणमयज्ञानेन निर्गुणस्य ममानुभवासम्भवात् "भक्त्याहमेकया ग्राह्यः" इति मदुक्तेः । निर्गुणया भक्त्यैव योगी स्वोपास्यं परमात्मानं मामपरोक्षानुभवगोचरीकृत्य शान्तिं मोक्षमृच्छति प्राप्नोति ॥ २९ ॥

निष्कामकर्म्मणा ज्ञानी योगी चात्र विमुच्यते ।
ज्ञात्वात्मपरमात्मानावित्यध्यायार्थ ईरितः ॥
इति सारार्थवर्षिण्यां हर्षिण्यां भक्तचेतसाम् ।
गीतासु पञ्चमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥

गी०भू०—एवं समाधिस्थः कृतस्वात्मावलोकनः परमात्मानमुपास्य मुच्यत इत्याह,—भोक्तारमिति । यज्ञानां तपसाञ्च भोक्तारं पालकम्, सर्व्वेषां लोकानां बिधिरुद्रादीनामपि महेश्वरम्—"तमीश्वराणां परमं महेश्वरम्" इत्यादिश्रवणात्, सर्व्वभूतानां सुहृदं निरपेक्षोपकारकम् । ईदृशं मां ज्ञात्वा स्वाराध्यतयानुभूय शान्तिं संसारनिवृत्तिमृच्छति लभते । सर्व्वेश्वरस्य सुहृदश्च समाराधनं खलु सुखाबहं सुखसाधनमिति ॥२९॥

निष्काकर्म्मणा योगशिरस्केन बिमुच्यते ।
सनिष्ठो ज्ञानगर्भेणेत्येष पञ्चमनिर्णयः ॥

इति श्रीमद्भगवद्गीतोपनिषद्भाष्ये पञ्चमोऽध्यायः ।

गी०भू०--ननु "अथ चेत्त्वम्" इत्यादिपद्यार्थो व्याहतः, राज्याद्युद्देशेन कृतस्य युद्धस्य गुरुविप्रादिविनाशहेतुत्वेन पापोत्पादकत्वादिति चेन्मुमुक्षुवर्त्मना युद्धमानस्य तव तद्विनाशहेतुकं पापं न स्यादित्याह--सुखेति। साम्यकरणमिह तत्र तत्र निर्व्विकारत्वं बोध्यम्, सुखे तद्धेतौ लाभे तद्धेतौ जये च रागमकृत्वा दुःखे तद्धेताबलाभे तद्धेताबजये च द्वेषमकृत्वा तत्र तत्र निर्व्विकारचित्तः सन् ततो युद्धाय युज्यस्व; केवलस्वधर्म्मधिया योद्धुमुद्युक्तो भवेत्यर्थः। एवं मुमुक्षुरीत्या योद्धा त्वं पापं तद्विनाशहेतुकं नावाप्स्यसि। फलेच्छुः सन् यो युध्यते स तत्पापं विन्दति, विज्ञानार्थी तु पुरातनमनन्तपापमपनुदतीत्यर्थः। ननु फलरागं विना दुष्करे युद्धदानादौ कथं प्रवृत्तिरिति चेदनन्तात्मानन्दरागं तत्र प्रवर्त्तकं गृहाण राज्याद्यनुरागमिव भृगुपाते ॥३८॥

एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥३९

सारा०व०--उपदिष्टं ज्ञानयोगमुपसंहरति--एषेति। सम्यक् ख्यायते प्रकाश्यते वस्तुतत्त्वमनेनेति सांख्यं सम्यक्ज्ञानम्; तस्मिन् करणीया बुद्धिरेषा कथिता। अधुना योगे भक्तियोगे इमां बक्ष्यमाणां बुद्धिं करणीयां शृणु, यया भक्तिविषयिण्या बुद्ध्या युक्तः सहितः; कर्म्मबन्धं संसारम् ॥३९॥

गी०भू०--उक्तं ज्ञानयोगमुपसंहरन् तदुपायं निष्कामकर्म्मयोगं बक्तुमारभते एषेति। संख्योपनिषत् "सम्यक् ख्यायते निरूप्यते तत्त्वमनया" इति निरुक्तेः तया प्रतिपाद्यमात्मयाथात्म्यं सांख्यम्। शैषिकान् तस्मिन् कर्त्तव्यैषा बुद्धिस्तवाभिहिता। "न त्वेवाहम्"इत्यादिना"तस्मात् सर्व्वाणि भूतानि"इत्यन्तेन। सा चेत्त्वचित्तात्तदोषान्नाभ्युदेति तर्हि योगे"तमेतं वेदानुबचनेन ब्राह्मणा

विविदिषन्ति यज्ञेन दानेन तपसा नाशकेन" इत्यादि श्रुत्युक्तान्तर्गतज्ञाने निष्कामकर्म्मयोगे कर्त्तव्यामिमां बक्ष्यमाणां बुद्धिं शृणु। फलोक्त्या तां स्तौति—ययेति। कर्म्माणि कुर्व्वाणस्त्वं यया बुद्ध्या युक्तः कर्म्मकृतं बन्धं प्रहास्यसि। आत्मानन्दलिप्सया भगवदाज्ञया महाप्रयासानि कर्म्माणि कुर्व्वंस्तत्तदुद्देशमहिम्ना त्वदन्तरभ्युदितयात्मज्ञाननिष्ठया संसारं तरिष्यसीति। पशुपुत्रराज्यादिफलकं कर्म्म सकामं ज्ञानफलकन्तु तन्निष्काममिति शास्त्रेऽस्मिन् परिभाष्यते ॥३९॥

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥४०॥

सारा०व०--अत्र योगो द्विविधः--श्रवणकीर्त्तनादिभक्तिरूपः, श्रीभगवदर्पितनिष्कामकर्म्मरूपश्च। तत्र 'कर्म्मण्येवाधिकारः' इत्यतः प्रागभक्तियोग एव निरूप्यते; 'निस्त्रैगुण्यो भवार्जुन' इत्युक्तेर्भक्तेरेव त्रिगुणातीतत्वात् तयैव पुरुषो निस्त्रैगुण्यो भवतीत्येकादशस्कन्धे प्रसिद्धेः; ज्ञानकर्म्मणोस्तु सात्त्विकत्व-राजसत्वाभ्यां निस्त्रैगुण्यत्वानुपपत्तेर्भगवदर्पितलक्षणा भक्तिस्तु कर्म्मणो वैफल्याभावमात्रं प्रतिपादयति, न तु स्वस्य भक्तिव्यपदेशं प्राधान्याभावादेव। यदि च भगवदर्पितं कर्म्मापि भक्तिरेवेति मतम्, तदा कर्म्म किं स्यात्? यद्भगवदनर्पितं कर्म्म, तदेव कर्म्मेति चेन्न? "नैष्कर्म्यमप्यच्युतभाव-बर्जितं, न शोभते ज्ञानमलं निरञ्जनम्। कुतः पुनः शश्वदभद्रमीश्वरे, न चार्पितं कर्म्म यदप्यकारणम् ॥" इति नारदोक्त्या तस्य वैयर्थ्यप्रतिपादनात्। तस्मादत्र भगवच्चरणमाधुर्य्यप्राप्तिसाधनीभूता केवलश्रवणकीर्त्तनादिलक्षणैव भक्तिर्निरूप्यते,यथा निष्काम-कर्म्मयोगोऽपि निरूपयितव्यः। उभावप्येतौ बुद्धियोगशब्दवाच्यौ ज्ञेयौ--'ददामि बुद्धियोगं तं येन

मामुपयान्ति ते' इति, 'दूरेण ह्यवरं कर्म्म बुद्धियोगाद्धनञ्जय' इति चोक्तेः। अथ निर्गुणश्रवणकीर्त्तनादि-भक्तियोगस्य माहात्म्यमाह--नेहेति । इह भक्तियोगेऽभिक्रमे आरम्भमात्रे कृतेऽप्यस्य भक्तियोगस्य नाशो नास्ति, ततः प्रत्यबायश्च न स्यात् । यथा कर्म्मयोगे आरम्भं कृत्वा कर्म्माननुष्ठितवतः कर्म्मनाशप्रत्यबायौ स्यातामिति भावः । ननु तर्हि तस्य भक्त्यनुष्ठातुकामस्य समुचितभक्त्यकरणात् भक्तिफलं तु नैव स्यात्, तत्राह--स्वल्पमिति । अस्य धर्म्मस्य स्वल्पमप्यारम्भसमये या किञ्चिन्मात्री भक्तिरभूत्, सापीत्यर्थः, महतो भयात् संसारात् त्रायत एव--"यन्नामसकृच्छ्रवणात्, पुक्कशोऽपि विमुच्यते संसारात्" इत्यादिश्रवणात्, अजामिलादौ तथा दर्शनाच्च । "न ह्यङ्गोपक्रमे ध्वंसो मद्धर्म्मस्योद्धवाण्वपि । मया व्यवसितः सम्यङ् निर्गुणत्वादनाशिषः ।।" इति भगवतो बाक्येन सहास्य बाक्यस्यैकार्थमेव दृश्यते । किन्तु तत्र निर्गुणत्वान्न हि गुणातीतं बस्तु कदाचित् ध्वस्तं भबतीति हेतुरुपन्यस्तः, स चेहापि द्रष्टव्यः। न च निष्कामकर्म्मणोऽपि भगवदर्पणमहिम्ना निर्गुणत्वमेवेति बाच्यम्--"मदर्पणं निष्फलं वा सात्त्विकं निजकर्म्म तत्" इति । बाक्येन तस्य सात्त्विकत्वोक्तेः ।।४०।।

गी०भू०—बक्ष्यमाणया बुद्धया युक्तं कर्म्मयोगं स्तौति—नेहेति । इह 'तमेतम'इत्यादि बाक्योक्तेः निष्कामकर्म्मयोगेऽभिक्रमस्यारम्भस्य फलोत्पादकत्वनाशो नास्ति । आरब्धस्यासमाप्तस्य बैफल्यं न भवतीत्यर्थः । मन्त्राद्यङ्गबैकल्ये च प्रत्यवायो न बिद्यते । आत्मोद्देशमहिम्ना "ॐ तत् सत्" इति भगवन्नाम्ना च तस्य बिनाशात् । इह भगवदर्पितस्य निष्कामकर्म्मलक्षणधर्म्मस्य किञ्चिदप्यनुष्ठितं सत् महतो भयात् संसारात् त्रायते अनुष्ठातारं रक्षति । बक्ष्यति च एवं पार्थ "नैवेह नामुत्र" इत्या-

दिना । काम्यकर्म्माणि सर्व्वाङ्गोपसंहारेणानुष्ठितान्युक्तफलाय कल्पन्ते, मन्त्राद्यङ्गवैकल्ये तु प्रत्यबायं जनयन्तीति । निष्कामकर्म्माणि तु यथाशक्त्यनुष्ठितानि ज्ञाननिष्ठालक्षणं फलं जनयन्त्येबोक्तहेतुतः प्रत्यबायं नोत्पादयन्तीति ।।४०।।

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ।।४१।।

सारा०व०--किञ्च, सर्व्वाभ्योऽपि बुद्धिभ्यो भक्तियोगबिषयिण्येब बुद्धिरुत्कृष्टेत्याह--व्यबसायेति । इह भक्तियोगे व्यवसायात्मिका बुद्धिरेकैव । मम श्रीमद्गुरूपदिष्टं भगवत्कीर्त्तनस्मरणचरणपरिचरणादिकमेतदेब मम साधनमेतदेब मम साध्यमेतदेव मम जीबातुः साधन-साध्य-दशयोस्त्यक्तुमशक्यमेतदेव मे काम्यमेतदेव मे कार्य्यमेतदन्यन्न मे कार्य्यं नाप्यभिलषणीयं स्वप्नेऽपीत्यत्र सुखमस्तु दुःखं बास्तु संसारो नश्यतु वा न नश्यतु, तत्र मम कापि न क्षतिरित्येवं निश्चयात्मिका बुद्धिरकैतव-भक्ताबेब सम्भवेत्, तदुक्तम्--"ततो भजेत मां भक्त्या श्रद्धालुर्दृढनिश्चयः" इति । ततोऽन्यत्र नैव बुद्धिरेकेत्याह-बह्वीति-बहवः शाखा यासां ताः । तथा हि कर्म्मयोगे कामानामानन्त्याद्बुद्धयोऽनन्ताः, तत्साधनानां कर्म्मणामानन्त्यात् तच्छाखा अप्यनन्ताः । तथैव ज्ञानयोगे प्रथममन्तःकरणशुद्ध्यर्थं निष्कामकर्म्मणि बुद्धिस्ततस्तस्मिन् शुद्धे सति कर्म्मसंन्यासे बुद्धिः, तदा ज्ञाने बुद्धिः; ज्ञानवैफल्याभावार्थं भक्तौ बुद्धिः-'ज्ञानञ्च मयि संन्यसेत्' इति भगवदुक्तेर्ज्ञानसंन्यासे च भक्तौ बुद्धिरिति बुद्धयोऽनन्ताः । कर्म्मज्ञानभक्तीनामवश्यानुष्ठेयत्वात् तत्तच्छाखा अप्यनन्ताः ।।४१।।

गी०भू०—काम्य-कर्म-विषयकबुद्धितो निष्कामकर्मविषयक-

बुद्धेर्वैशिष्ट्यमाह व्यवसायेति । हे कुरुनन्दन इह वैदिकेषु सर्व्वेषु कर्मसु व्यवसायात्मिका भगवदर्च्चनरूपैर्निष्कामकर्मभिर्विशुद्धचित्तो विषोर्णादिवत् तदन्तर्गतेन ज्ञानेनात्मयाथात्म्यमहमनुभविष्यामीति निश्चयरूपा बुद्धिरेका एकविषयत्वात् । एकस्मै तदनुभवाय तेषां विहितत्वादिति यावत् । अव्यवसायिनां काम्यकर्मानुष्ठातॄणां तु बुद्धयोऽनन्ताः । पश्वन्नपुत्रस्वर्गाद्यनन्तकामविषयत्वात् , तत्रापि बहुशाखाः । एकफलकेऽपि दर्शपौर्णमासादावायुः सुप्रजस्त्वाद्यवान्तरानेकफलाशंसाश्रवणात् । अत्र हि देहातिरिक्तात्मज्ञानमात्रमपेक्षते न तूक्तात्मयाथात्म्यं तन्निश्चये काम्यकर्मसु प्रवृत्तेरसम्भवात् ॥४१॥

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥४२॥
कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥४३॥

सारा०व०—तस्मादव्यवसायिनः सकामकर्म्मिणस्त्वतिमन्दा इत्याह—यामिमामिति । पुष्पितां बाचं पुष्पितां विषलतामिवापाततो रमणीयाम् , प्रवदन्ति प्रकर्षेण सर्व्वतः प्रकृष्टा इयमेव वेदवागिति ये बदन्ति, तेषां तया बाचा अपहृतचेतसाञ्च व्यवसायात्मिका बुद्धिर्न बिधीयते इति तृतीयेनान्वयः। तेषु तस्या असम्भवात् सा तेषु नोपदिश्यत इत्यर्थः । किमिति ते तथा बदन्ति, यतोऽबिपश्चितो मूर्खाः। तत्र हेतुः—बेदेषु येऽर्थवादाः- "अक्षय्यं वै चातुर्मास्ययाजिनः सुकृतं भवति", "अपाम सोममममृता अभूम" इत्याद्याः। अन्यदीश्वरतत्त्वं नास्तीति प्रजल्पिनस्ते कीदृशीं बाचं प्रवदन्ति ? जन्मकर्म्मफलप्रदायिनीं भोगैश्वर्य्यगतिं प्रति ये क्रियाविशेषास्तान् बहु यथा स्यात् तथा लाति ददाति प्रतिपादयतीति ताम् ॥४२-४३॥

गी०भू०—नन्वेषां व्यवसायात्मिका बुद्धि र्भवेत् श्रुतेस्तौल्यादिति चेच्चित्तदोषान्नभवेदित्याह यामिति त्रिभिः । अविपश्चितोऽल्पज्ञाः यामिमां ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिकां बाचं प्रवदन्ति इयमेव प्रकृष्टा वेदवागिति कल्पयन्ति। तया वाचापहृतचेतसां तेषां समाधौ मनसि व्यवसायात्मिका बुद्धिर्न विधीयते नाभ्युदेति इत्यनुषङ्गः। कीदृशीं वाचमित्याह—पुष्पितामिति। कुसुमितविषलतावदापातमनोज्ञां निष्फलामित्यर्थः। एवं कुतस्ते वदन्ति तत्राह वेदेति। वेदेषु ये वादाः "अपाम सोमममृता अभूम अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीत्या"द्योऽर्थवादास्तेष्वेव रताः वेदस्य सत्यभाषित्वादेवमेवैतदिति प्रतीतिमन्तः। अतएव नान्यदिति कर्म्मफलात् स्वर्गादन्यत् जीवांशिपरमार्थज्ञानं लभ्यं मोक्षलक्षणं निरतिशयं नित्यसुखं नास्ति। तत्प्रतिपादिकानां वेदान्त-वाचां कर्माङ्गकर्तृदेवतावेदकतया तच्छेषत्वादिति बदनशीला इत्यर्थः ॥ ४२ ॥

गी०भू०—चित्तदोषमाह-कामात्मानः वैषयिकसुखवासनाग्रस्तचित्ताः। एवंचेत् तादृशं मोक्षं कुतो नेच्छन्ति तत्राह स्वर्गेति स्वर्ग एव सुधा—देवाङ्गनाद्युपेतत्वेन परः श्रेष्ठो येषां ते । तादृग्वासनाग्रस्तत्वात्तेषां नान्यद्भाषत इत्यर्थः। जन्म कर्मेति—जन्म च देहेन्द्रियसम्बन्धलक्षणं , तत्र कर्म च तत्तद्वर्णाश्रमविहितं , फलञ्च विनाशिपश्वन्नस्वर्गादि । तानि प्रकर्षेणाविच्छेदेन ददाति तां भोगैश्वर्य्ययोर्गतिं प्राप्तिं प्रति ये क्रियाविशेषा ज्योतिष्टोमादयस्ते बहुलाः प्रचुरा यत्र तां वाचं बदन्तीति पूर्व्वेणान्वयः। भोगः सुधापानदेवाङ्गनादिः, एश्वर्य्यञ्च देवादिस्वामित्वं तयोर्गतिमित्यर्थः ॥४३ ॥

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥४४॥

सारा०व०—ततश्च भोगैश्वर्य्ययोः प्रसक्तानां तया पुष्पितया वाचापहृतमाकृष्टं चेतो येषां ते तथा तेषां समाधिश्चित्तैकाग्र्यं परमेश्वरैकोन्मुखत्वं तस्मिन् निश्चयात्मिका बुद्धिर्न विधीयते—"कर्म्मकर्त्तरि प्रयोगो नोपपद्यते" इति स्वामिचरणाः ॥४४॥

गी०भू०—भोगेति-तेषां पूर्व्वोक्तयोर्भोगैश्वर्य्ययोः प्रसक्तानां क्षयित्वदोषास्फूर्त्या तयोरभिनिविष्टानां तया पुष्पितया वाचापहृतं विलुप्तं चेतो विवेकज्ञानं येषां तादृशानां समाधाविति योऽर्थम् । सम्यगाधीयतेऽस्मिन्नात्मतत्त्वयाथात्म्यमिति निरुक्तेः समाधिर्मनस्तस्मिन्नित्यर्थः ॥ ४४ ॥

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान्॥४५॥

सारा०व०—त्वं तु चतुर्व्वर्गसाधनेभ्यो विरज्य केवलं भक्तियोगमेवाश्रयस्वेत्याह—त्रैगुण्येति । त्रैगुण्यास्त्रिगुणात्मिकाः कर्म्मज्ञानाद्याः प्रकाश्यत्वेन विषया येषां ते त्रैगुण्यविषया वेदाः—स्वार्थे ष्यञ्, एतच्च "भूम्ना व्यपदेशा भवन्ति" इति न्यायेनोक्तम् । किन्तु "भक्तिरेवैनं नयति" इति, "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ" इत्यादि-श्रुतयः पञ्चरात्रादिस्मृतयश्च गीतोपनिषद्-गोपालतापन्याद्युपनिषदश्च निर्गुणां भक्तिमपि विषयीकुर्व्वन्त्येव—वेदोक्तत्वाभावे भक्तेरप्रामाण्यमेव स्यात् । ततश्च वेदोक्ता ये त्रिगुणमया ज्ञानकर्म्मविधयस्तेभ्य एव निर्गतो भव तान् न कुरु । ये तु वेदोक्ता भक्तिविधयस्तांस्तु सर्व्वथैवानुतिष्ठ । तदनुष्ठाने "श्रुतिस्मृतिपुराणादिपञ्चरात्रविधिं विना । ऐकान्तिकी हरेर्भक्तिरुत्पातायैव कल्प्यते ॥" इति दोषो दुर्व्वार एव । तेन स-

गुणानां गुणातीतानामपि; वेदानां विषयास्त्रैगुण्या निस्त्रैगुण्याश्च । तत्र त्वं तु निस्त्रैगुण्यो भव । निर्गुणया मद्भक्त्यैव त्रिगुणात्मकेभ्यस्तेभ्यो निष्क्रान्तो भव; तत एव निर्द्वन्द्वो गुणमय-मानापमानादिरहितः, अतएव नित्यैः सत्त्वैः प्राणिभिर्मद्भक्तैरेव सह तिष्ठतीति तथा सः, नित्यं सत्त्वगुणस्थो भवेति व्याख्यायां निस्त्रैगुण्यो भवेति व्याख्यायां विरोधः स्यात् । अलब्धलाभो योगः, लब्धस्य रक्षणं क्षेमस्तद्रहितः । मद्भक्तिरसास्वादवशादेव तयोरननुसन्धानात्, 'योगक्षेमं वहाम्यहम्' इति भक्तवत्सलेन मयैव तद्भारवहनात् । आत्मवान् मद्दत्तबुद्धियुक्तः । अत्र निस्त्रैगुण्य-त्रैगुण्ययोर्विवेचनम्; यदुक्तमेकादशे—"मदर्पणं निष्फलं वा सात्त्विकं निजकर्म्म तत् । राजसं फलसङ्कल्पं हिंसाप्रायादि तामसम् ॥" निष्फलं वेति नैमित्तिकं निजकर्म्मफलाकाङ्क्षारहितमित्यर्थः । "कैवल्यं सात्त्विकं ज्ञानं रजो वैकल्पिकञ्च यत् । प्राकृतं तामसं ज्ञानं मन्निष्ठं निर्गुणं स्मृतम् ॥ वनन्तु सात्त्विको वासो ग्रामो राजस उच्यते । तामसं द्यूतसदनं मन्निकेतन्तु निर्गुणम् ॥ सात्त्विकः कारकोऽसङ्गी रागान्धो राजसः स्मृतः । तामसः स्मृतिविभ्रष्टो निर्गुणो मदपाश्रयः ॥ सात्त्विक्याध्यात्मिकी श्रद्धा कर्म्मश्रद्धा तु राजसी । तामस्यधर्म्मे या श्रद्धा मत्सेवायान्तु निर्गुणा ॥ पथ्यं पूतमनायस्तमाहार्य्यं सात्त्विकं स्मृतम् । राजसं चेन्द्रिय-प्रेष्ठं तामसं चार्त्तिदाशुचि ॥" "च-कारान्मन्निवेदितन्तु निर्गुणम्" इति श्रीस्वामिचरणानां व्याख्यानम् । "सात्त्विकं सुखमात्मोत्थं विषयोत्थन्तु राजसम् । तामसं मोह-दैन्योत्थं निर्गुणं मदपाश्रयम् ॥" इत्यन्तेन ग्रन्थेन त्रैगुण्यवस्तून्यपि प्रदर्श्य निर्गुणस्य सम्यङ् निस्त्रैगुण्यतासिद्ध्यर्थं निर्गुणयैव भक्त्या स्वस्मिन् कथञ्चित् स्थितस्य त्रैगुण्यस्य निर्जयोऽप्युक्तस्तदनन्तरमेव; यथा—"द्रव्यं देशस्तथा कालो ज्ञानं कर्म्म च

कारकः । श्रद्धावस्थाकृतिर्निष्ठा त्रैगुण्यः सर्व्व एव हि ॥ सर्व्वे गुणमया भावाः पुरुषाव्यक्तधिष्ठिताः । दृष्टं श्रुतमनुध्यातं बुद्ध्या वा पुरुषर्षभ ॥ एताः संसृतयः पुंसो गुणकर्म्मनिबन्धनाः । येनेमे निर्जिताः सौम्य गुणा जीवेन चित्तजाः । भक्तियोगेन मन्निष्ठो मद्भावाय प्रपद्यते ॥" इति । तस्माद्भक्त्यैव निर्गुणया त्रैगुण्य-जयो नान्यथा । अत्राप्यग्रे 'कथं चैतांस्त्रीन् गुणानतिवर्त्तते' इति प्रश्ने वक्ष्यते—"माञ्च योऽव्यभिचारेण भक्तियोगेन सेवते । स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥" इति । श्रीस्वामि-चरणानां व्याख्या च—"च—कारोऽत्रावधारणार्थः; मामेव परमेश्वरमव्यभिचारेण भक्तियोगेन यः सेवते" इत्येषा ॥४५॥

गी०भू०—ननु फलनैरपेक्ष्येण कर्माणि कुर्व्वाणानामपि तानि स्वफलैर्योजयेयुस्तत् स्वाभाव्यात्ततः कथं तद्बुद्धेः सम्भव इति चेत्तत्राह त्रैगुण्येति । त्रयाणां गुणानां कर्म त्रैगुण्यम् । "गुणवचनब्राह्मणादिभ्यः कर्मणि चे"ति सूत्रात् ष्यञ्-सकामत्वमित्यर्थः । तद्विषया वेदाः कर्मकाण्डानि त्वं तु तच्छिरोभूतवेदान्तनिष्ठो निस्त्रैगुण्यो निष्कामो भव । अयमर्थः :— पितृकोटिवत्सलो हि वेदोऽनादिभगवद्विमुखान्मायागुणैर्निबद्धांस्तद्गुणसृष्टसात्विकादि सुखसक्तान् प्रति तत्कामाननुरुध्य फलानि प्रकाशयन् स्वस्मिंस्तान् विश्रम्भयति । तद्विश्रम्भेण तत्परिशीलिनस्ते तन्मूर्द्धभूतोपनिषत्प्रतीतयाथात्म्यनिश्चयेन तां बुद्धिं यान्तीति न चाकामितान्यपि तान्यापतेयुः कामितानामेव तेषां फलत्व-श्रवणात् । न च सर्व्वेषां वेदानां त्रैगुण्यविषयत्वं निस्त्रैगुण्य-ताया अप्रामाणिकत्वापत्तेः । ननु शीतोष्णादिनिवारणाय वस्त्रादेः काम्यत्वात् कथं निष्कामत्वं तत्राह निर्द्वन्द्व इति । मात्रास्पर्शास्तु कौन्तेयेत्यादि विमर्शेन द्वन्द्वसह भव । तत्र हेतु-नित्येति । नित्यं यत् सत्त्वमपरिणामित्वं जीवनिष्ठं तत्-

स्थस्तद्विभाव्येत्यर्थः । तत एव निर्योगक्षेमः । अलब्धलाभो योगः लब्धस्य परिरक्षणं क्षेमं तद्रहितो भवेत्यर्थः । ननु क्षुत् पिपासे तथापि बाधिके इति चेत्तत्राह आत्मवानिति । आत्मा विश्वम्भरः परमात्मा स यस्य ध्येयतयास्ति तादृशो भवेत्यर्थः, स ते देहयात्रां सम्पादयेदित्यर्थः ॥ ४५ ॥

यावानर्थ उदपाने सर्वतः संप्लुतोदके ।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥४६॥

सारा०व०—हन्त, किं वक्तव्यं निष्कामस्य निर्गुणस्य भक्ति-योगस्य माहात्म्यं यस्यैवारम्भणमात्रेऽपि नाशप्रत्यवायौ न स्तः । स्वल्पमात्रेणापि कृतार्थतेत्येकादशेऽप्युद्धवायापि वक्ष्यते—"न ह्यङ्गोपक्रमे ध्वंसो मद्धर्म्मस्योद्धवाण्वपि । मया व्यवसितः सम्यङ्निर्गुणत्वादनाशिषः ॥" इति । किन्तु सकामो भक्तियोगोऽपि व्यवसायात्मिक-बुद्धि-शब्देनोच्यते इति दृष्टान्तेन साधयति—यावानिति । उदपान इति जात्यैकवचनम्—उदपानेषु कूपेषु; यावानर्थ इति कश्चित् कूपः शौचकर्म्मार्थकः, कश्चित् दन्तधावनार्थकः, कश्चिद्वस्त्रधावनाद्यर्थकः, कश्चित् केशादिमार्ज्जनार्थकः, कश्चित् स्नानार्थकः, कश्चित् पानार्थक इत्येवं सर्व्वतः सर्व्वेषूदपानेषु यावानर्थो यावन्ति प्रयोजनानीत्यर्थः । संप्लुतोदके महाजलाशये सरोवरेऽपि तावानेवार्थः—तस्मिन् एकस्मिन्नेव शौचादिकर्म्म-सिद्धेः । किञ्च, तत्तत्कूपेषु पृथक् पृथक् परिभ्रमणश्रमेण, सरोवरे तु तं विनैव; तथा कूपेषु विरस-जलेन, सरोवरे तु सुरस-जलेनैवेत्यपि विशेषो द्रष्टव्यः । एवं सर्व्वेषु वेदेषु तत्तद्देवता-राधनेन यावन्तोऽर्थास्तावन्त एकस्य भगवदाराधनेन विजानतो विज्ञस्य ब्राह्मणस्येति ब्रह्म वेदं वेत्तीति ब्राह्मणस्तस्य विजानतो वेदज्ञत्वेऽपि वेदतात्पर्य्यं भक्तिं विशेषतो जानतः ; यथा द्वितीय-

स्कन्धे—"ब्रह्मबर्च्चसकामस्तु यजेत ब्रह्मणः पतिम । इन्द्रमिन्द्रियकामस्तु प्रजाकामः प्रजापतीन् ॥ देवीं मायान्तु श्रीकामः" इत्याद्युक्त्वा "अकामः सर्व्वकामो वा मोक्षकाम उदारधीः । तीव्रेण भक्तियोगेन यजेत पुरुषं परम ।" इति मेघाद्यमिश्रस्य सौरकिरणस्य तीव्रत्वमिव भक्तियोगस्य ज्ञानकर्म्माद्यमिश्रत्वं तीव्रत्वं ज्ञेयम् । अत्र बहुभ्यो बहुकामसिद्धिरिति सर्व्वथा बहुबुद्धित्वमेव । एकस्माद्भगवत एव सर्व्वकामसिद्धिरित्यंशेनैकबुद्धित्वादेक बुद्धित्वमेव बिषयसादृगुण्याज्ज्ञेयम ॥४६॥

गी०भू०—ननु सर्व्वान् वेदानधीयानस्य बहुकालव्ययाद्बहुविक्षेपसम्भवाच्च कथं तद्बुद्धेरभ्युदयस्तत्राह—यावानिति । सर्व्वतः संप्लुतोदकेति । विस्तीर्णे उदपाने जलाशये स्नानाद्यर्थिनो यावान् स्नानपानादिरर्थः प्रयोजनं तावानेव स तेन तस्मात् संपद्यते । एवं सर्व्वेषु सोपनिषत्सु वेदेषु ब्राह्मणस्य वेदाध्यायिनो विजानत आत्मयाथात्म्यज्ञानं लब्धुकामस्य यावान् तज्ज्ञानसिद्धिलक्षणोऽर्थः स्यात्तावानेव तेन तेभ्यः संम्पाद्यते इत्यर्थः । तथाच स्वशाखयैव सोपनिषदाचिरेणैव तत् सिद्धौ तद्बुद्धिरभ्युदियादेवेति । इह दार्ष्टान्तिकेऽपि यावांस्तावानिति पदद्वयमनुषञ्जनीयम् ॥ ४६ ॥

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥४७॥

सारा०व०—एवमेकमेबार्ज्जुनं स्वप्रियसखं लक्ष्यीकृत्य ज्ञानभक्तिकर्म्मयोगानाचिख्यासुर्भगवान् ज्ञानभक्तियोगौ प्रोच्य तयोरर्ज्जुनस्यानधिकारः बिमृष्य निष्कामकर्म्मयोगमाह—कर्म्मणीति । मा फलेष्विति—फलाकाङ्क्षिणोऽप्यत्यन्ताशुद्धचित्ता भवन्ति ; त्वन्तु प्रायः शुद्धचित्त इति मया ज्ञात्वैबोच्यस इति भावः । ननु कर्म्मणि कृते फलमबश्यं भविष्यत्येवेति ? तत्राह—मा कर्म्मफलहेतुर्भूः फलकामनया हि कर्म्म कूर्व्वन् फलस्य हेतुरुत्पादको भवति ; त्वन्तु तादृशो मा भूरित्याशीर्मया दीयत इत्यर्थः । अकर्म्मणि स्वधर्म्माकरणे बिकर्म्मणि पापे वा सङ्गस्तव मास्तु, किन्तु द्वेष एवास्त्विति पुनरप्याशीर्दीयत इति । अत्राग्रिमाध्याये—"व्यामिश्रेणैव बाक्येन बुद्धिं मोहयसीव मे" इत्यर्ज्जुनोक्तिदर्शनादत्राध्याये पूर्व्वोत्तारबाक्यानामनतारिकाभिर्नातीव सङ्गतिर्विधित्सितेति ज्ञेयम् । किन्तु त्वदाज्ञायां सारथ्यादौ यथाहं तिष्ठामि, तथा त्वमपि मदाज्ञायां तिष्ठेति कृष्णार्ज्जुनयोर्मनोऽनुलापोऽयमत्र द्रष्टव्यः ॥४७॥

गी०भू०—ननु कर्मभि-र्ज्ञान-सिद्धिरिष्यते चेत्तर्हि तस्य शमादीन्येवान्तरङ्गत्वादनुष्ठेयानि सन्तु किं बहु प्रयासैस्तैरिति चेत्तात्राह्—कर्मण्येवेति ; जातावेकवचनम । ते तब स्वधर्म्मेऽपि युद्धेऽधर्मबुद्धेरशुद्धचित्तस्य तावत् कर्मस्वेव युद्धादिष्वधिकारोऽस्तु मयैतानि कर्त्तव्यानीति तत् फलेषु बन्धकेषु तवाधिकारो मास्तु मयैतानि भोक्तव्यानीति । ननु फलेच्छाविरहेऽपि तानि स्वफलैर्योजयेयुरिति चेत्तत्राह मा कर्मेति । कर्मफलानां हेतुरुत्पादकस्त्वं माभूः कामनया कृतानि तानि स्वफलैर्योजयन्ति कामितानामेव फलानां नियोज्यविशेषणत्वेन फलस्वाम्नातात् । अतएव बन्धकानि फलानि आपतिष्यन्तीति भयादकर्म्मणि कर्म्माकरणे तव सङ्गः प्रीतिर्मास्तु किन्तु बिद्वेष एवास्त्वित्यर्थः । निष्कामतयानुष्ठितानि कर्म्माणि यष्टिधान्यवदन्तरेव ज्ञाननिष्ठां निष्पादयिष्यन्ति—शमादीनि तु तत्पृष्ठलग्नान्येव स्युरिति भावः ॥४७॥

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥४८॥

सारा०व०—निष्कामकर्म्मणः प्रकारं शिक्षयति—योगस्थ इति । तेन जयाजययोस्तुल्यबुद्धिः सन् संग्राममेव स्वधर्म्मं कुर्व्विति भावः । अयं निष्कामकर्म्मयोग एव ज्ञानयोगत्वेन परिणमतीति । ज्ञानयोगोऽप्येवं पूर्व्वोत्तरग्रन्थार्थतात्पर्य्यतो ज्ञेयः ॥४८॥

गी०भू०—पूर्व्वोक्तं विशदयति—योगस्थ इति । त्वं सङ्गं फलाभिलाषं कर्त्तृत्वाभिनिवेशं च त्यक्त्वा योगस्थः सन् कर्म्माणि कुरु युद्धादीनि । आद्येन मायानिमज्जनमेव ; द्वितीयेन तु स्वातन्त्र्यलक्षणपरेशधर्म्मचौर्य्यं, तेन तन्माया-व्याकोपः—अतस्तयोः परित्याग इति भावः । योगस्थपदं विवृणोति—सिद्ध्यसिद्ध्योरिति । तदनुषङ्गफलानां जयादीनां सिद्धावसिद्धौ च समो भूत्वा रागद्वेषरहितः सन् कुरु । इदमेव समत्वं मया योगस्थ इत्यत्र योगशब्देनोक्तं, चित्तसमाधानरूपत्वात् ॥४८॥

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय ।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥४९॥

सारा०व०—सकामकर्म्म निन्दति—दूरेणेति । अवरमतिनिकृष्टं काम्यं कर्म्म ; बुद्धियोगात् परमेश्वरार्पित-निष्कामकर्म्मयोगात् । बुद्धौ निष्कामकर्म्मण्येव, बुद्धियोगो निष्कामकर्म्मयोगः ॥४९॥

गी०भू०—अथ काम्यकर्म्मणो निकृष्टत्वमाह—दूरेणेति । बुद्धियोगादवरं कर्म्म दूरेण, हे धनञ्जय, आत्मयाथात्मबुद्धिसाधनभूतान्निष्कामकर्म्मयोगात् दूरेणातिविप्रकर्षेणावरमत्यपकृष्टं जन्ममरणाद्यनर्थनिमित्तं काम्यं कर्म्मेत्यर्थः । हि यस्मादेवमतस्त्वं बुद्धौ तद्याथात्म्यज्ञाने निमित्ते शरणमाश्रयं निष्कामकर्म्मयोगमन्विच्छ कुरु । ये तु फलहेतवः फलकामा अवरकर्म्मकारिणस्ते कृपणास्तत्फलजन्मकर्म्मादिप्रवाहपरवशा दीना इत्यर्थः । तथा च त्वं कृपणो माभूरिति इह कृपणाः खलु कष्टोपार्जितवित्तादृष्टसुखलवलुब्धा वित्तानि दातुमसमर्था महता दानसुखेन वञ्चितास्तथा कष्टानुष्ठितकर्म्मणस्तुच्छतत्फललुब्धा महतात्मसुखेन वञ्चिता भवन्तीति व्यज्यते ॥४९॥

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥५०॥

सारा०व०—योगायोक्तलक्षणाय युज्यस्व घटस्व ; यतः कर्म्मसु सकाम-निष्कामेषु मध्ये योग एवोदासनित्वेन कर्म्मकरणमेव । कौशलं नैपुण्यमित्यर्थः ॥५०॥

गी०भू०—उक्तस्य बुद्धियोगस्य प्रभावमाह—बुद्धीति । इह कर्म्मसु यो बुद्धियुक्तः प्रधानफलत्यागविषयानुषङ्गफलसिद्ध्यसिद्धिसमत्वविषयया च बुद्ध्या युक्तस्तानि करोति, स उभे अनादिकालसञ्चिते ज्ञानप्रतिबन्धके सुकृतदुष्कृते जहाति विनाशयतीत्यर्थः । तस्मादुक्ताय बुद्धियोगाय युज्यस्व त्वं घटस्व । यस्मात् कर्म्मयोगस्तादृशबुद्धिसम्बन्धः । कौशलं चातुर्य्यम—बन्धकानामेव बुद्धिसम्पर्काद्विशोधित-विषपारदन्यायेन मोचकत्वेन परिणामात् ॥५०॥

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥५१॥

गी०भू०—कर्म्मजमिति । बुद्धियुक्तास्तादृशबुद्धिमन्तः कर्म्मजं फलं त्यक्त्वा कर्म्माण्यनुतिष्ठन्तो मनीषिणः कर्म्मान्तर्गतात्मयाथात्म्यप्रज्ञावन्तो भूत्वा जन्मबन्धेन विनिर्म्मुक्ताः सन्तोऽनामयं क्लेशशून्यं पदं वैकुण्ठं गच्छन्तीति । तस्मात्त्वमपि श्रेयो जिज्ञासुरेवं विधानि कर्म्माणि कुर्व्विति भावः । स्वात्मज्ञानस्य परमात्मज्ञानहेतुत्वात् तस्यापि तत्पदगतिहेतुत्वं युक्तम् ॥५१॥

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥५२॥

सारा०व०—एवं परमेश्वरार्पित-निष्कामकर्म्माभ्यासात् तव योगो भविष्यतीत्याह—यदेति । तव बुद्धिरन्तःकरणं मोहकलिलं मोहरूपं गहनं विशेषतोऽतिशयेन तरिष्यति, तदा श्रोतव्यस्य श्रोतव्येष्वर्थेषु श्रुतस्य श्रुतेऽप्यर्थेषु निर्व्वेदं प्राप्स्यसि असम्भावना-विपरीतभावनयोर्नष्टत्वात् किं मे शास्त्रोपदेशवाक्यश्रवणेन ? साम्प्रतं मे साधनेष्वेव प्रतिक्षणमभ्यासः सर्व्वथोचित इति मंस्यस इति भावः ॥५२॥

गी०भू०—ननु निष्कामाणि कर्म्माणि कुर्व्वतो मे कदात्मविषया मनीषाभ्युदियादिति चेत् तत्राह—यदेति । यदा ते बुद्धिरन्तःकरणं मोहकलिलं तुच्छफलाभिलाषहेतुमज्ञानगहनं व्यतितरिष्यति परित्यक्ष्यतीत्यर्थः, तदा पूर्व्वं श्रुतस्यानन्तरं श्रोतव्यस्य च तस्य तुच्छफलस्य सम्बन्धिनं निर्व्वेदं गन्तासि गमिष्यसि "परीक्ष्य लोकान् कर्म्मचितान् ब्राह्मणो निर्व्वेदमायात्" इति श्रवणात् । निर्व्वेदेन फलेन तद्विषयां तां परिचेष्यति इति नास्त्यत्र कालनियम इत्यर्थः ॥५२॥

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥५३॥

सारा०व०—ततश्च श्रुतिषु नाना-लौकिक-वैदिकार्थश्रवणेषु विप्रतिपन्नाऽसम्मता विरक्तेति यावत् । तत्र हेतुः—निश्चला तेषु तेष्वर्थेषु चलितुं विमुखीभूतेत्यर्थः । किन्तु समाधौ षष्ठेऽध्याये वक्ष्यमाण-लक्षणेऽचला स्थैर्य्यवती ; तदा योगमपरोक्षानुभव-प्राप्त्या, जीवन्मुक्त इत्यर्थः ॥५३॥

गी०भू०—ननु कर्म्मफलनिर्व्विण्णतया कर्म्मानुष्ठानेन लब्धहृद्विशुद्धेरभ्युदितात्मज्ञानस्य मे कदात्मसाक्षात्कृतिरिति चेत्तत्राह—श्रुतीति । श्रुत्या कर्म्मणां ज्ञानगर्भतां प्रबोधयन्त्या "तमेतम्"इत्यादिकया विप्रतिपन्ना विशेषेण संसिद्धा ते बुद्धिरचला असम्भावनाविपरीतभावनाभ्यां विरहिता यदा समाधौ मनसि निर्व्वातदीपशिखेव निश्चला स्थास्यति, तदा योगमात्मानुभवलक्षणमवाप्स्यसि । अयमर्थः—फलाभिलाषशून्यतयानुष्ठितानि कर्म्माणि स्थितप्रज्ञतारूपां ज्ञाननिष्ठां साधयन्ति, ज्ञाननिष्ठारूपा स्थितप्रज्ञता स्वात्मानुभवमिति ॥५३॥

अर्जुन उवाच—

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥५४॥

सारा०व०—समाधावचला बुद्धिरिति श्रुत्वा तत्त्वतो योगिनो लक्षणं पृच्छति—स्थितप्रज्ञस्येति ; स्थिता स्थिराऽचला प्रज्ञा बुद्धिर्यस्येति । का भाषा ?—भाष्यतेऽनयेति भाषा लक्षणं किं लक्षणमित्यर्थः । कीदृशस्य समाधिस्थस्येति समाधौ स्थास्यतीति । अस्यार्थः—एवञ्च स्थितप्रज्ञ इति, समाधिस्थ इति जीवन्मुक्तस्य संज्ञाद्वयम् । किं प्रभाषेतेति सुखदुःखयोर्मानापमानयोः स्तुतिनिन्दयोः स्नेहद्वेषयोर्वा समुपस्थितयोः किं प्रभाषेत ?—स्पष्टं स्वगतं वा किं वदेदित्यर्थः । किमासीत ?—तदिन्द्रियाणां बाह्यविषयेषु चलनाभावः कीदृशः ? व्रजेत किम्—तेषु चलनं वा कीदृशमिति ॥५४॥

गी०भू०—एवमुक्तोऽर्जुनः पूर्व्वपद्योक्तस्य स्थितप्रज्ञस्य लक्षणं ज्ञातुं पृच्छति—स्थितेति । स्थितप्रज्ञेऽत्र चत्वारः प्रश्नाः—समाधिस्थे एकः, व्युत्थिते तु त्रयः । तथा हि स्थिता स्थिरा प्रज्ञा

धीर्यस्य तस्य समाधिस्थस्य का भाषा किं लक्षणम् ? भाष्यतेऽनयेतिव्युत्पत्तेः, केन लक्षणेन स्थितप्रज्ञोऽभिधीयत इत्यर्थः। तथा व्युत्थितः स्थितप्रज्ञः कथं भाषणादीनि कुर्य्यात् ?—तदीयानि तानि पृथग्जनविलक्षणानि कीदृशानीत्यर्थः। तत्र किं प्रभाषेत ? स्वयोः स्तुतिनिन्दयोः स्नेहद्वेषयोश्च प्राप्तयोः खतः स्वगतं वा किं ब्रूयात् ? किमासीत बाह्यविषयेषु कथमिन्द्रियाणां निग्रहं कुर्य्यात् ? ब्रजेत किम् ? किं तन्निग्राहाभावे च कथं विषयानवाप्नुयादित्यर्थः। त्रिषु सम्भावनायां लिङ् ॥ ५४ ॥

श्रीभगवानुवाच--

प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥५५॥

साराञ्व०--चतुर्णां प्रश्नानां क्रमेणोत्तरमाह--प्रजहातीति यावदध्यायसमाप्ति। सर्व्वानिति कस्मिन्नप्यर्थे यस्य किञ्चिन्मात्रोऽपि नाभिलाष इत्यर्थः। मनोगतानिति कामानामनात्म-धर्म्मत्वेन परित्यागे योग्यता दर्शिता। यदि ते ह्यात्मधर्म्माः स्युस्तदा तांस्त्यक्तुमशक्येरन् वह्नेरौष्ण्यवदिति भावः। तत्र हेतुः-आत्मनि प्रत्याहृते मनसि प्राप्तो य आत्मानन्दरूपस्तेन तुष्टः। तथा च श्रुतिः--"यदा सर्व्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः। अथ मर्त्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ॥" इति ॥५५॥

गी०भू०-एवं पृष्टो भगवान् क्रमेण चतुर्णामुत्तरमाह यावदध्यायपूर्त्तिः। तत्र प्रथमस्याह प्रजहातीत्येकेन। हे पार्थ यदा मनोगतान् मनसि स्थितान् कामान् सर्व्वान् प्रजहाति संत्यजति तदा स्थितप्रज्ञ उच्यते। कामानां मनोधर्मत्वात् परित्यागो युक्तः, आत्मधर्मत्वे दुःशकत्वः स स्याद्वन्हेरुष्णतादीनामिवेतिभावः। ननु शुष्ककाष्ठवत् कथं तिष्ठतीति चेत्राह—आत्मन्येवेति।

आत्मनि प्रत्याहृते मनसि भासमानेन स्वप्रकाशानन्दरूपेणात्मना स्वरूपेण तुष्टः परितृप्तः क्षुद्रविषयाभिलाषान् संत्यज्यात्मानन्दारामः समाधिस्थः स्थितप्रज्ञ इत्यर्थः। "आत्मा पुंसि स्वभावेऽपि प्रयत्नमनसोरपि। धृतावपि मनीषायां शरीरब्रह्मणोरपी"ति मेदिनीकारः। ब्रह्म चात्र जीवेश्वरान्यतरद्ग्राह्यम ॥ ५५ ॥

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्म्मुनिरुच्यते ॥५६॥

साराञ्व०--किं प्रभाषेतेत्यस्य उत्तरमाह--दुःखेषु क्षुत्पिपासा-ज्वर-शिरोरोगादिष्वाध्यात्मिकेषु सर्पव्याघ्राद्युत्थितेष्वाधिभौतिकेष्वतिवातवृष्ट्याद्युत्थितेष्वाधिदैविकेषूपस्थितेष्वनुद्विग्नमनाः प्रारब्धं दुःखमिदं मयाऽवश्यं भोक्तव्यमिति स्वगतं केनचित् पृष्टः सन् स्पष्टञ्च ब्रुवन्, न दुःखेषूद्विजत इत्यर्थः। तस्य तादृशमुखविक्रियाभाव एवानुद्वेगलिङ्गं सुधिया गम्यम्, कृत्रिमानुद्वेगलिङ्गवांस्तु कपटी--सुधिया परिचितो भ्रष्ट एवोच्यत इति भावः। एवं सुखेष्वप्युपस्थितेषु विगतस्पृह इति प्रारब्धमिदमवश्यभोग्यमिति स्वगतं स्पष्टञ्च ब्रुवाणस्य तस्य सुखस्पृहाराहित्यलिङ्गं सुधिया गम्यमेवेति भावः। तत्तल्लिङ्गमेव स्पष्टीकृत्य दर्शयति--वीतो विगतो रागोऽनुरागः सुखेषु, वीतं भयं स्वभोक्तृभ्यो व्याघ्रादिभ्यो वीतः क्रोधः स्वहन्तृषु बन्धुजनेषु यस्य सः। यथैवादि-भरतस्य देव्याः पार्श्वं प्रापितस्य स्वच्छेदचिकीर्षोर्वृषलराजान्न भयम्, नापि तत्र क्रोधोऽभूदिति ।५६॥

गी०भू०—अथ व्युत्थितः स्थितप्रज्ञः किं भाषेतेत्यस्योत्तरमाह दुःखेष्विति द्वाभ्याम्। त्रिविधेष्वाध्यात्मिकादिषु दुःखेषु समुत्थितेषु सत्सु अनुद्विग्नमनाः प्रारब्धफलान्यमुनि मयावश्यं भोक्तव्यानीति केनचित् पृष्टः स्वगतं वा ब्रुवन् तेभ्यो नोद्विजत

इत्यर्थः। सुखेषु चोत्तमाहारसत्कारादिना समुपस्थितेषु विगतस्पृहस्तृष्णाशून्यः प्रारब्धाकृष्टान्यमुनि मयावश्यं भोक्तव्यानीति केनचित् पृष्टः स्वगतं वा ब्रुवन् तैरुपस्थितैः प्रहृष्टमुखो न भवतीत्यर्थः। वीतेति--वीतरागः कमनीयेषु प्रीतिशून्यः, वीतभयः विषयापहर्त्तृषु प्राप्तेषु दुर्व्बलस्य ममैतानि धर्म्मैर्भवद्भिर्ह्रियन्त इति दैन्यशून्यः, वीतक्रोधः तेष्वेव प्रवलस्य ममैतानि तुच्छैर्भवद्भिः कथमपहर्त्तव्यानीति क्रोधशून्यश्च। एवम्विधो मुनिरात्ममननशीलः स्थितप्रज्ञ इत्यर्थः। इत्थं स्वानुभवं परान प्रति स्वगतं वा वदन्ननुद्वेगो निस्पृहतादिवचः प्रभाषते इत्युत्तरम् ॥ ५६ ॥

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥५७॥

सारा०व०--अनभिस्नेहः सोपाधिस्नेहशून्यो दयालुत्वान्निरुपाधिरीषन्मात्रस्नेहस्तु तिष्ठेदेव। तत्तत्प्रसिद्धं सम्मान-भोजनादिभ्यः स्वपरिचरणं शुभं प्राप्याशुभमनादरणं मुष्टिप्रहारादिकञ्च प्राप्य क्रमेण नाभिनन्दति, न प्रशंसति—त्वं धार्म्मिकः परमहंस-सेवी सुखी भवेति न ब्रुते, न द्वेष्टि—त्वं पापात्मा नरके पतेति नाभिशपति, तस्य प्रज्ञा प्रतिष्ठिता—समाधि प्रति स्थिता, सुस्थितप्रज्ञा उच्यत इत्यर्थः ॥५७॥

गी०भू०--य इति सर्वेषु प्राणिषु अनभिस्नेह औपाधिकस्नेहशून्यः। कारुणिकत्वान्निरुपाधिरीषत्स्नेहस्त्वस्त्येव। तत्तत् प्रसिद्धं शुभमुत्तमभोजनस्रक् चन्दनार्पणरूपं प्राप्य नाभिनन्दति तदर्पकं प्रति धर्मिष्ठस्त्वं चिरञ्जीवेति न वदति। अशुभमपमानं यष्टिप्रहारादिकञ्च प्राप्य न द्वेष्टि, पापिष्ठस्त्वं म्रियस्वेति नाभिशपति। तस्य प्रज्ञेति--स स्थितप्रज्ञ इत्यर्थः। अत्र स्तुति-निन्दा-रूपं वचो न भाषत इति व्यतिरेकेण तल्लक्षणम ॥ ५७ ॥

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥५८॥

सारा०व०—किमासीतेत्यस्योत्तरमाह--यदेति । इन्द्रियार्थेभ्यः शब्दादिभ्य इन्द्रियाणि श्रोत्रादीनि संहरते। स्वाधीनानामिन्द्रियाणां वाह्यविषयेषु चलनं निषिध्यान्तरेव निश्चलतया स्थापनं स्थितप्रज्ञस्यासनमित्यर्थः । तत्र दृष्टान्तः--कूर्म्मोऽङ्गानि मुखनेत्रादीनि यथा स्वान्तरेव स्वेच्छया स्थापयति ॥५८॥

गी०भू०—अथ किमासीतेत्यस्योत्तरं यदेत्यादिभिः षड्भिराह। अयं योगी यदा चेन्द्रियार्थेभ्यः शब्दादिभ्यः स्वाधीनानीन्द्रियाणि श्रोत्रादीन्यनायासेन संहरति समाकर्षति तदा तस्य प्रज्ञा प्रतिष्ठितेत्यन्वयः। अत्र दृष्टान्तः कूर्म्मोऽङ्गानीवेति। मुखकरचरणानि यथानायासेन कमठः संहरति तद्वत् विषयेभ्यः समाकृष्टेन्द्रियानामन्तःस्थापनं स्थितप्रज्ञस्यासनम् ॥ ५८ ॥

विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्ज्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥५९॥

सारा०व०--ननु मूढ़स्याप्युपवासतो रोगादि-वशाद्वेन्द्रियाणां विषयेष्वचलनं सम्भवेत्तत्राह--विषया इति । रसवर्ज्जं रसो रागोऽभिलाषस्तं वर्जयित्वा--अभिलाषस्तु विषयेषु न निवर्त्तत इत्यर्थः। अस्य स्थितप्रज्ञस्य तु परं परमात्मानं दृष्ट्वा विषयेष्वभिलाषो निवर्त्तत इति न लक्षणव्यभिचारः। आत्मसाक्षात्कारसमर्थस्य तु साधकत्वमेव, न तु सिद्धत्वमिति भावः ॥५९॥

गी०भू०—ननु मूढ़स्यामयग्रस्तस्य विषयेष्विन्द्रियाप्रवृत्तिर्दृष्टा तत् कथमेतत् स्थितप्रज्ञस्य लक्षणं तत्राह विषया इति । निराहारस्य रोगभयाद्भोजनादीन्यकुर्व्वतो मूढ़स्यापि देहिनो जनस्य विषयास्तदनुभवा विनिवर्त्तन्ते। किन्तु रसो रागस्तृष्णा तद्वर्जं

विषयतृष्णा तु न निवर्त्तत इत्यर्थः। अस्य स्थितप्रज्ञस्य तु रसोऽपि विषयरागोऽपि विषयेभ्यः परं स्वप्रकाशानन्दमात्मानं दृष्ट्वानुभूय निवर्त्तते विनश्यतीति सराग-विषय-निवृत्तिरतस्य लक्षणमिति न व्यभिचारः ॥ ५९ ॥

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः॥६०॥

सारा०व०--साधकावस्थायान्तु यत्न एव महान्, न त्विन्द्रियाणि परावर्त्तयितुं सर्व्वथा शक्तिरित्याह--यतत इति। प्रमाथीनि प्रमथनशीलानि क्षोभकराणीत्यर्थः ॥६०॥

गी०भू०—अथास्या ज्ञाननिष्ठया दौर्ल्लभ्यमाह यतत हीति। विपश्चितो विषयात्मस्वरूपविवेकज्ञस्य तत इन्द्रियजये प्रयतमानस्यापि पुरुषस्य इन्द्रियाणि श्रोत्रादीनि कर्त्तृणि मनः प्रसभं बलादिव हरन्ति। हृत्वा विषय-प्रवणं कुर्व्वन्तीत्यर्थः। ननु विरोधिनि विवेकज्ञाने स्थिते कथं हरन्ति तत्राह प्रमाथीनीति-अति बलिष्ठत्वात्तज्ज्ञानोपमर्द्दनक्षमाणीत्यर्थः। तस्मात् चौरेभ्यो महानिधेरिवेन्द्रियेभ्यो ज्ञाननिष्ठायाः संरक्षणं स्थितप्रज्ञस्यासनमिति ॥६०॥

तानि सर्वाणि संयम्य युक्त आसीत मत्परः।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥६१॥

सारा०व०--मत्परो मद्भक्त इति, मद्भक्तिं बिना नैवेन्द्रियजय इत्यग्रिमग्रन्थेऽपि सर्व्वत्र द्रष्टव्यम्, यदुक्तमुद्धवेन--"प्रायशः पुण्डरीकाक्ष युञ्जन्तो योगिनो मनः। विषीदन्त्यसमाधानान्मनोनिग्रहकर्शिताः॥ अथात आनन्ददुघं पदाम्बुजं, हंसाः श्रयेरन्" इति। वशे हीति स्थितप्रज्ञस्येन्द्रियाणि वशीभूतानि भवन्तीति साधकाद्विशेष उक्तः ॥६१॥

गी०भू०—ननु निर्जितेन्द्रियाणामप्यात्मानुभवो न प्रतीतस्तत्र कोऽभ्युपाय इति चेत्तत्राह। तानि सर्व्वाणि संयम्य मत्परो मन्निष्ठः सन् युक्तः कृतात्मसमाधिरासीत तिष्ठेत। मद्भक्तिप्रभावेन सर्व्वेन्द्रियविजयपूर्विका स्वात्मदृष्टिः सुलभेति भावः। एवं स्मरन्ति। "यथाग्निरुद्धतशिखः कक्षं दहति सानिलः। तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्विषम्"इत्यादि। वशे हीति स्पष्टम्। इत्थं च वशीकृतेन्द्रियतयावस्थितिः किमासीतेत्यस्योत्तरमुक्तम् ॥ ६१ ॥

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते।
सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते
क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥६३॥

सारा०व०--स्थितप्रज्ञस्य मनोवशीकार एव बाह्येन्द्रियवशीकार-कारणं सर्व्वथा मनोवशीकाराभावे तु यत् स्यात्तत् शृण्वित्याह--ध्यायत इति। सङ्ग आसक्तिः, आसक्त्या च तेष्वधिकः कामोऽभिलाषः, कामाच्च केनचित् प्रतिहतात् क्रोधः ॥६२॥

सारा०व०--क्रोधात् संमोहः कार्य्याकार्य्य-बिवेकाभावः, तस्माच्च शास्त्रोपदिष्टस्वार्थस्य स्मृतिनाशः, तस्माच्च बुद्धेः सद्व्यवसायस्य नाशः, ततः 'प्रणश्यति' संसार-कूपे पतति ॥६३॥

गी०भू०—विजितेन्द्रियस्यापि मय्यनिवेशितमनसः पुनरनर्थो दुर्वार इत्याह--ध्यायत इति द्वाभ्याम्। विषयान् शब्दादीन् सुखहेतुत्वबुद्ध्या ध्यायतः पुनः पुनश्चिन्तयतो योगिनस्तेषु संङ्ग आसक्तिर्भवति। सङ्गाद्धेतोस्तेषु कामतृष्णा जायते। कामाच्च केनचित् प्रतिहतात् क्रोधः चित्तज्वालस्तत्प्रतिघातके भवति ॥६२॥

गी०भू०—क्रोधात् सम्मोहः कार्य्याकार्य्यविवेकविज्ञानविलोपः, संम्मोहात् स्मृतेरिन्द्रियविजयादिप्रयत्नानुसन्धेर्विभ्रमो विभ्रंशः, स्मृति-भ्रंशाद् बुद्धेरात्मज्ञानार्थकस्याध्यवसायस्य नाशः, बुद्धिनाशात् प्रणश्यति पुनर्विषयभोगनिमग्नो भवति संसरतीत्यर्थः। मदनाश्रयणाद्दुर्ब्बलं मनस्तानि स्वविषयैर्योजयन्तीति भावः। तथा च मनोविजिगीषुणा मदुपासनं विधेयम् ॥६३॥

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥६४॥

सारा०व०—-मानस-विषयग्रहणाभावे सति स्ववश्यैरिन्द्रियैर्विषयग्रहणेऽपि न दोष इति वदन् स्थितप्रज्ञो व्रजेत किमित्यस्योत्तरमाह—-रागेति। विधेयो वचनेस्थित आत्मा मनो यस्य सः। "विधेयो विनयग्राही वचनेस्थित आश्रवः। वश्यः प्रणेयो निभृतविनीतप्रश्रिताः समाः ॥" इत्यमरः। प्रसादमधिगच्छतीत्येतादृशस्याधिकारिणो विषयग्रहणमपि न दोष इति किं वक्तव्यम्? प्रत्युत गुण एवेति। स्थितप्रज्ञस्य विषयत्याग-स्वीकारावेव आसनव्रजने ते उभे अपि तस्य भद्रे इति भावः ॥६४॥

गी०भू०—-मनसि निर्जिते श्रोत्रादिनिर्जयाभावेऽपि न दोष इति ब्रुवन् व्रजेत किमित्यस्योत्तरमाह—-रागेत्यादिभिरष्टभिः। विजितबहिरिन्द्रियोऽपि मदनर्पितमनाः परमार्थाद्विच्युत इत्युक्तम्। यो विधेयात्मा स्वाधीनमना मदर्पितमनास्तत एव निदग्धरागादिमनोमलः स स्वात्मवश्यैर्मनोऽधीनैरत एव रागद्वेषाभ्यां वियुक्तैरिन्द्रियैः श्रोत्राद्यैर्विषयान् निषिद्धान् शब्दादींश्चरन् भुञ्जानोऽपि प्रसादं विषयासक्त्यादिमलानागमाद्विमलमनस्त्वमधिगच्छति प्राप्नोतीत्यर्थः ॥ ६४ ॥

प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्य्यवतिष्ठते ॥६५॥

सारा०व०—-बुद्धिः पर्य्यवतिष्ठते सर्व्वतोभावेन स्वाभीष्टं प्रति स्थिराभवतीति विषयग्रहणाभावादपि समुचितविषयग्रहणं तस्य सुखमिति भावः। प्रसन्नचेतस इति चित्तप्रसादो भक्त्यैवेति ज्ञेयम्, तया बिना तु न चित्तप्रसाद इति प्रथमस्कन्ध एव प्रपञ्चितम्, कृतवेदान्तशास्त्रस्यापि व्यासस्याप्रसन्नचित्तस्य श्रीनारदोपदिष्टया भक्त्यैव चित्तप्रसाददृष्टेः ॥६५॥

गी०भू०—प्रसादे सति किं स्यादित्याह—अस्य योगिनो मनः प्रसादे सति सर्व्वेषां प्रकृतिसंसर्गकृतानां दुःखानां हानिरुपजायते। प्रसन्नचेतसः स्वात्मयाथात्म्यविषया बुद्धिः पर्य्यवतिष्ठते स्थिरा भवति ॥ ६५ ॥

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥६६॥

सारा०व०—-उक्तमर्थं व्यतिरेकमुखेन द्रढ़यति—-नास्तीति। अयुक्तस्यावशीकृतमनसो बुद्धिरात्मविषयिणी प्रज्ञा नास्त्ययुक्तस्य तादृशप्रज्ञा-रहितस्य भावना परमेश्वरध्यानञ्चाभावयतोऽकृतध्यानस्य शान्तिर्विषयोपरामो नास्त्यशान्तस्य सुखं आत्मानन्दो न ॥६६

गी०भू०—पूर्व्वोक्तमर्थं व्यतिरेकमुखेनाह–अयुक्तस्यायोगिनो मदनिवेशितमनसो बुद्धिरुक्तलक्षणा नास्ति न भवति। अत एव तस्य भावना तादृगात्मचिन्तापि नास्ति। तादृशमात्मानमभावयतः शान्तिर्विषयतृष्णानिवृत्तिर्नास्ति। अशान्तस्य तत्तृष्णाकुलस्य सुखं स्वप्रकाशानन्दात्मानुभवलक्षणं कुतः स्यात् ॥६६

इन्द्रियाणां हि चरतां यन्मनोऽनु विधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥६७॥
तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥६८॥

सारा०व०--अयुक्तस्य बुद्धिनास्तीत्युपपादयति--इन्द्रियाणां स्वस्वविषयेषु चरतां मध्ये यन्मन एकमिन्द्रियमनुविधीयते, पुंसा सर्व्वेन्द्रियानुवर्त्ति: क्रियते, तदेव मनोऽस्य प्रज्ञां बुद्धिं हरति, यथाम्भसि नीयमानां नावं प्रतिकूलो वायुः ॥६७॥

सारा०व०--यस्य निगृहीतमनसः, हे महाबाहो ! इति यथा शत्रून् निगृह्णासि, तथा मनोऽपि निगृहाणेति भावः ॥६८॥

गी०भू०—मन्निवेशितमनस्कतयेन्द्रियनियमनाभावे दोषमाह--इन्द्रियाणामिति । विषयेषु चरतामविजितानामिन्द्रियाणां मध्ये यदेकं श्रोत्रं वा चक्षुर्वानुलक्ष्यीकृत्य मनो विधीयते प्रवर्त्त्यते तदेकमेवेन्द्रियं मनसानुगतमस्य प्रवर्त्तकस्य प्रज्ञां विविक्तात्मविषयां हरत्यपनयति मनसस्तद्विषयाकृष्टत्वात् । किं पुनः सर्व्वाणि तानीति । प्रतिकुलो वायुर्यथाम्भसि नीयमानां नावं तद्वत् ॥६७॥

गी०भू०—तस्मादिति । यस्य मन्निष्ठमनसः प्रतिष्ठितात्मनिष्ठा भवति । हे महाबाहो इति—यथा रिपून्निगृह्णासि तथेन्द्रियाणि निगृहाणेत्यर्थः । एभिः श्लोकैर्भगवन्निविष्टतयेन्द्रियविजयः स्थितप्रज्ञस्य सिद्धस्य स्वाभाविकः । साधकस्य तु साधनभूत इति बोध्यम् ॥ ६८ ॥

या निशा सर्वभूतानां तस्यां जागर्त्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥६९॥

सारा०व०--स्थितप्रज्ञस्य तु स्वतःसिद्ध एव सर्व्वेन्द्रिय-निग्रह

इत्याह-येति । बुद्धिर्हि द्विविधा भवति- आत्मप्रवणा विषयप्रवणा च । तत्र या आत्मप्रवणा बुद्धिः, सा सर्व्वभूतानां निशा, निशायां किं किं स्यादिति तस्यां स्वपन्तो जना यथा न जानन्ति, तथैवात्मप्रवणबुद्धौ प्राप्यमाणं वस्तु सर्व्वभूतानि न जानन्ति । किन्तु तस्यां संयमी स्थितप्रज्ञो जागर्त्ति, न तु स्वपिति ; अत आत्मबुद्धिनिष्ठमानन्दं साक्षादनुभवति । यस्यां विषयप्रवणायां बुद्धौ भूतानि जाग्रति, तन्निष्ठं विषयसुखशोकमोहादिकं साक्षादनुभवन्ति, न तु तत्र स्वपन्ति सा मुनेः स्थितप्रज्ञस्य निशा तन्निष्ठं किमपि नानुभवतीत्यर्थः । किन्तु पश्यतः सांसारिकाणां सुखदुःखप्रदान् विषयान् तत्रौदासीन्येनावलोकयतः स्वभोग्यान् यथोचितं निर्लेपमाददानस्येत्यर्थः ॥६९॥

गी०भू०—साधकावस्थस्य स्थितप्रज्ञस्येन्द्रियसंयमः प्रयत्नसाध्य इत्युक्तम् । सिद्धावस्थस्य तु तस्य तन्नियमः स्वाभाविक इत्याह-या निशेति । विविक्तात्मनिष्ठा विषयनिष्ठा चेति बुद्धिर्द्विविधा । यात्मनिष्ठा बुद्धिः सर्वभूतानां निशारूपकेणोपमात्र व्यज्यते-रात्रितुल्या तद्वदप्रकाशिका । रात्राविवात्मनिष्ठायां बुद्धौ स्वपन्तो जनास्तल्लभ्यमात्मानं सर्वे नानुभवन्तीत्यर्थः । संयमी जितेन्द्रियस्तु तस्यां जागर्त्ति न तु स्वपिति । तया लभ्यमात्मानमनुभवतीत्यर्थः । यस्यां विषयनिष्ठायां बुद्धौ भूतानि जाग्रति विषयभोगाननुभवन्ति न तु तत्र स्वपन्ति सा मुनेः स्थितप्रज्ञस्य निशा । तस्य विषयभोगाप्रकाशिकेत्यर्थः । कीदृशस्येत्याह पश्यत इति । आत्मानं साक्षादनुभवतः प्रारब्धाकृष्टान् विषयानप्यौदासीन्येन भुञ्जानस्य चेत्यर्थः । नर्त्तकीमूर्द्ध घटावधानन्यायेनात्मदृष्टेर्न तदन्यरसग्रह इति भावः ॥ ६९ ॥

आपूर्यमाणमचलप्रतिष्ठं
समुद्रमापः प्रविशन्ति यद्वत् ।

तद्वत्कामा यं प्रविशन्ति सर्वे
स शान्तिमाप्नोति न कामकामी ॥७०॥

सारा०व०—विषयग्रहणे क्षोभराहित्यमेव निर्लेपतेत्याह—आपूर्य्यमाणमिति । यथा वर्षास्वितस्ततो नाद्य आपः समुद्रं आपूर्य्यमाणं, कीदृशम् ? आ—ईषदपि आपूर्य्यमाणं तावतीभिरप्यद्भिः पूरयितुं न शक्यम् । अचलप्रतिष्ठमनतिक्रान्तमर्य्यादं तद्वदेव कामा विषया यं प्रविशन्ति भोग्यत्वेनायान्ति । यथा अपां प्रवेशे अप्रवेशे वा समुद्रो न कमपि विशेषमापद्यते, एवमेव यः कामानां भोगे अभोगे च क्षोभरहित एव स्यात् स स्थितप्रज्ञः । शान्ति ज्ञानम् ॥७०॥

गी०भू०—उक्तं भावं स्फुटयन्नाह आपूर्य्येति । स्वरूपेणैवापूर्य्यमाणं तथाप्यचलप्रतिष्ठमनुलङ्घितवेलं समुद्रं यथापोऽन्या वर्षोद्भवाः नद्यः प्रविशन्ति न तु तत्र किञ्चिद्विशेषं शक्नुवन्ति कर्त्तुं, तद्वत् सर्वे कामाः प्रारब्धाकृष्टा विषया यं प्रविशन्ति न तु विकर्त्तुं प्रभवन्ति स शान्तिमाप्नोति । शब्दादिषु तदिन्द्रियगोचरेष्वपि सन् स्वात्मानन्दानुभवतृप्तस्तैर्विकारलेशमप्यविन्दन् स्थितप्रज्ञ इत्यर्थः । यः कामकामी विषयलिप्सुः स तूक्तलक्षणां शान्तिं नाप्नोति ॥ ७० ॥

विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः ।
निर्ममो निरहंकारः स शान्तिमधिगच्छति ॥७१॥

सारा०व०—कश्चित्तु कामेष्वविश्वसन् नैव तान् भुङ्क्त इत्याह—विहायेति । निरहङ्कारो निर्म्मम इति देह-दैहिकेष्वहंता-ममता-शून्यः ॥७१॥

गी०भू०—विहायेति-प्राप्तानपि कामान् विषयान् सर्व्वान् विहाय शरीरोपजीवनमात्रेऽपि निर्म्ममो ममताशून्यः निरहङ्कारोऽनात्मनि शरीरे आत्माभिमानशून्यश्चरति तदुपजीवनमात्रं भक्षयति यत्र क्वापि गच्छति वा स शान्तिं लभते इति व्रजेत किमित्यस्योत्तरम् ॥ ७१ ॥

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वा स्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति॥७२॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां भीष्मपर्व्वणि श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्ज्जुनसंवादे सांख्ययोगो नाम द्वितीयोऽध्यायः ।

सारा०व०—उपसंहरति—एषेति । ब्राह्मी ब्रह्मप्रापिका, अन्तकाले मृत्युसमयेऽपि, किं पुनराबाल्यम् ॥७२॥

ज्ञानं कर्म्म च विस्पष्टमस्पष्टं भक्तिमुक्तवान् ।
अतएवायमध्यायः श्रीगीतासूत्रमुच्यते ॥
इति सारार्थवर्षिण्यां हर्षिण्यां भक्तचेतसाम् ।
श्रीगीतासु द्वितीयोऽयं सङ्गतः सङ्गतः सताम् ॥

गी०भू०—स्थितप्रज्ञतां स्तौति एषेति-ब्राह्मी ब्रह्मप्रापिका । अन्तकाले चरमे वयसि किं पुनराकौमारं ब्रह्म ऋच्छति लभते । निर्व्वाणममृतरूपं तत् प्रदमित्यर्थः । ननु तस्यां स्थितः कथं ब्रह्म प्राप्नोति, तत्प्राप्तेस्तद्भक्तिहेतुकत्वादिति चेदुच्यते । तस्यास्तद्भक्तिहेतुकत्वात्तद्भक्तिहेतुत्वाच्च तत्प्रापकतेति ॥ ७२ ॥

निष्कामकर्मभिर्ज्ञानी हरिमेव स्मरन् भवेत् ।
अन्यथा विघ्न एवेति द्वितीयोऽध्यायनिर्णयः ॥

इति श्रीमद्भगवद्गीतोपनिषद्भाष्ये द्वितीयोऽध्यायः ॥२॥

इति सारार्थवर्षिण्यां हर्षिण्यां भक्तचेतसाम् ।
तृतीयः खलु गीतासु सङ्गतः सङ्गतः सताम् ॥ (३)

गी०भू०—एवमिति—एवं मदुपदेशविधया बुद्धेश्च परं देहादिर्निखिलजड़वर्गप्रवर्त्तकत्वाद्विविक्तं सुखचिद्घनं जीवात्मानं बुद्ध्वानुभूयेत्यर्थः। आत्मना ईदृशनिश्चयात्मिकया बुद्ध्यात्मानं मनः संस्तभ्य तादृश्यात्मनि स्थिरं कृत्वा कामरूपं शत्रुं जहि नाशय ; दुरासदं दुर्द्धर्षमपि। महाबाहो इति प्राग्वत् ॥४३॥

निष्कामं कर्म्म मुख्यं स्याद्गौणं ज्ञानन्तदुद्भवम् ।
जीबात्म-दृश्याविदयेष तृतीयोऽध्याय-निर्णयः ॥

इति श्रीमद्भगवद्गीतोपनिषद्भाष्ये तृतीयोऽध्यायः ।

चतुर्थोऽध्यायः

श्रीभगवानुवाच—

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥१॥

सा०व०-तुर्य्ये स्वाविर्भावहेतोर्नित्यत्वं जन्मकर्म्मणोः ।
स्वस्योक्तं ब्रह्मयज्ञादिज्ञानोत्कर्षप्रपञ्चनम् ॥ (१)

सारा०व—अध्यायद्वयेनोक्तं निष्कामकर्म्मसाध्यं ज्ञानयोगं स्तौति—इममिति ॥१॥

गी०भू०—

तुर्य्ये स्वाभिव्यक्तिहेतुं स्वलीलानित्यत्वं सत्कर्म्मसु ज्ञानयोगम् ।
ज्ञानस्यापि प्रागुयन्माहात्म्यमुच्चैः प्राख्यद्देवो देवकीनन्दनोऽसौ ॥

गी०भू०—पूर्व्वाध्यायाभ्यामुक्तं ज्ञानयोगं कर्म्मयोगञ्चैक-फलत्वादेकीकृत्य तद्वंशं कीर्त्तयन् स्तौति--इममिति । इमं त्वां प्रत्युक्तं योगं पुरा भक्ताय सर्व्वक्षत्रियान्ववाय वीजाय विवस्वते सूर्य्यायाहं प्रोक्तवान् । अव्ययं नित्यं वेदार्थत्वान्नव्येति स्वफलादित्यव्यभिचारिफलत्वाच्च । स च मच्छिष्यो विवस्वान् स्वपुत्राय मनवे वैवस्वताय प्राह, स च मनुरिक्ष्वाकवे स्वपुत्रायाब्रवीत् ॥ १ ॥

एवं परम्पराप्राप्तमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परंतप ॥२॥
स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥३॥

सारा०व०--त्वां प्रत्येवास्य प्रोक्तत्वे हेतुः--भक्तो दासः सखा चेति भावद्वयमन्यन्त्वर्व्वाचीनं प्रत्येवावक्तव्यत्वे हेतुः--रहस्यमिति ॥३॥

गी०भू०—एवं विवस्वन्तमारभ्य गुरुशिष्यपरम्परया प्राप्तमिमं योगं राजर्षयः स्वपित्रादिभिरिक्ष्वाकुप्रभृतिभिरुपदिष्टं विदुः । इह लोके, नष्टो विच्छिन्नसम्प्रदायः ॥ २ ॥

स एव तदानुपूर्व्विकवचनवाच्यो योगो मया त्वत्सखेनातिस्निग्धेन ते तुभ्यं मत्सखायेति स्निग्धाय प्रोक्तस्त्वं मे भक्तः प्रपन्नः सखा चासीति हेतोः न त्वन्यस्मै कस्मैचित् । तत्र हेतुः—रहस्यमिति । हि यस्मादुत्तमं रहस्यमिति गोप्यमेतत् ॥३॥

अर्जुन उवाच--

अपरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥४॥

सारा०व०-उक्तमर्थमसम्भवं पृच्छति-अपरमिदानीन्तनम्, परं पुरातनमतः कथमेतत् प्रत्येमीति भावः ॥४॥

गी०भू०—कृष्णस्य सनातनत्वे सार्व्वज्ञे च शङ्कमानानभिज्ञान् निराकर्त्तुमर्ज्जुन उवाच—अपरमिति। अपरमर्व्वाचीनं परं पराचीनं तस्मादाधुनिकस्त्वं प्राचीनाय विवस्वते योगमुक्तवानित्येतत् कथमहं विजानीयां प्रतीयाम। अयमर्थः,-न खलु सर्व्वेश्वरत्वेन कृष्णमर्ज्जुनो न वेत्ति तस्य नराख्यगदवतारत्वेन तादृप्यात् "परं ब्रह्म परं धाम" इत्यादि तदुक्तेश्च। किन्तु देवक्यां जातत्वेन मनुष्यभावेन चाभ्यूदितां तत्सनातनत्वतत्सर्व्वज्ञविषयामज्ञशङ्कामपाकर्त्तुमपरमित्यादि पृच्छति। सर्व्वेश्वरः स यथा स्व—तत्वं वेत्ति न तथान्यः। ततस्तन्मुखाच्छ्रुजादेव तद्रूपतज्जन्मादि प्रकाशनीयं लोकमङ्गलाय। तदर्थं स्वमहिमानं प्रवदन् विकत्थनतया स नाक्षेप्यः, किन्तु स्तवनीय एव कृपालुतया। तच्च मनुष्याकृतिपरब्रह्मणस्तव रूपं जन्मादि च लोकविलक्षणं किंविधं किमथकं किंकालकमिति विज्ञस्याप्याज्ञवत् प्रश्नोऽयमज्ञशङ्का-निरासकप्रतिवचनार्थः ॥ ४ ॥

श्रीभगवानुवाच—

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥५॥

सारा०व०—अवतारान्तरेणोपदिष्टवानित्यभिप्रायेणाह बहूनीति। तव चेति यदा यदैव ममावतारस्तदा मत्पार्षदत्वात्तवाप्याविर्भावोऽभुदेवेत्यर्थः। वेद वेद्मि सर्व्वेश्वरत्वेन सर्व्वज्ञत्वात्। त्वं न वेत्थ मयैव स्वलीलासिद्ध्यर्थं त्वज्ज्ञानावरणादिति भावः। अतएव हे परन्तप! साम्प्रतिक-कुन्तीपुत्रत्वाभिमानमात्रेणैव परान् शत्रूंस्तापयसि ॥५॥

गी०भू०—एक एवाहं "एकोऽपि सन् बहुधा योऽवभाति" इत्यादि श्रुत्युक्तानि नित्यसिद्धानि बहूनि रूपाणि वैदूर्य्यवदात्मनि दधानः पुरा रूपान्तरेण तं प्रत्युपदिष्टवान् इति भावेनाह भगवान्—बहूनीति। तव चेति मत्सखत्वात्तावन्ति जन्मानि तवाप्यभूवन्नित्यर्थः। न त्वं वेत्थेति। इदानीं मयैवाचिन्त्यशक्त्या स्वलीला-सिद्धये त्वज्ज्ञानाच्छादनादिति भावः। एतेन सार्व्वज्ञ्यं स्वस्य दर्शितम्। अत्र भगवज्जन्मनां वास्तवत्वं बोध्यं;—बहूनीत्यादि श्रीमुखोक्तेस्तव चेति दृष्टान्ताच्च। न च जन्माख्यो विकारस्तस्याग्रिमव्याख्यया प्रत्याख्यानात् ॥ ५ ॥

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्।
प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥६॥

सा०व०-स्वस्य जन्मप्रकारमाह-अजोऽपि जन्मरहितोऽपि सन् सम्भवामि, देवमनुष्यतिर्य्यगादिषु आविर्भवामि। ननु किमत्र चित्रम्?—जीवोऽपि वस्तुतोऽज एव स्थूलदेहनाशानन्तरं जायत एव? तत्राह—अव्ययात्माऽनश्वरशरीरः। किञ्च, जीवस्य स्वदेहभिन्नस्वस्वरूपेणाजत्वमेव, आविद्यकेन देहसम्बन्धेनैव तस्य जन्मवत्त्वम्, मम त्वीश्वरत्वात् स्वदेहाभिन्नस्याजत्वं जन्मवत्त्वमित्युभयमपि स्वरूपसिद्धम्। तच्च दुर्घटत्वात् चित्रमतर्क्यमेव। अतः पुण्यपापादिमतो जीवस्येव सदसद्योनिषु न मे जन्माशङ्क्येत्याह—भूतानामीश्वरोऽपि सन् कर्म्म-पारतन्त्र्यरहितोऽपि भूत्वेत्यर्थः। ननु जीवो हि लिङ्गशरीरेण स्वबन्धकेन कर्म्मप्राप्यान् देवादि-देहान् प्राप्नोति। त्वं परमेश्वरो लिङ्गरहितः सर्व्वव्यापकः कर्म्मकालादि-नियन्ता; "बहु स्याम्" इति श्रुतेः सर्व्वजगद्रूपा भवस्येव। तदपि यद्विशेषत एवम्भूतोऽप्यहं सम्भवामीति ब्रूषे, तन्मन्ये सर्व्वजगद्विलक्षणान् देहविशेषान् नित्यानेव लोके प्रकाश-

यितुं स्वजन्मेत्यवगम्यते । तत् खलु कथमित्यत आह-प्रकृतिं स्वामधिष्ठायेति । अत्र प्रकृति-शब्देन यदि बहिरङ्गा मायाशक्तिरुच्यते, तदा तदधिष्ठाता परमेश्वरस्तद्द्वारा जगद्रूपो भवत्येवेति न विशेषोपलब्धिः । तस्मात् "संसिद्धिप्रकृती त्विमे स्वरूपञ्च स्वभावश्च" इत्यभिधानादत्र प्रकृतिशब्देन स्वरूपमेवोच्यते । न तत् स्वरूपभूता मायाशक्तिः, स्वरूपञ्च तस्य सच्चिदानन्द एव ; अतएव "स्वां शुद्धसत्त्वात्मिकां प्रकृतिम्" इति श्रीस्वामिचरणाः ; "प्रकृतिं स्वभावं स्वमेव स्वभावमधिष्ठाय स्वरूपेण स्वेच्छया सम्भवामीत्यर्थः" इति श्रीरामानुजाचार्य्यचरणाः । प्रकृतिं स्वभावं सच्चिदानन्दघनैकरसम् ; मायां व्यावर्त्तयति—स्वामिति—निजस्वरूपमित्यर्थः । "स भगवः कस्मिन् प्रतिष्ठितः स्वमहिम्नि" इति श्रुतेः । "स्वस्वरूपमधिष्ठाय स्वरूपावस्थित एव सम्भवामि, देहदेहिभावमन्तरेणैव देहिवद्व्यवहरामि" इति श्रीमधुसूदनसरस्वतीपादाः । ननु यद्यव्ययात्मा—अनश्वर-मत्स्यकूर्म्मादिस्वरूप एव भवसि, तर्हि तव प्रादुर्भवत्स्वरूपं पूर्व्वप्रादुर्भूतस्वरूपाणि च युगपदेव किं नोपलभ्यन्ते ? तत्राह-आत्मभूता या माया तया स्वस्वरूपावरणप्रकाशन-कर्म्म च यया चिच्छक्तिवृत्त्या योगमाययेत्यर्थः । तया हि पूर्व्वकालावतीर्णस्वरूपाणि पूर्व्वमेवावृत्य वर्त्तमानस्वरूपं प्रकाश्य सम्भवामि । "आत्ममायया सम्यक्प्रच्युतज्ञानबल-वीर्य्यादिशक्त्यैव भवामि" इति श्रीस्वामिचरणाः ; आत्ममाययाऽऽत्मज्ञानेन—"माया वयुनं ज्ञानम्" इति ज्ञानपर्य्यायोऽत्र माया-शब्दः ; तथा चाभियुक्तप्रयोगः—"मायया सततं वेत्ति प्राचीनानां शुभाशुभम्" इति श्रीरामानुजाचार्य्यचरणाः ; "मयि भगवति वासुदेवे देहदेहिभावशून्ये तद्रूपेण प्रतीतिः मायामात्रम्" इति श्रीमधुसूदनसरस्वतीपादाः ॥६॥

गौ०भू०—लोकविलक्षणतया स्वरूपं स्वजन्म च वदन् सनातनत्वं स्वस्याह-अजोऽपीति । अत्र स्वरूपस्वभावपर्य्यायः'प्रकृति' शब्दः, स्वां प्रकृतिं स्वं स्वरूपं अधिष्ठायालम्ब्य सम्भवामि आविर्भवामि । संसिद्धिप्रकृती त्विमे ; "स्वरूपञ्च स्वभावश्च" इत्यमरः, स्वरूपेणैव सम्भवामीति । एतमर्थं विवरितुं विशिनष्टि—अजोऽपीत्यादिना । 'अपि' अवधारणे । अपूर्व्वदेहयोगो जन्म, तद्रहित एव सन् । अव्ययात्मापि सन् अव्ययः परिणामशून्य आत्मा बुद्ध्यादिर्यस्य तादृश एव सन् । 'आत्मा पुंसि'इत्याद्युक्तेः । भूतानामीश्वरोऽपि सन् स्वेतरेषां जीवानां नियन्तैव सन् इत्यर्थः । अजत्वादिगुणकं यद्विभुज्ञानसुखघनं रूपं तेनैवावतरामीति स्वरूपेणैव संभवामीत्यस्य विवरणं तादृशस्य स्वरूपस्य रवेरिवाभिव्यक्तिमात्रमेव जन्मेति तत्स्वरूपस्य तज्जन्मनश्च लोकविलक्षणत्वं तेन सनातनत्वञ्च व्यक्तम् ; कर्म्मतन्त्रत्वं निरस्तम् । श्रुतिश्चैवमाह— "अजायमानो बहुधा विजायते" इति । स्मृतिश्च-"प्रत्यक्षं च हरेर्जन्म न विकारः कथञ्चन"इत्याद्या । अतएव सूतिकागृहे दिव्यायुधभूषणस्य दिव्यरूपस्य षडैश्वर्य्यसम्पन्नस्य तस्य वीक्षणं स्मर्य्यते । प्रयोजनमाह-आत्ममाययेति-भजज्जीवानुकम्पया हेतुना तद्द्वारायेत्यर्थः—"माया दम्भे कृपायाञ्च"इति विश्वः, आत्ममायया स्वसार्व्वज्ञेन स्वसङ्कल्पेनेति केचित्, "माया वयुनं ज्ञानञ्च"इति निर्घण्टकोषात् । लोकः खलु राजादिः पूर्व्वदेहादीनि विहायापूर्व्वदेहादीनि भजन्निरनुसन्धिरज्ञो जन्मी भवतीति तद्वैलक्षण्यं हरेर्जन्मनः प्रस्फुटम् । भूतानामीश्वरोऽपि सन्नित्यनेन लब्धसिद्धयो योगिप्रभृतयोऽपि व्यावृत्ताः । सुखचिद्घनो हरिर्देहदेहिभेदेन गुणगुणिभेदेन च शून्योऽपि विशेषबलात्तत्तद्भावेन विदुषां प्रतीतिरासीदिति ॥६॥

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥७॥

सारा०व०—कदा संभवामीत्यपेक्षायामाह–यदेति । धर्म्मस्य ग्लानिर्हानिरधर्म्मस्याभ्युत्थानं वृद्धिस्ते द्वे सोढ़ुमशक्नुवन् तयोर्वैपरीत्यं कर्त्तुमिति भावः । "आत्मानं देहं सृजामि, नित्यसिद्धमेव तं सृष्टमिव दर्शयामि मायया" इति श्रीमधुसूदनसरस्वतीपादाः ॥७॥

गी०भू०--अथ सम्भवकालमाह--यदेति । धर्म्मस्य वेदोक्तस्य ग्लानिर्विनाशः अधर्म्मस्य तद्विरुद्धस्याभ्युत्थानमभ्युदयः तदाहमात्मानं सृजामि प्रकटयामि, न तु निर्म्ममे--तस्य पूर्व्वसिद्धत्वादिति नास्ति मत्सम्भवकालनियमः ॥७॥

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥८॥

सारा०व०—ननु त्वद्भक्ता राजर्षयो ब्रह्मर्षयोऽपि वा धर्म्मह्रान्यधर्म्मवृद्धी दूरीकर्त्तुं शक्नुवन्त्येव ; एतावदर्थमेव किं तवावतारेण ? इति चेत्, सत्यम् । अन्यदपि अन्यदुष्करं कर्म्म कर्त्तुं सम्भवामीत्याह—परीति—साधूनां परित्राणाय मदेकान्तभक्तानां मद्दर्शनोत्कण्ठास्फुटचित्तानां यद्वैयग्र्यरूपं दुःखम्, तस्मात् त्राणाय । तथा दुष्कृतां मद्भक्तलोकदुःखदायिनां मदन्यैरवध्यानां रावणकंसकेश्यादीनां विनाशाय । तथा धर्म्मसंस्थापनार्थाय मदीयध्यानयजनपरिचर्य्यासंकीर्त्तनलक्षणं परमधर्म्मं मदन्यैः प्रवर्त्तयितुमशक्यं सम्यक् प्रकारेण स्थापयितुमित्यर्थः । युगे युगे प्रतियुगं प्रतिकल्पं वा । न चैवं दुष्टनिग्रहकृतो भगवतो वैषम्यमाशङ्कनीयम्, दुष्टानामप्यसुराणां स्वकर्त्तृकवधेन विविधदुष्कृत-

फलान्नरकसहप्रणिपातात् संसाराच्च परित्राणतस्तस्य स खलु निग्रहोऽप्यनुग्रह एव निर्णीतः ॥८॥

गी०भू०--ननु त्वद्भक्ता राजर्षयोऽपि धर्म्मग्लानिमधर्म्माभ्युत्थानं चापनेतुं प्रभवन्ति तावतेऽर्थाय किं सम्भवसीति चेदस्ति मदन्यदुष्करं कार्य्यं तदर्थं सम्भवामीति आह--परीति–साधूनां मद्रूपगुणनिरतानां मत्साक्षात्कारमाकाङ्क्षतां तेन विनातिव्यग्राणां तद्वैयग्र्यरूपात् दुःखात् परित्राणायातिमनोज्ञस्वरूपसाक्षात्कारेण । तथा दुष्कृतां दुष्टकर्म्मकारिणां मदन्यैरबध्यानां दशग्रीव-कंसादीनां तादृग्भक्तद्रोहिणां बिनाशाय धर्म्मस्य मद्ध्यानार्चनादिलक्षणस्य शुद्धभक्तियोगस्य वैदिकस्यापि मदितरैः प्रचारयितुमशक्यस्य संस्थापनार्थाय संप्रचारायेत्येतत् त्रयं मत्सम्भवस्य कारणमिति । युगे युगे तत्तत्समयेन च दुष्टबधेन हरौ वैषम्यं, तेन दुष्टानां मोक्षानन्दलाभे सति तस्यानुग्रहरूपत्वेन परिणामात् ॥८॥

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥९॥

सारा०व०—उक्तलक्षणस्य मज्जन्मनस्तथा जन्मानन्तरं मत्कर्म्मणश्च तत्त्वतो ज्ञानमात्रेणैव कृतार्थः स्यादित्याह—जन्मेति । "दिव्यमप्राकृतम्" इति श्रीरामानुजाचार्य्यचरणाः श्रीमधुसूदनसरस्वतीपादाश्च ; "दिव्यमलौकिकम्" इति श्रीस्वामिचरणाः । लोकानां प्रकृतिसृष्टत्वादलौकिक—शब्दस्याप्राकृतत्वमेवार्थस्तेषामप्यभिप्रेतः । अतएवाप्राकृतत्वेन गुणातीतत्वाद्भगवज्जन्मकर्म्मणोर्नित्यत्वम् । तच्च भगवत्सन्दर्भे–"न विद्यते यस्य च जन्म कर्म्म वा" इत्यत्र श्लोके श्रीजीव-गोस्वामिचरणैरुपपादितम् ; यद्वा, युक्त्यानुपपन्नमपि श्रुतिस्मृतिवाक्यबलादतर्क्यमेवेदं मन्तव्यम ।

तत्र पिप्पलाद-शाखायां पुरुषबोधनी श्रुतिः—"एको देवो नित्यलीलानुरक्तो भक्तव्यापी भक्तहृद्यन्तरात्मा" इति । तथा जन्मकर्म्मणोर्नित्यत्वं श्रीभागवतामृते बहुश एव प्रपञ्चितम् । एवं 'यो वेत्ति तत्त्वतः' इति, 'अजोऽपि सन्नव्ययात्मा' इत्यस्मिंस्तथा 'जन्म कर्म्म च मे दिव्यम्' इत्यस्मिंश्च मद्वाक्य एवास्तिकतया मज्जन्मकर्म्मणोर्नित्यत्वमेव यो जानाति, न तु तयोर्नित्यत्वे काञ्चिद्युक्तिमप्यपेक्षमाणो भवतीत्यर्थः ; यद्वा, तत्त्वतः 'ॐ तत् सदिति निर्द्देशो ब्रह्मणस्त्रिविधः स्मृतः' इत्यग्रिमोक्तेस्तच्छब्देन ब्रह्मोच्यते ; तस्य भावस्तत्त्वं तेन ब्रह्मस्वरूपत्वेन यो वेत्तीत्यर्थः । स वर्त्तमानं देहं त्यक्त्वा पुनर्जन्म नैति, किन्तु मामेवैति । अत्र देहं त्यक्त्वेत्यस्याधिक्यादेवं व्याचक्षते स्म । स देहं त्यक्त्वा पुनर्जन्म नैति किन्तु देहमत्यक्त्वैव मामेति । "मदीयदिव्यजन्मचेष्टितयाथार्थ्यज्ञानेन विध्वस्तसमस्तमत्समाश्रयणविरोधिपाप्मा अस्मिन्नेव जन्मनि मामाश्रित्य मदेकप्रियो मामेव प्राप्नोति" इति श्रीरामानुजाचार्य्यचरणाः ॥९॥

गी०भू०—बहुलायासैः साधनसहस्रैरपि दुर्लभो मोक्षो मज्जन्मचरितश्रवणेन मदेकान्तिपथानुवर्त्तिनां सुलभोऽस्त्वित्येतदर्थञ्च सम्भवामीत्याशयाभगवानाह—जन्मेति । मम सर्व्वेश्वरस्य सत्येच्छस्य वैदूर्य्यवन्नित्यसिद्धनृसिंहरघुनाथादिबहुरूपस्य तत्र तत्रोक्तलक्षणं जन्म तथा कर्म्म च तत्तद्भक्तसम्बन्धं चरितं तदुभयं दिव्यमप्राकृतं नित्यं भवतीत्येवमेवैतदिति यस्तत्त्वतो वेत्ति यद्गतं भवच्च भविष्यच्च "एको देवो नित्यलीलानुरक्तो भक्तव्यापी भक्तहृद्यन्तरात्मा" इति श्रुत्या दिव्यमिति मदुक्त्या च दृढ़श्रद्धो युक्तिनिरपेक्षः सन्, हे अर्ज्जुन ! स वर्त्तमानं देहं त्यक्त्वा पुनः प्रापञ्चिकं जन्म नैति, किन्तु मामेव तत्तत्कर्म्ममनोज्ञमेति मुक्तो भवतीत्यर्थः, यद्वा मोचकत्वलिङ्गेन

"तत्त्वमसि" इति श्रुतेश्च मे जन्मकर्म्मणी तत्त्वतो ब्रह्मत्वेन यो वेत्तीति व्याख्येयम । इतरथा "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यते अयनाय" इति श्रुतिर्व्याकुप्येत् । समानमन्यत् । जन्मादिनित्यतायां युक्तयस्त्वन्यत्र विस्तृता द्रष्टव्याः ॥९॥

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥१०॥

सा०व०—न केवलमेक एवाधुनिक एव, मज्जन्मकर्म्मतत्त्वज्ञानमात्रेणैव मां प्राप्नोत्यपि तु प्रोक्तना अपि पूर्व्वपूर्व्वकल्पावतीर्णस्य मम जन्मकर्म्मतत्त्वज्ञानवन्तो मामापुरेवेत्याह—वीतेति । "ज्ञानमुक्तलक्षणं मज्जन्मकर्म्मणोस्तत्त्वतोऽनुभवरूपमेव तपस्तेन पूताः" इति श्रीरामानुजाचार्य्यचरणाः । यद्वा,ज्ञाने मज्जन्मकर्म्मणोर्नित्यत्वनिश्चयानुभवे यन्नानाकुमतकुतर्ककुयुक्तिसर्पीविषदाहसहनरूपं तपस्तेन पूताः ; तथा च श्रीरामानुजभाष्यधृता श्रुतिः—"तस्य धीराः परिजानन्ति योनिम्" इति—धीरा धीमन्त एव तस्य योनिं जन्मप्रकारं जानन्तीत्यर्थः । वीतास्त्यक्ताः कुमतप्रजल्पितेषु जनेषु रागाद्या यैस्ते न तेषु रागः प्रीतिर्नापि तेभ्यो भयं नापि तेषु क्रोधो मद्भक्तानामित्यर्थः । कुतो मन्मया मज्जन्मकर्म्मानुध्यानमननश्रवणकीर्त्तनादिप्रचुराः । मद्भावं मयि प्रेमाणम् ॥ १० ॥

गी०भू०—इदानीमिव पुरापि मज्जन्मादिनित्यता-ज्ञानेन बहूनां विमुक्तिरभूदिति तन्नित्यतां द्रढ़यितुमाह—वीतेति । बहवो जना ज्ञानतपसा पूताः सन्तः पुरा मद्भावमागता इत्यनुषङ्गः । मज्जन्मादिनित्यत्वविषयकं यज्ज्ञानं तदेव दुरधिगमश्रुतियुक्तिसम्पाद्यत्वात्तपस्तस्मिन् ज्ञाने वा यद्विविधकुमतकुतर्कादिनिवारणरूपं तपस्तेन पूता निर्धूताविद्या इत्यर्थः । मयि भावं प्रेमाणं

विद्यमानतां वा मत्साक्षात्कृतिम् । कीदृशास्ते इत्याह--वीतेति-
वीताः परित्यक्तास्तन्नित्यत्वविरोधिषु रागादयो यैस्ते, न तेषु
रागं न भयं न च क्रोधं प्रकाशयन्तीत्यर्थः । तत्र हेतुः--मन्मया
मदेकनिष्ठा उपाश्रिताः संसेवमानाः ॥१०॥

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥११॥

सारा०व०—ननु त्वदेकान्तभक्ताः किल तज्जन्मकर्म्मणोर्नित्यत्वं
मन्यन्त एव, केचित्तु ज्ञानादिसिद्ध्यर्थं त्वां प्रपन्ना ज्ञानिप्रभृ-
तयस्त्वज्जन्मकर्म्मणोर्नित्यत्वं नापि मन्यन्त इति तत्राह—य इति ।
यथा येन प्रकारेण मां प्रपद्यन्ते भजन्ते अहमपि तांस्तेनैव प्रकारेण
भजामि,भजनफलं ददामि । अयमर्थः—ये मत्प्रभोर्ज्जन्मकर्म्मणी
नित्ये एवेति मनांसि कुर्व्वाणाम्तत्ताल्लीलायामेव कृतमनोरथविशेषा
मां भजन्तः सुखयन्त्यहमपीश्वरत्वात् कर्त्तुमकर्त्तुमन्यथाकर्त्तु-
मपि समर्थस्तेषामपि जन्मकर्म्मणोर्नित्यत्वं कर्त्तुं तान् स्वपार्षदी-
कृत्य तैः सार्द्धमेव यथासमयमवतरन्नन्तर्द्धानश्च तान् प्रतिक्षण-
मनुगृह्णन्नेव तद्भजनफलं प्रेमाणमेव ददामि । ये ज्ञानिप्रभृतयो
मज्जन्मकर्म्मणोर्नश्वरत्वं मद्विग्रहस्य मायामयत्वञ्च मन्यमानाः मां
प्रपद्यन्ते अहमपि तान् पुनः पुनर्नश्वरजन्मकर्म्मवतो मायापाशपति-
तानेव कुर्व्वाणस्तत्प्रतिफलं जन्ममृत्युदुःखमेन ददामि । ये तु मज्जन्म-
कर्म्मणोर्नित्यत्वं मद्विग्रहस्य च सच्चिदानन्दत्वं मन्यमाना ज्ञानिनः
स्वज्ञानसिद्ध्यर्थं मां प्रपद्यन्ते, तेषां स्वदेहद्वयभङ्गमेवेच्छतां मुमु-
क्षूणामनश्वरं ब्रह्मानन्दमेव सम्पादयन् भजनफलमाविद्यकजन्म-
मृत्युध्वंसमेव ददामि । तस्मान्न केवलं मद्भक्ता एव मां प्रपद्यन्ते,
अपि तु सर्व्वशः सर्व्वेऽपि मनुष्या ज्ञानिनः कर्म्मिणो योगिनश्च
देवतान्तरोपासकाश्च मम वर्त्मानुवर्त्तन्ते—मम सर्व्वस्वरूपत्वात्

ज्ञानकर्म्मादिकं सर्व्वं मामकमेव वर्त्मेति भावः ॥११॥
गी०भू०—ननु नित्यजन्मादिमनोज्ञः सर्व्वेश्वरस्त्वं मयावगत-
कश्चित्त्वङ्गुष्ठमात्रादिरपीश्वरो जन्मादिशून्यः श्रूयते, तत् किं तव
त्वदुपासनस्य च वैविध्यं भवेदिति चेदोमित्याह--ये यथेति । ये
भक्ता मामेकं वैदूर्य्यमिव बहुरूपं सर्व्वेश्वरं यथा येन प्रकारेण
भावेनेति यावत् प्रपद्यन्ते भजन्ति, तानहं तादृशस्तथैव तद्भावानु-
सारिणा रूपेण भावेन च भजामि साक्षात् भवन्ननुगृह्णामि । नून-
तामेवकारो निवर्त्तयति, अतो ममैकस्यैव बहुरूपस्य वर्त्म बहुविध-
मुपासनमार्गमनादिप्रवृत्ततदुपासकपरम्परानुकम्पिता मनुष्याः
सर्व्वे अनुवर्त्तन्ते अनुसरन्ति ॥११॥

काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः ।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥१२॥
चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥१३॥

सारा०व०—तत्रापि मनुष्येषु मध्ये कामिनस्तु मम साक्षाद्-
भूतमपि भक्तिमार्गं परिहाय शीघ्रफलसाधकं कर्म्मवर्त्म एवानु-
वर्त्तन्त इत्याह-काङ्क्षन्त इति । कर्म्मजा सिद्धिः स्वर्गादिमयी ॥१२
सारा०व०—ननु भक्तिज्ञानमार्गौ मोचकौ, कर्म्ममार्गस्तु
बन्धक इति सर्व्वमार्गस्रष्टरि त्वयि परमेश्वरे वैषम्यं प्रसक्तम्,
तत्र नहि नहीत्याह—चातुर्व्वर्ण्यमिति । चत्वारो वर्णा एव चातुर्व-
र्ण्यम्—स्वार्थे ष्यञ् । अत्र सत्त्वप्रधाना ब्राह्मणास्तेषां शम-
दमादीनि कर्म्माणि ; रजःसत्त्वप्रधानाः क्षत्रियास्तेषां शौर्य्ययुद्धा-
दीनि कर्म्माणि, तमोरजःप्रधाना वैश्यास्तेषां कृषिगोरक्षादीनि
कर्म्माणि, तमःप्रधानाः शूद्रास्तेषां परिचर्य्यात्मकं कर्म्मेत्येवं गुण-

कर्म्मविभागशो गुणानां कर्म्मणाञ्च विभागैश्चत्वारो वर्णा मया कर्म्ममार्गाश्रितत्वेन सृष्टाः। किन्तु तेषां कर्त्तारं स्रष्टारमपि माम-कर्त्तारमस्रष्टारमेव विद्धि, तेषां प्रकृतिगुणसृष्टत्वात् प्रकृतेश्च मच्छक्तित्वात्, स्रष्टारमपि मां वस्तुतस्त्वस्रष्टारम्, मम प्रकृति-गुणातीतस्वरूपत्वादिति भावः। अतएवाव्ययम्—स्रष्टृत्वेऽपि न साम्यं किञ्चिदेवेत्यर्थः ॥१३॥

गी०भू०—एवं प्रासङ्गिकं प्रोच्य प्रकृतस्य निष्कामकर्म्मणो ज्ञानाकारत्वं वदिष्यंस्तदनुष्ठातुर्विरलत्वमाह—काङ्क्षन्त इति। इह लोकेऽनादिभोगवासना-नियन्त्रिताः प्राणिनः कर्म्मणां सिद्धिं पशुपुत्रादिफलनिष्पत्तिं काङ्क्षन्तोऽनित्याल्पफलदानपीन्द्रादि-देवान् यजन्ते सकामैः कर्म्मभिर्न तु सर्व्वदेवेश्वरं नित्यानन्द-फलप्रदमपि मां निष्कामैस्तैर्यजन्ते, हि यस्मादस्मिन्मानुषे लोके कर्म्मजा सिद्धिः क्षिप्रं भवति। निष्कामकर्म्माराधितान्मत्तो ज्ञानतो मोक्षलक्षणा सिद्धिस्तु चिरेणैव भवतीति। सर्व्वे लोका भोग-वासनाग्रस्तसदसद्विवेकाः शीघ्रभोगेच्छवस्तदर्थं मद्भृत्यान् देवान् भजन्ति, न तु कश्चित् सदसद्विवेकी संसारदुःखबित्रस्तद्दुःख-निवृत्तये निष्कामकर्म्मभिः सर्व्वदेवेशं मां भजतीति विरलस्तद-धिकारीति भावः ॥१२॥

गी०भू०—अथ निष्कामकर्म्मानुष्ठानविरोधि-भोगवासना-विनाशहेतुमाह—चातुर्व्वर्ण्यमिति द्वाभ्याम्। चत्वारो वर्णाश्चा-तुर्व्वर्ण्यं स्वार्थिकः ष्यञ्। सत्त्वप्रधाना विप्रास्तेषां शमादीनि कर्म्माणि, रजःसत्त्वप्रधानाः क्षत्रियास्तेषां युद्धादीनि, तमोरजः-प्रधाना वैश्यास्तेषां कृष्यादीनि, तमःप्रधानाः शूद्रास्तेषां विप्रा-दित्रिकपरिचर्य्यादीनीति गुणविभागैः कर्म्मविभागैश्च विभ-क्ताश्चत्वारो वर्णाः सर्व्वेश्वरेण मया सृष्टाः स्थितिसंहृत्योरुप-लक्षणमेतत्। ब्रह्मादिस्तम्बान्तस्य प्रपञ्चस्याहमेव सर्गादिकर्त्तेति,

यदाह सूत्रकारः—"जन्माद्यस्य यतः" इति। तस्य सर्गादेः कर्त्तार-मपि मां तत्तत्कर्म्मान्तरितत्वादकर्त्तारं विद्धीति स्वस्मिन् वैष-म्यादिकं परिहृतम्, एतत् प्राहाव्ययमिति स्रष्टृत्वेऽपि साम्यान्न व्येमीत्यर्थः ॥१३॥

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥१४॥

सारा०व०—नन्वेतत्तावदास्ताम्, सम्प्रति त्वं क्षत्रियकुले-ऽवतीर्णः क्षत्रियजात्युचितानि कर्म्माणि प्रत्यहं करोष्येव, तत्र का वार्त्तेत्यत आह—न मामिति। न लिम्पन्ति जीवमिव न लिप्तीकुर्व्वन्ति, नापि जीवस्येव कर्म्मफले स्वर्गादौ स्पृहा, पर-मेश्वरत्वेन स्वानन्दपूर्णत्वेऽपि लोकप्रवर्त्तनार्थमेव मे कर्म्मादिकर-णमिति भावः। इति—मामिति, यस्तु न जानाति स कर्म्मभिर्ब-ध्यत इति भावः ॥१४॥

गी०भू०—एतद्विशदयति—न मामिति। कर्म्माणि विश्वसर्गा-दीनि मां न लिम्पन्ति वैषम्यादिदोषेण जीवमिव लिप्तं न कुर्व्वन्ति, यत्तानि सृज्यजीवकर्म्मप्रयुक्तानि न च मत्प्रयुक्तानि न च सर्गादिकर्म्मफले मम स्पृहास्त्यतो न लिम्पन्तीति। फल-स्पृहया यः कर्म्माणि करोति, स तत्फलैर्लिप्यते, अहन्तु स्वरूपा-नन्दपूर्णः प्रकृतिविलीनक्षेत्रज्ञबुभुक्षाभ्युदितदयः। पर्ज्जन्यवन्नि-मित्तमात्रः सन् तत्कर्म्माणि प्रवर्त्तयामीति। स्मृतिश्च "निमित्त-मात्रमेवासौ सृज्यानां सर्गकर्म्मणि। प्रधानकारणीभूता यतो वै सृज्यशक्तयः॥" इत्याद्या; सृज्यानां देवमानवादिभावभाजां क्षेत्रज्ञानां सर्गक्रियायामसौ परेशो निमित्तमात्रमेव देवादिभाव-वैचित्र्यां कारणीभूतास्तु सृज्यानां तेषां प्राचीनकर्म्मशक्तय एव भवन्तीति तदर्थः। एवमाह सूत्रकृत्—"वैषम्यनैर्घृण्येन" इत्या-

दिना। एवं ज्ञानस्य फलमाह—इति मामिति। इत्थम्भूतं मां योऽभिजानाति, स तद्विरोधिभिस्तद्धेतुभिः प्राचीनकर्म्मभिर्न बध्यते, तैर्विमुच्यत इत्यर्थः ॥१४॥

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥१५॥

सारा०व०—एवमेवम्भूतमेव मां ज्ञात्वा पूर्व्वैर्जनकादिभिरपि लोकप्रवर्त्तनार्थमेव कर्म्म कृतम् ॥१५॥

गी०भू०—एवमिति। मामेवं ज्ञात्वा तदनुसारिभिर्मच्छिष्यैः पूर्व्वैर्विवस्वदादिभिर्मुमुक्षुभिर्निष्कामं कर्म्म कृतं तस्मात्त्वमपि कर्म्मैव तत् कुरु, न तु कर्म्मसंन्यासम्, अशुद्धचित्तश्चेज्ज्ञानगर्भायै चित्तशुद्ध्यै शुद्धचित्तश्चेल्लोकसंग्रहायेत्यर्थः। कीदृशं पूर्व्वैस्तैः कृतं पूर्व्वतरमतिप्राचीनम् ॥१५॥

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥१६॥

सारा०व०—किञ्च, कर्म्मापि न गतानुगतिकन्यायेनैव केवलं विवेकिना कर्त्तव्यम्, किन्तु तस्य प्रकारविशेषं ज्ञात्वैवेत्यतस्तस्य प्रथमं दुर्ज्ञेयत्वमाह ॥१६॥

गी०भू०—ननु किं कर्म्मविषयकः कश्चित् सन्देहोऽप्यस्ति यतः पूर्व्वैः पूर्व्वतरं कृतमित्यतिनिर्व्वन्धाद्ब्रवीषीति चेदस्त्येवेत्याह—किं कर्म्मेति। मुमुक्षुभिरनुष्ठेयं कर्म्म किं रूपं स्यादकर्म्म च कर्म्मान्यत् तदन्तर्गतं ज्ञानञ्च किं रूपमित्यर्थः। तदन्यत्वेनञ्च। अत्रार्थे कवयो धीमन्तोऽपि मोहितास्तद्याथात्म्यनिर्णयासामर्थ्यान्मोहं प्रापुः। अहं सर्व्वेशः सर्व्वज्ञस्ते तुभ्यं तत्

कर्म्म अकारप्रश्लेषादकर्म्म च प्रवक्ष्यामि—यज्ज्ञात्वानुष्ठाय प्राप्य चाशुभात् संसारात् मोक्ष्यसे ॥१६॥

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥१७॥

सारा०व०—निषिद्धाचरणं दुर्गतिप्रापकमिति तत्त्वम्, तथाऽकर्म्मणः कर्म्माकरणस्यापि सन्न्यासिनः कीदृशं कर्म्माकरणं शुभदमिति। अन्यथा निःश्रेयसं कथं हस्तगतं स्यादिति भावः। कर्म्मण इत्युपलक्षणं कर्म्माकर्म्मविकर्म्मणाम्, गतिस्तत्त्वम्; गहना दुर्गमा ॥१७॥

गी०भू०—ननु कवयोऽपि मोहं प्रापुरिति चेत्तत्राह—कर्म्मणो निष्कामस्य मुमुक्षुभिरनुष्ठातव्यस्य स्वरूपं बोद्धव्यं, विकर्म्मणो ज्ञानविरुद्धस्य काम्यकर्म्मणः स्वरूपं बोद्धव्यं, अकर्म्मणश्च कर्म्मभिन्नस्य ज्ञानस्य च स्वरूपं बोद्धव्यम्, तत्तत् स्वरूपविद्भिः सार्द्धं विचार्य्यमित्यर्थः। कर्म्मणोऽकर्म्मणश्च गतिर्गहना दुर्गमा, अतः कवयोऽपि तत्र मोहिताः ॥१७॥

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥१८॥

सारा०व०—तत्र कर्म्माकर्म्मणोस्तत्त्वबोधमाह—कर्म्मणीति। शुद्धान्तःकरणस्य ज्ञानवत्त्वेऽपि जनकादेरिवाकृत-सन्न्यासस्य कर्म्मण्यनुष्ठीयमाने निष्काम-कर्म्मयोगे अकर्म्म कर्म्मेदं न भवतीति यः पश्येत्, तत्कर्म्मणो बन्धकत्वाभावादिति भावः, तथाऽशुद्धान्तःकरणस्य ज्ञानाभावेऽपि शास्त्रज्ञत्वाज्ज्ञानवावदूकस्य सन्न्यासिनोऽकर्म्मणि कर्म्माकरणे कर्म्म पश्येत् दुर्गतिप्रापकं कर्म्मबन्धमेवोपलभते, स एव बुद्धिमान्, स तु कृत्स्नकर्म्माण्येव करोति,

न तु तस्य ज्ञानबावदूकस्य ज्ञानिमानिनः सङ्गेनापि तद्वचसापि सन्न्यासं करोतीति भावः। तथा च भगवद्वाक्यम्—"यस्त्वसंयतषड्वर्गः प्रचण्डेन्द्रियसारथिः। ज्ञानवैराग्यरहितस्त्रिदण्डमुपजीवति॥ सुरानात्मानमात्मस्थं निह्नुते मांश्च धर्म्महा। अविपक्वकषायोऽस्मादमुष्माच्च बिहीयते॥" इति॥१८॥

गी०भू०—कर्म्माकर्म्मणोर्बोद्धव्यं स्वरूपमाह—कर्म्मणीति। अनुष्ठीयमाने निष्कामे कर्म्मणि योऽकर्म्म प्रस्तुतत्वात् कर्म्मण्यात्मज्ञानं पश्येत्, अकर्म्मण्यात्मज्ञाने यः कर्म्म पश्येत्। एतदुक्तं भवति, यो मुमुक्षुर्बुद्धिशुद्धये क्रियमाणं कर्म्मात्मज्ञानानुसन्धिगर्भत्वाज्ज्ञानाकारं, तच्च ज्ञानं कर्म्मद्वारकत्वात् कर्म्माकारं पश्येत्, उभयोरेकात्मोद्देश्यत्वादुभयमेकं विद्यादित्यर्थः। एवमेव वक्ष्यते—"सांख्ययोगौ पृथग्बालाः" इत्यादिनेति। एवमनुष्ठीयमाने कर्म्मणि आत्मयाथात्म्यं योऽनुसंधत्ते, स मनुष्येषु बुद्धिमान् पण्डितः। युक्तो मोक्षयोग्यः, कृत्स्नकर्म्मकृत् सर्व्वेषां कर्म्मफलानामात्मज्ञानसुखान्तर्भूतत्वात्॥१८॥

यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः॥१९॥

सारा०व०—उक्तमर्थं बिवृणोति—यस्येति पञ्चभिः। सम्यगारभ्यन्त इति समारम्भाः कर्म्माणि, कामः फलं तत्संकल्पेन वर्ज्जिताः। ज्ञानमेवाग्निस्तेन दग्धानि कर्म्माणि क्रियमाणानि बिहितानि निषिद्धानि च यस्य सः—एतेन बिकर्म्मणश्च बोद्धव्यमित्यपि बिवृतम्। एतादृशाधिकारिणि कर्म्म यथा अकर्म्म पश्येत्, तथैव विकर्म्माप्यकर्म्मैव पश्येदिति पूर्व्वश्लोकस्यैव सङ्गतिः। यदग्रे बक्ष्यते—"अपि चेदसि पापेभ्यः सर्व्वेभ्यः पापकृत्तमः। सर्व्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि॥ यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्ज्जुन। ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात् कुरुते तथा॥" इति॥१९॥

गी०भू०—कर्म्मणो ज्ञानाकारमाह—यस्येति पञ्चभिः। समारम्भाः कर्म्माणि काम्यन्त इति कामाः फलानि तत्सङ्कल्पेन बर्ज्जिताः शून्या यस्य कर्म्मभिरात्मोद्देशिनो भवन्ति तं बुधाः पण्डितमात्मज्ञमाहुः। तत्र हेतुः—ज्ञानेति। तैः समारम्भैः हृद्विशुद्धौ सत्यामाविर्भूतेनात्मज्ञानाग्निना दग्धानि सञ्चितानि कर्म्माणि यस्य तम्॥१९॥

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः।
कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः॥२०॥

सारा०व०—नित्यतृप्तो नित्यं निजानन्देन तृप्तः। निराश्रयः स्वयोगक्षेमार्थं न कमप्याश्रयते॥२०॥

गी०भू०—उक्तमर्थं बिशदयति—त्यक्त्वेति। कर्म्मफले सङ्गं त्यक्त्वा नित्येनात्मनानुभूतेन तृप्तो निराश्रयः योगक्षेमार्थमप्याश्रयरहित ईदृशो योऽधिकारी स कर्म्मण्यभितः प्रवृत्तोऽपि नैव किञ्चित् करोति—कर्म्मानुष्ठानापदेशेन ज्ञाननिष्ठामेव संपादयतीत्यारुरुक्षोर्दशेयम्। एतेन बिकर्म्मणः स्वरूपं वन्धकत्वं वोद्धव्यमित्युक्तं भवति॥२०॥

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम्॥२१॥

सारा०व०—आत्मा—स्थूलदेहः। शारीरं शारीरनिर्व्वाहार्थं कर्म्मासत्प्रतिग्रहादिकं कुर्व्वन्नपि किल्बिषं पापं नाप्नोतीत्येतदपि बिकर्म्मणश्च वोद्धव्यमित्यस्य बिबरणम्॥२१॥

गी०भू०—अथारूढस्य दशामाह—निराशीरिति त्रिभिः।

निर्गता आशीः फलेच्छा यस्मात् स यतचित्तात्मा वशीकृतचित्तदेहस्त्यक्तसर्व्वपरिग्रह आत्मैकावलोकनार्थत्वात् प्राकृतेषु वस्तुषु ममत्ववर्जितः । शारीरं कर्म्म शरीरनिर्व्वाहार्थं कर्म्मासत्प्रतिग्रहादि कुर्व्वन्नपि किल्विषं पापं नाप्नोति ॥२१॥

यदृच्छालाभसंतुष्टो द्वन्द्वातीतो विमत्सरः ।
समः सिद्धावसिद्धौ च कृत्वापि न निवध्यते ॥२२॥
गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥२३॥

सारा०व०—यज्ञो वक्ष्यमाणलक्षणस्तदर्थं कर्म्माचरतस्तत् कर्म्म प्रविलीयते—अकर्म्मभावमापद्यत इत्यर्थः ॥२३॥

गी०भू०--अथ शरीरनिर्व्वाहार्थमन्नाच्छादनादिकं स्वप्रयत्नेन न संपाद्यमित्याह--यदृच्छयेति । याच्ञां विनैव लाभो यदृच्छालाभस्तेन सन्तुष्टस्तृप्तः । द्वन्द्वानि शीतोष्णादीन्यतीतस्तत्सहिष्णुः । विमत्सरोऽन्यैरुपद्रुतोऽपि तैः सह वैरमकुर्व्वन् यदृच्छालाभसिद्धौ हर्षस्य तदसिद्धौ विषादस्य चाभावान् समः एवंभूतः शारीरं कर्म्म कृत्वापि तेन तेन न बध्यते ज्ञाननिष्ठाप्रभावान्न लिप्यते ॥२२॥

गी०भू०--गतसङ्गस्य निष्कामस्य रागद्वेषादिभिर्मुक्तस्य स्वात्मविषयकज्ञाननिविष्टमनसः यज्ञाय विष्णुं प्रसादयितुं तच्चिन्तनमाचरतः प्राचीनं बन्धकं कर्म्म समग्रं कृत्स्नं प्रविलीयते ॥२३॥

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥२४॥

सारा०व०—'यज्ञायाचरतः' इत्युक्तम्, स यज्ञ एव कीदृशः ?

इत्यपेक्षायामाह—ब्रह्मेति । अर्प्यते अनेनेत्यर्पणं जुह्वादि, तदपि ब्रह्मैव; अर्प्यमाणं हविरपि ब्रह्मैव, ब्रह्माग्नाविति हवनाधिकरणमग्निरपि ब्रह्मैव, ब्रह्मणेति हवनकर्त्तापि ब्रह्मैव । एवं विवेकवता पुंसा ब्रह्मैव गन्तव्यं प्राप्तव्यम्, न तु फलान्तरम् । कुतः ? ब्रह्मात्मकं यत् कर्म्म तत्रैव समाधिश्चित्तैकाग्र्यं यस्य तेन ॥२४॥

गी०भू०--एवं विविक्त-जीवात्मानुसन्धिगर्भतया स्वविहितस्य कर्म्मणो ज्ञानाकारतामभिधाय साङ्गस्य तस्य परात्मरूपतानुसन्धिना तदाकारतामाह--ब्रह्मार्पणमिति । अर्प्यतेऽनेनास्मै वेति व्युत्पत्तेरर्पणं स्रुवं मन्त्राधिदैवतं चेन्द्रादि तत्तच्च ब्रह्मैव, अर्प्यमाणं हविश्चाज्यादि तदपि ब्रह्मैव, तच्च हविर्होमाधारेऽग्नौ ब्रह्मणि यजमानेनाध्वर्य्युणा च ब्रह्मणा हुतं त्यक्तं प्रक्षिप्तञ्च, अग्निर्यजमानोऽध्वर्य्युश्च ब्रह्मैवेत्यर्थः । ब्रह्माग्नाविस्यत्र णिकारलोपश्छान्दसः । न च समस्तं पदमिति वाच्यम्--अग्नौ ब्रह्मदृष्टेर्विधेयत्वात् इत्थञ्च ब्रह्मरूपे साङ्गे कर्म्मणि समाधिश्चित्तैकाग्र्यं यस्य तेन मुमुक्षुणा ब्रह्मैव गन्तव्यं स्वस्वरूपं परस्वरूपञ्च लभ्यमवलोक्यमित्यर्थः । "विज्ञानं ब्रह्म चेद्वेद" इत्यादौ जीवे ब्रह्म-शब्दः, "विज्ञानमानन्दं ब्रह्म" इत्यादौ परमात्मनि च ब्रह्मार्पणत्वादिगुणयोगान्नास्य प्रकरणस्य पौनरुक्त्यम् । 'स्रुवादीनां ब्रह्मत्वं तदायत्तवृत्तिकत्वात्तद्व्याप्यत्वाच्च' इति व्याख्यातारः । तादृशतयानुसन्धितं कर्म्मज्ञानाकारं सत्त्वादवलोकनाय कल्प्यते । २४

दैवमेवापरे यज्ञं योगिनः पर्युपासते ।
ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति ॥२५॥

सारा०व०—यज्ञाः खलु भेदेनान्येऽपि बहवो वर्त्तन्ते, तांस्त्वं शृण्वित्याह—दैवमेवेत्यष्टभिः । देवा इन्द्रवरुणादय इज्यन्ते

यस्मिन् तं दैवमिति। इन्द्रादिषु ब्रह्मबुद्धिराहित्यं दर्शितम्--"सास्य देवतेत्यण्"। योगिनः कर्म्मयोगिनः, अपरे ज्ञानयोगिनस्तु ब्रह्म परमात्मैवाग्निस्तस्मिंस्तत्-पदार्थे यज्ञं हविःस्थानीयं त्वं-पदार्थं जीवं यज्ञेन प्रणबरूपेण मन्त्रेणैव जुह्वति। अयमेव ज्ञान-यज्ञोऽग्रे स्तोष्यते। अत्र 'यज्ञं' 'यज्ञेन' इति शब्दौ कर्म्मकरण-साधनौ प्रथमातिशयोक्त्या शुद्धजीवप्रणबाबाहतुः ॥२५॥

गी०भू०--एवं ब्रह्मानुसन्धिगर्भतया च कर्म्मणो ज्ञानाकारतां निरूप्य कर्म्मयोगभेदानाह—दैवमिति। दैवमिन्द्रादिदेवार्च्चन-रूपं यज्ञमपरे योगिनः पर्य्युपासते तत्रैव निष्ठां कुर्व्वन्ति। अपरे "ब्रह्मार्पणम्" इत्यादिन्यायेन ब्रह्मभूतेऽग्नौ यज्ञेन स्रुवादिना यज्ञं घृतादि-हवीरूपं जुह्वति होम एव निष्ठां कुर्व्वन्तीत्यर्थः ॥२५॥

श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति।
शब्दादीन्विषयानन्य इन्द्रियाग्निषु जुह्वति ॥२६॥

सारा०व०—अन्ये नैष्ठिकाः श्रोत्रादीनीन्द्रियाणि, संयमः संयतं मन एवाग्नयस्तेषु जुह्वति--शुद्धे मनसीन्द्रियाणि प्रवि-लापयन्तीत्यर्थः। अन्ये ततो न्यूना ब्रह्मचारिणः शब्दादीन् विषयानिन्द्रियाग्निष्विन्द्रियाण्येवाग्नयस्तेषु जुह्वति-शब्दादीनी-न्द्रियेषु प्रबिलापयन्तीत्यर्थः ॥२६॥

गी०भू०--श्रोत्रादीनीति-अन्ये नैष्ठिकब्रह्मचारिणः संयमाग्निषु तत्तदिन्द्रियसंयमरूपेष्वग्निषु श्रोत्रादीनि जुह्वति तानि निरुध्य संयमप्रधानास्तिष्ठन्ति। अन्ये गृहिण इन्द्रियाग्निष्वग्नित्वेन भावि-तेषु श्रोत्रादिषु शब्दादीनुपजुह्वति अनासक्त्या तान् भुञ्जाना-स्तानि तत्प्रवणानि कुर्व्वन्ति ॥२६॥

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥२७॥

सारा०व०—अपरे—शुद्ध-त्वंपदार्थविज्ञाः। सर्व्वाणीन्द्रि-याणि तत्कर्म्माणि श्रवणदर्शनादीनि च, प्राणकर्म्माणि दशप्राणास्तत्कर्म्माणि च, प्राणस्य बहिर्गमनमपानस्याधोग-मनम् समानस्य भुक्तपीतादीनां समीकरणम्, उदानस्योच्चै-र्नयनम्, व्यानस्य विश्वङ्नयनम्—"उद्गारे नाग आख्यातः कूर्म्म उन्मीलने स्मृतः। कृकरः क्षुत्करो ज्ञेयो देवदत्तो विजृ-म्भणे। न जहाति मृतञ्चापि सर्व्वव्यापी धनञ्जयः॥" इत्येवं दश प्राणास्तत्कर्म्माणि। आत्मनस्त्वंपदार्थस्य संयमः शुद्धिरेवाग्नि-स्तस्मिन् जुह्वति—मनोबुद्ध्यादीन्द्रियाणि दशप्राणांश्च प्रविला-पयन्ति—एकः प्रत्यगात्मैवास्ति, नान्ये मन आदय इति भाव-यन्तीत्यर्थः ॥२७॥

गी०भू०—सर्व्वाणीति—अपरे इन्द्रियकर्म्माणि प्राणकर्म्मा-णि च आत्मसंयमयोगाग्नौ च जुह्वति—आत्मनो मनसः संयमः स एव योगस्तस्मिन्नग्नित्वेन भाविते जुह्वति। मनसा इन्द्रियाणां प्राणानाञ्च कर्म्मप्रवणतां निवारयितुं प्रयतन्ते। इन्द्रियाणां श्रोत्रादीनां कर्म्माणि शब्दग्रहणादीनि प्राणकर्म्माणि प्राणस्य बहिर्गमनं कर्म्म, अपानस्याधोगमनम्, व्यानस्य निखिलदेह-व्यापनमाकुञ्चनप्रसारणादि, समानस्याशितपीतादिसमीकरणम्, उदानस्योर्द्ध्वनयनं चेत्यवं बोध्यानि सर्व्वाणि सामस्त्येन ज्ञान-दीपिते आत्मानुसन्धानोज्ज्वलिते ॥ २७ ॥

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे।
स्वाध्यायज्ञानयज्ञाश्च यतयः शंसितव्रताः ॥२८॥

सारा०व०--द्रव्यदानमेव यज्ञो येषां ते 'द्रव्ययज्ञाः', तपः कृच्छ्रचान्द्रायणादि एव यज्ञो येषां ते 'तपोयज्ञाः', योगोऽष्टाङ्ग एव यज्ञो येषां ते 'योगयज्ञाः', स्वाध्यायो वेदस्य पाठस्तदर्थस्य

ज्ञानञ्च यज्ञो येषां ते, यतयो यत्नपराः—सर्व्वे एते सम्यक् शितं तीक्ष्णीकृतं व्रतं येषां ते ॥२८॥

गी०भू०—द्रव्येऽति — केचित् कर्म्मयोगिनो द्रव्ययज्ञाः अन्नादिदानपराः, केचित्तापोयज्ञाः कृच्छ्रचान्द्रायणादिव्रतपराः, केचिद्योगयज्ञाः पुण्यतीर्थादिसङ्गमपराः, केचित् स्वाध्यायज्ञानयज्ञाः वेदाभ्यासपरास्तदर्थाभ्यासपराश्च । यतयस्तत्र प्रयत्नशीलाः शंसितव्रतास्तीक्ष्णतत्तदाचरणाः ॥ २८ ॥

अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ।
अपरे नियताहाराः प्राणाः प्राणेषु जुह्वति ॥२९॥

सारा०व०—अपरे प्राणायामनिष्ठाः–अपानेऽधोवृत्तौ प्राणमूर्द्ध्ववृत्तं जुह्वति पूरक-काले प्राणमपानेनैकीकुर्व्वन्ति ; तथा रेचक-कालेऽपानं प्राणे जुह्वति ; कुम्भक-काले प्राणापानयोर्गती रुद्ध्वा प्राणायाम—परायणा भवन्ति । अपरे इन्द्रियजयकामाः, नियताहाराः अल्पाहाराः, प्राणेष्वाहारसङ्कोचनेनैव जीर्य्यमानेषु प्राणानिन्द्रियाणि जुह्वति । इन्द्रियाणां प्राणाधीनवृत्तित्वात् प्राणदौर्व्वल्ये सति स्वयमेव स्व-स्व-विषयग्रहणासमर्थानीन्द्रियाणि प्राणेष्वेवाल्पीयन्त इत्यर्थः ॥२९॥

गी०भू०--किञ्चापाने इति । तथापरे प्राणायामपरायणास्ते त्रिधा अधोवृत्तावपाने प्राणमूर्द्ध्ववृत्तिं जुह्वति,--पूरकेन प्राणमपानेन सहैकीकुर्व्वन्ति । तथा प्राणेऽपानं जुह्वति,--रेचकेनापानं प्राणेन सहैकीकृत्य वहिर्निर्गमयन्ति; यथा प्राणापानयोर्गती श्वासप्रश्वासौ कुम्भकेन रुद्ध्वा वर्त्तन्ते इति । आन्तरस्य वायोर्नासास्येन वहिर्निर्गमः श्वासः प्राणस्य गतिः; बिनिर्गतस्य तस्यान्तः-

प्रवेशः प्रश्वासः अपानस्य गतिः; तयोर्निरोधः कुम्भकः; स द्विविधः–वायुमापूर्य्य श्वासप्रश्वासयोर्निरोधोऽन्तःकुम्भकः, वायुं विरेच्य तयोर्निरोधो वहिःकुम्भकः । अपरे नियताहारा भोजनसङ्कोचमभ्यसन्तः प्राणान् इन्द्रियाणि प्राणेषु जुह्वति;—तेष्वल्पाहारेण जीर्य्यमाणेषु तदायत्तवृत्तिकानि तानि विषयग्रहणाक्षमाणि तप्तायोनिषिक्तोदविन्दुवत्तेस्वेव विलीयन्ते ॥ २९ ॥

सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः ।
यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ॥३०॥
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥३१॥

सारा०व०—सर्व्वेऽप्येते यज्ञविद उक्तलक्षणान् यज्ञान् विन्दमानाः सन्तो ज्ञानद्वारा ब्रह्म यान्ति । अत्राननुसंहितं फलमाह—यज्ञशिष्टं यज्ञावशिष्टं यदमृतं भोगैश्वर्य्यसिद्ध्यादिकं तद्भुञ्जते इति । तथा अनुसंहितं फलमाह—ब्रह्म यान्तीति ॥३०॥

सारा०व०—तदकरणे प्रत्यवायमाह–नायमिति । अयमल्पसुखो मनुष्यलोकोऽपि नास्ति, कुतोऽन्यो देवादिलोकस्तेन प्राप्तव्य इत्यर्थः ॥३१॥

गी०भू०-एते खल्विन्द्रियविजयकामाः सर्व्वेऽपीति यज्ञविद; पूर्व्वोक्तान् देवादियज्ञान् विन्दमाना तैरेव यज्ञैः क्षपितकल्मषाः । अननुसंहितं फलमाह,--यज्ञशिष्टेति । यज्ञशिष्टं यदमृतमन्नादि भोगैश्वर्य्यसिद्ध्यादि च तद्भुञ्जानाः । अनुसंहितं फलमाह,-यान्तीति । तत्साध्येन ज्ञानेन ब्रह्मेति प्राग्वत् ॥ ३० ॥

गी०भू०--तदकरणे दोषमाह,--नायमिति । अयज्ञस्योक्तयज्ञाननुष्ठातुरयं प्रकृतो लोकस्तत्रत्यस्त्रिवर्गो नास्ति, अन्यो मोक्षलभ्यो लोकः कुतः स्यात् ? ॥ ३१ ॥

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥३२॥

सारा०व०—ब्रह्मणो वेदस्य मुखेन वेदेन स्वमुखेनैव स्पष्टमुक्ता इत्यर्थः । कर्म्मजान् वाङ्मनःकायकर्म्मजनितान् ॥३२॥

गी०भू०-एवमिति ब्रह्मणो वेदस्य मुखे वितता विविक्तात्मप्राप्त्युपायतया स्वमुखेनैव तेन स्फुटमुक्ताः । कर्म्मजानिति वाङ्मनःकायकर्म्मजनितानित्यर्थः । एवं ज्ञात्वा तदुपायतया तेनोक्तान् तानवबुध्यानुष्ठाय तदुत्पन्नविज्ञानेनावलोकितात्मद्वयः संसाराद्विमोक्ष्यसे ॥ ३२ ॥

श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परंतप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥३३॥

सारा०व०—तेष्वपि मध्ये ब्रह्मार्पणं ब्रह्महविरिति लक्षणादपि द्रव्यमयाद्यज्ञाद् ब्रह्माग्नावित्यनेनोक्तो ज्ञानयज्ञः श्रेयान् ; कुतः ? ज्ञाने सति सर्व्वं कर्म्माखिलमव्यर्थं सत् परिसमाप्यते समाप्तीभवति—ज्ञानानन्तरं कर्म्म न तिष्ठतीत्यर्थः ॥३३॥

गी०भू०--उक्ताः कर्म्मयोगा विविक्तात्मानुसन्धिगर्भत्वाद्-रण्यादिव उभयरूपास्तेषु ज्ञानरूपं संस्तौति,-श्रेयानिति । द्विरूपे कर्म्मणि कर्म्मद्रव्यमयादंशाज्ज्ञानमयोंऽशः श्रेयान् प्रशस्ततरः । द्रव्यमयादित्युपलक्षणमिन्द्रियसंयमादीनां तेषां तदुपायत्वात् । एतद्विवृणोति,-हे पार्थ ! ज्ञाने सति सर्व्वं कर्म्माखिलं साङ्गं परिसमाप्यते निवृत्तिमेति फले जाते साधननिवृत्तेर्दर्शनात् ॥ ३३ ॥

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥३४॥

सारा०व०—तज्ज्ञानप्राप्तये प्रकारमाह—तदिति । प्रणिपातेन ज्ञानोपदेष्टरि गुरौ दण्डवन्नमस्कारेण, "भगवन् ! कुतोऽयं मे संसारः, कथं निवर्त्तिष्यते" इति परिप्रश्नेन च, सेवया तत्परिचर्य्यया च, "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्" इति श्रुतेः ॥३४॥

गी०भू०—एवं जीवस्वरूपज्ञानं तत्साधनञ्च साङ्गमुपदिश्य परस्वरूपोपासनज्ञानमुपदिशन् सत्प्रसङ्गलभ्यत्वं तस्याह,-तदिति । यदर्थं तदुभयं मया तवोपदिष्टं 'अविनाशि तु तद्विद्धि' इत्यादिना तत् परात्मसम्बन्धिज्ञानं प्रणिपातादिभिः प्रसादितेभ्यो ज्ञानिभ्यः सद्भ्यस्त्वमवगत-स्वस्वरूपो विद्धि प्राप्नुहि । तत्र प्रणिपातो दण्डवत्प्रणतिः, सेवा भृत्यवत्तेषां परिचर्य्या, परिप्रश्नः तत्स्वरूपतद्गुणतद्विभूतिविषयको विविधः प्रश्नः । ननूदासीनास्ते न वदयन्तीति चेत्तत्राह,--उपेति । ते ज्ञानिनोऽधिगतस्वपरात्मानः प्रणिपातादिना तज्जिज्ञासुतामालक्ष्य ते तुभ्यं तादृशाय तत्-सम्बद्धि ज्ञानमुपदेक्ष्यन्ति तत्त्वदर्शिनस्तज् ज्ञानप्रचारकाः कारुणिका इति यावत् । नन्वत्र तदिति जीवज्ञानं वाच्यं प्रकृतत्वादिति चेन्न,—"न त्वेवाहं जातु नासं" "युक्त आसीत मत्परः" "अजोऽपि सन्नव्ययात्मा" इत्यादिना परात्मनोऽप्याप्रकृतत्वात् तज्-ज्ञानायैव जीवज्ञानस्याप्युपदेश्यत्वात् । एवमाह सूत्रकारः—"अन्यार्थश्च परामर्शः" इति; अन्यथा श्रुतिसूत्रार्थसम्वादिनोऽग्रिमस्य ज्ञानमहिम्नो विरोधः स्यात् उक्तमेव सुष्ठु ॥ ३४ ॥

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥३५॥

सारा०व०--ज्ञानस्य फलमाह-यज्ज्ञात्वेति सार्द्धैस्त्रिभिः । यज्ज्ञानं देहादतिरिक्त एवात्मेति लक्षणं ज्ञात्वैवं मोहमन्तःकरणधर्म्मं न

प्राप्स्यसि, येन च मोह-विगमेन स्वाभाविकनित्यसिद्धात्मज्ञानलाभादशेषाणि भूतानि मनुष्यतिर्य्यगादीन्यात्मनि जीवात्मन्युपाधित्वेन स्थितानि पृथक् द्रक्ष्यसि । अथो मयि परमकारणे च कार्य्यत्वेन स्थितानि द्रक्ष्यसि ॥३५॥

गी०भू०—उक्तज्ञानफलमाह,—यदिति । यज्जीवज्ञानपूर्व्वकं परमात्मसम्बन्धिज्ञानं ज्ञात्वोपलभ्य पुनरेवं बन्धुवधादिहेतुकं मोहं न यास्यसि । कथं न यास्यामीत्यत्राह,—येनेति । येन ज्ञानेन भूतानि देवमानवादिशरीराणि अशेषेण सामस्त्येन सर्व्वाणीत्यर्थः । आत्मनि स्वस्वरूपे उपाधित्वेन स्थितानि तानि पृथग्द्रक्ष्यसि, अतो मयि सर्व्वेश्वरे सर्व्वहेतौ कार्य्यत्वेन स्थितानि तानि द्रक्ष्यसीति । एतदुक्तं भवति,--देहद्वयविविक्ता जीवात्मानस्तेषां हरिविमुखानां हरिमाययैव देहेषु दैहिकेषु च ममत्वानि रचितानि, हन्तृहन्तव्यभावावभासश्च तयैव । शुद्धस्वरूपाणां न तत्तत्सम्बद्धः । परमात्मा खलु सर्व्वेश्वरः स्वाश्रितानां जीवानां तत्तत्कर्म्मानुगुणतया तत्तद्देहेन्द्रियाणि तत्तद्देहयात्रां लोकान्तरेषु तत्तत्सुखभोगांश्च सम्पादयत्युपास्तिस्तु मुक्तिमित्येव ज्ञानिनो न मोहावकाश इति ॥ ३५ ॥

अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ।
सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥३६॥

सारा०व०—ज्ञानस्य माहात्म्यमाह-अपि चेदिति । पापिभ्यः पापकृद्भ्योऽपि सकाशाद्यद्यप्यतिशयेन पापकारी त्वमसि, तथापि अत्रैतावत्पापसत्त्वे कथमन्तःकरणशुद्धिः ? तदभावे च कथं ज्ञानोत्पत्तिः ? नाप्युत्पन्नज्ञानस्यैतद्दुराचारत्वं सम्भवेदतोऽत्र व्याख्या श्रीमधुसूदनसरस्वतीपादानाम्--"अपि चेदित्यसम्भाविताभ्युपगमप्रदर्शनार्थौ निपातौ । यद्यप्ययमर्थो न सम्भवत्येव, तथापि

ज्ञानफलकथनायाभ्युपेत्योच्यते" इत्येषा ॥३६॥

गी०भू०--ज्ञानप्रभावमाह,--अपि चेदिति । यद्यपि सर्व्वेभ्यः पापकर्त्तृभ्यस्त्वमतिशयेन पापकृदसि, तथापि सर्व्वं वृजिनं निखिलं पापं दुस्तरत्वेनार्णवतुल्यमुक्तलक्षणज्ञानप्लवेन संतरिष्यसि ॥ ३६ ॥

यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥३७॥
न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥३८॥

सारा०व०—शुद्धान्तःकरणस्योत्पन्नं तु प्रारब्धभिन्नं कर्म्ममात्रं विनाशयतीति सदृष्टान्तमाह-यथेति । समिद्धः प्रज्वलितः ॥३७

सारा०व०—इह तपोयोगादियुक्तेषु मध्ये ज्ञानेन सदृशं पवित्रं किमपि नास्ति । तज्ज्ञानं न सर्व्वसुलभम् ; किन्तु योगेन निष्कामकर्म्मयोगेन सम्यक् सिद्ध एव, न त्वपरिपक्वः, सोऽपि कालेनैव, न तु सद्यः । आत्मनि स्वस्मिन् स्वयं प्राप्तं विन्दति, न तु सन्न्यासग्रहणमात्रेणैवेति भावः ॥३८॥

गी०भू०--ब्रह्मविद्यया पापकर्म्माणि नश्यन्तीत्युक्तम्; इदानीं पुण्यकर्म्माण्यपि नश्यन्तीत्याह,--यथेति । एधांसि काष्ठानि समिद्धः प्रज्वलितोऽग्निर्यथा भस्मसात् कुरुते, तथा ज्ञानाग्निः स्वपरात्मानुभववह्निः सर्व्वाणि कर्म्माणि पुण्यानि पापानि च प्रारब्धेतराणि भस्मसात् कुरुते । तत्र सञ्चितानि प्रारब्धेतराणीषीकतुलवन्निर्दहति क्रियमाणानि पद्मपत्राम्बुविन्दुवदश्लेषयति प्रारब्धानि तु तत्प्रभावेनातिजीर्णान्यपि सत्पथप्रचारार्थया हरेरिच्छयैवात्मानुभाविन्यवस्थापयतीति । श्रुतिश्च--"उभे उहैवैष एते तरत्यमृतः साध्वसाधुनी" इति,--एष ब्रह्मानुभवी उभे

सञ्चित्य - क्रियमाणे एते साध्वसाधुनी पुण्यपापे कर्म्मणी तरति क्रामतीत्यर्थः। एवमाह सूत्रकारः,--"तदधिगम उत्तरपूर्व्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्" इत्यादिभिः ॥ ३७ ॥

गी०भू०--न हीति। हि यतो ज्ञानेन सदृशं पवित्रं शुद्धिकरं तपस्तीर्थाटनादिकं नास्ति, अतस्तत् सर्व्वपापनाशकं तज्ज्ञानं न सर्व्वसुलभं, किन्तु योगेन निष्कामकर्म्मणा संसिद्धः परिपक्व एव कालेनैव, न तु सद्यः। आत्मनि स्वस्मिन् स्वयं लब्धं विन्दति, न तु पारिव्राज्यग्रहणमात्रेणेति ॥ ३८ ॥

श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥३९॥

सारा०व०—तर्हि कीदृशः सन् कदा प्राप्नोतीत्यत आह—'श्रद्धा' निष्कामकर्म्मणैवान्तःकरणशुद्ध्यैव ज्ञानं स्यादिति शास्त्रार्थे आस्तिक्यबुद्धिस्तद्वानेव; तत्परस्तदनुष्ठाननिष्ठस्तादृशोऽपि यदा संयतेन्द्रियः स्यात्तदा परां शान्तिं संसारनाशम् ॥३९

गी०भू०--कीदृशः सन् कदा विन्दतीत्याह,--श्रद्धावानिति। निष्कामेण कर्म्मणा हार्द्दशुद्धौ ज्ञानं स्यादिति। दृढविश्वासः श्रद्धा तद्वान् तत्परस्तदनुष्ठाननिष्ठः तादृगपि यदा संयतेन्द्रियस्तदा परां शान्तिं मुक्तिम् ॥ ३९ ॥

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति ।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः ॥४०॥

सारा०व०-ज्ञानाधिकारिणमुक्त्वा तद्विपरीताधिकारिणमाह—अज्ञः पश्वादिवन्मूढः; अश्रद्दधानः शास्त्रज्ञानवत्त्वेऽपि नानावादिनां परस्परविप्रतिपत्तिं दृष्ट्वा न क्वापि विश्वस्तः; श्रद्धावत्त्वेऽपि संशयात्मा—ममैतत् सिध्येन्न वेति सन्देहाक्रान्तमतिः; तेष्वपि मध्ये संशयात्मानं विशेषतो निन्दति—नायमिति ॥४०॥

गी०भू०--ज्ञानाधिकारिणं तत्फलञ्चाभिधाय तद्विपरीतं तत्फलञ्चाह--अज्ञश्चेति। अज्ञः पश्वादिवच्छास्त्रज्ञानहीनः, अश्रद्दधानः शास्त्रज्ञाने सत्यपि विवादिविप्रतिपत्तिभिर्न क्वापि विश्वस्तः, श्रद्धावत्त्वेऽपि संशयात्मा ममैतत् सिद्ध्येन्न वेति सन्दिहानमना विनश्यति स्वार्थाद्विच्यवते। तेष्वपि मध्ये संशयात्मानं विनिन्दति,--नायमिति। अयं प्राकृतो लोकः परोऽप्राकृतः संशयात्मनः किञ्चिदपि सुखं नास्ति। शास्त्रीयकर्म्मजन्यं हि सुखं, तच्च कर्म्म विविक्तात्मज्ञानपूर्व्वकम्, तत्र सन्दिहानस्य कुतस्तदित्यर्थः ॥ ४० ॥

योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम् ।
आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय ॥४१॥

सा०ब०-नैष्कर्म्म्यं त्वेतादृशस्य स्यादित्याह-योगान्निष्काम-कर्म्मयोगानन्तरमेव संन्यस्तकर्म्माणं सन्न्यासेन त्यक्तकर्म्माणम्, ततश्च ज्ञानाभ्यासानन्तरं छिन्नसंशयम्, आत्मवन्तं प्राप्तप्रत्यगात्मानं कर्म्माणि न निबध्नन्ति ॥४१॥

गी०भू०--ईदृशस्य नैष्कर्म्म्यलक्षणासिद्धिः स्यादित्याह,-योगेति। योगेन 'योगस्थः कुरु कर्म्माणि' इत्यत्रोक्तेन संन्यस्तानि ज्ञानाकारतापन्नानि कर्म्माणि यस्य तम्, मदुपदिष्टेन ज्ञानेन छिन्नसंशयो यस्य तम्। आत्मवन्तमवलोकितात्मानं कर्म्माणि न निबध्नन्ति,--तेषां ज्ञानेन विगमात् ॥ ४१ ॥

तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः ।
छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत ॥४२॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां भीष्म-

पर्व्वणि श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्ज्जुनसंवादे ज्ञानयोगो नाम चतुर्थोऽध्यायः ।

सारा०व०—उपसंहरति तस्मादिति । हृत्स्थं हृद्गतं संशयं छित्त्वा योगं निष्कामकर्म्मयोगमातिष्ठाश्रय, उत्तिष्ठ युद्धं कर्त्तुमिति भावः ॥४२॥

उक्तेषु मुक्त्युपायेषु ज्ञानमत्र प्रशस्यते ।
ज्ञानोपायन्तु कर्म्मैवेत्यध्यायार्थो निरूपितः ॥ (२)
इति सारार्थवर्षिण्यां हर्षिण्यां भक्तचेतसाम् ।
गीतास्वयं चतुर्थो हि सङ्गतः सङ्गतः सताम् ॥

गी०भू०—तस्मादिति । हृत्स्थं हृद्गतमात्मविषयकं संशयं मदुपदिष्टेन ज्ञानासिना छित्त्वा योगं निष्कामं कर्म मयोपदिष्टमातिष्ठ तदर्थमुत्तिष्ठेति ॥४२॥

द्व्यंशकं धान्यवत् कर्म्म तुषांशादिव तण्डुलः ।
श्रेष्ठं द्रव्यांशतो ज्ञानमिति तुर्य्यस्य निर्णयः ॥

इति श्रीभगवद्गीतोपनिषद्भाष्ये चतुर्थोऽध्यायः ।

पञ्चमोऽध्यायः

अर्ज्जुन उवाच--

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥१॥

सा०ब०-प्रोक्तं ज्ञानादपि श्रेष्ठं कर्म्म तद्वाढ्यं सिद्धये ।
तत्पदार्थस्य च ज्ञानं साम्याद्या अपि पञ्चमे ॥ (१)

पर्व्वणि श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्ज्जुनसंवादे ज्ञानयोगो नाम चतुर्थोऽध्यायः ।

सारा०व०—उपसंहरति तस्मादिति । इत्थं हृद्गतं संशयं छित्त्वा योगं निष्कामकर्म्मयोगमातिष्ठाश्रय, उत्तिष्ठ युद्धं कर्त्तुमिति भावः ॥४२॥

उक्तेषु मुक्त्युपायेषु ज्ञानमत्र प्रशस्यते ।
ज्ञानोपायन्तु कर्म्मैवेत्यध्यायार्थो निरूपितः ॥ (२)
इति सारार्थवर्षिण्यां हर्षिण्यां भक्तचेतसाम् ।
गीतास्वयं चतुर्थो हि सङ्गतः सङ्गतः सताम् ॥

गी०भू०—तस्मादिति । इत्थं हृद्गतमात्मविषयकं संशयं मदुपदिष्टेन ज्ञानासिना छित्त्वा योगं निष्कामं कर्म मयोपदिष्टमातिष्ठ तदर्थमुत्तिष्ठेति ॥४२॥

द्व्यंशकं धान्यवत् कर्म्म तुषांशादिव तण्डुलः ।
श्रेष्ठं द्रव्यांशतो ज्ञानमिति तुर्य्यस्य निर्णयः ॥

इति श्रीभगवद्गीतोपनिषद्भाष्ये चतुर्थोऽध्यायः ।

पञ्चमोऽध्यायः

अर्ज्जुन उवाच—

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥१॥

सा०व०—प्रोक्तं ज्ञानादपि श्रेष्ठं कर्म्म तद्वाढ्यसिद्धये ।
तत्पदार्थस्य च ज्ञानं साम्याद्या अपि पञ्चमे ॥ (१)

सारा०व०—पूर्व्वाध्यायान्ते श्रुतेन बाक्यद्वयेन विरोधमाशङ्कमानः पृच्छति—सन्न्यासमिति। "योगसंन्यस्तकर्म्मणां ज्ञानसंछिन्नसंशयम्। आत्मवन्तं न कर्म्माणि निबध्नन्ति धनञ्जय॥" इति बाक्येन त्वं कर्म्मयोगेनोत्पन्नज्ञानस्य कर्म्मसन्न्यासं ब्रूषे; "तस्मादज्ञानसम्भूतं हृत्स्थं ज्ञानासिनात्मनः छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत॥" इत्यनेन पुनस्तस्यैव कर्म्मयोगञ्च ब्रूषे। न च कर्म्मसन्न्यासः कर्म्मयोगश्चैकस्यैकदैव सम्भवतः स्थितिगतिवद्बिरुद्धस्वरूपत्वात्। तस्मात् ज्ञानी कर्म्मसन्न्यासं कुर्य्यात् कर्म्मयोगं वा कुर्य्यादिति त्वदभिप्रायमनवगतोऽहं पृच्छामि-एतयोर्म्मध्ये यदेकं श्रेयस्त्वया सुनिश्चितं तन्मे ब्रूहि॥१

गी०भू०—ज्ञानतः कर्म्मणः श्रैष्ठ्यं सुकरत्वादिना हरिः।
शुद्धस्य तदकर्त्तृत्वं त्वेत्यादि प्राह पञ्चमे॥

गी०भू०—द्वितीये मुमुक्षुं प्रत्यात्मबिज्ञानं मोचकमभिधाय तदुपायतया निष्कामं कर्म्म कर्त्तव्यमभ्यधात्। लब्धविज्ञानस्य न किञ्चित् कर्म्मास्तीति "यस्त्वात्मरतिरेव स्यात्" इति तृतीये, "सर्वं कर्म्माखिलं पार्थ" इति चतुर्थे चावादीत्, अन्ते तु तस्मादज्ञानसम्भूतम्" इत्यादिना तस्यैव पुनः कर्म्मयोगं प्राबोचत्। तत्राऽर्ज्जुनः पृच्छति सन्न्यासमिति। हे कृष्ण? कर्म्मणां सन्न्यासं सर्व्वेन्द्रियव्यापारबिरतिरूपं ज्ञानयोगमित्यर्थः, पुनर्योगं कर्म्मानुष्ठानञ्च सर्व्वेन्द्रियव्यापाररूपं शंससि। न चैकस्य युगपत्तौ संभवेतां स्थितिगतिवत्तामस्तेजोबच्च विरुद्धस्वरूपत्वात्। तस्माल्लब्धज्ञानः कर्म्म सन्न्यसेदनुतिष्ठेद्वेति भवदभिमतं वेत्तुमशक्तोऽहं पृच्छामि। एतयोः कर्म्मसन्न्यासकर्म्मानुष्ठानयोर्यदेकं श्रेयस्त्वया सुनिश्चितं तत्त्वं मे ब्रूहि इति॥१॥

भगवानुवाच—

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते ॥२॥

सारा०व०—कर्म्मयोगो बिशिष्यत इति ज्ञानिनः कर्मकरणे न कोऽपि दोषः ; प्रत्युत निष्कामकर्मणा चित्तशुद्धिदार्ढ्याज्ज्ञान-दार्ढ्यमेव स्यात् ; सन्न्यासिनस्तु कदाचिच्चित्तवैगुण्ये सति तदु-पशमनार्थं किं कर्म्म निषिद्धम् ? ज्ञानाभ्यासप्रतिबन्धकन्तु चित्त-वैगुण्यमेव, बिषयग्रहणे तु वान्ताशित्वमेव स्यादिति भावः ॥२॥

गी०भू०—एवं पृष्टो भगवानुवाच,—सन्न्यास इति । निःश्रे-यसकरौ मुक्तिहेतु कर्म्मसन्न्यासाज् ज्ञानयोगाद्विशिष्यते श्रेष्ठो भवति । अयं भावः,—न खलु लब्धज्ञानस्यापि कर्म्मयोगो दोषावहः, किन्तु ज्ञानगर्भत्वाज् ज्ञानदार्ढ्यकृदेव । ज्ञाननिष्ठतया कर्म्मसन्न्यासिनस्तु चित्तदोषे सति तद्दोषविनाशाय कर्म्मानुष्ठेयं प्रतिषेधकशास्त्रात् । कर्म्मत्यागबाक्यानि त्वात्मनि रतौ सत्यां कर्म्माणि तं स्वयं त्यजन्तीत्याहुः । तस्मात् सुकरत्वादप्रमाद-त्वाज्ज्ञानगर्भत्वाच्च कर्म्मयोगः श्रेयानिति ॥२॥

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते ॥३॥

सारा०व०— न च सन्न्यासप्राप्यो मोक्षोऽकृतसन्न्यासेनैव तेन न प्राप्य इति वाच्यमित्याह—ज्ञेय इति । स तु शुद्धचित्तः कर्म्मी नित्यसन्न्यासी एव ज्ञेयः । 'हे महाबाहो' इति मुक्ति-नगरीं जेतुं स एव महावीर इति भावः ॥३॥

गी०भू०—कुतो बिशिष्यते तत्राह—ज्ञेय इति । स बिशुद्ध-चित्तः कर्म्मयोगी नित्यसन्न्यासी स सर्व्वदा ज्ञानयोगनिष्ठो

ज्ञेयः, यः कर्म्मान्तर्गतात्मानुभवानन्दपरितृप्तस्ततोऽन्यत किञ्चित न काङ्क्षति, न च द्वेष्टि, निर्द्वन्द्वो द्वन्द्वसहिष्णुः सुखमनायासेन सुकरकर्म्मनिष्ठयेत्यर्थः ॥३॥

सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥४॥

सारा०व०—तस्माद्यच्छ्रेय एवैतयोरिति त्वदुक्तमपि बस्तुतो न घटते, बिबेकिभिरुभयोः पार्थक्याभावस्य दृष्टत्वा-दित्याह—सांख्ययोगाविति । सांख्य-शब्देन ज्ञाननिष्ठाबाचिना तदङ्गः सन्न्यासो लक्ष्यते । सन्न्यास-कर्म्मयोगौ पृथक् स्वतन्त्रा-विति बाला बदन्ति न तु बिज्ञाः, 'ज्ञेयः स नित्यसन्न्यासी' इति पूर्व्वोक्तेः, अत एकमपीत्यादि ॥४॥

गी०भू०—यः श्रेय एतयोरेकमिति त्वद्वाक्यञ्च न घटत इत्याह-सांख्येति—ज्ञानयोगकर्म्मयोगौ फलभेदात् पृथग्भूता-विति बालाः प्रबदन्ति, न तु पण्डिताः । अतएव एकमित्यादि-फलमात्मावलोकलक्षणम् ॥४॥

यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥५॥

सारा०व०—एतदेव स्पष्टयति—यदिति । सांख्यैः सन्न्यासेन योगैर्निष्कामकर्म्मणा, बहुबचनं गौरवेण, अतएव तद्द्वयं पृथग्-भूतमपि यो बिबेकेनैकमेव पश्यति स पश्यति-चक्षुष्मान् पण्डित इत्यर्थः ॥५॥

गी०भू०—एतद्विशदयति-यदिति । सांख्यैर्ज्ञानयोगिभिर्योगैः निष्कामकर्म्मभिः "अर्श आद्यच्" । स्थानमात्मावलोकलक्षणम्-'तिष्ठन्त्यस्मिन्', न तु कदाचित् प्रच्यबन्त इति व्युत्पत्तेः । अत-

एव तद्द्वयं निवृत्तिप्रवृतिरूपतया भिन्नरूपमपि फलैक्यादेकं यः पश्यति वेत्ति, स पश्यति स चक्षुष्मान् पण्डित इत्यर्थः ॥५॥

संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ॥६॥

साराᵒवᵒ--किन्तु सम्यक्चित्तशुद्धिमनिर्द्धार्यतो ज्ञानिनः सन्न्यासो दुःखदः कर्म्मयोगस्तु सुखद एवेति पूर्व्वव्यञ्जितमर्थं स्पष्टमेवाह--सन्न्यासस्त्विति । चित्तवैगुण्ये सतीति शेषः । अयोगतः कर्म्मयोगाभावाच्चित्त--वैगुण्यप्रशामककर्म्मयोगस्य सन्न्यासिन्यभावात् तत्रानधिकारादित्यर्थः। सन्न्यासो दुःखमेव प्राप्तं भवति । तदुक्तं वार्त्तिककृद्भिः--"प्रमादिनो बहिश्चित्ताः पिशुनाः कलहोत्सुकाः । सन्न्यासिनोऽपि दृश्यन्ते दैवसंदूषिताशयाः ॥" इति, श्रुतिरपि--"यदि न समुद्धरन्ति यतयो हृदि कामजटाः" इति, भगवतापि--"यस्त्वसंयतषड्वर्गः" (भा ११ । १८ । ४०) इत्याद्युक्तम् । तस्माद्योगयुक्तः निष्काम-कर्म्मवान् मुनिर्ज्ञानी सन् ब्रह्म शीघ्रं प्राप्नोति ॥६॥

गीᵒभूᵒ--ज्ञानयोगस्य दुष्करत्वात् सुकरकर्म्मयोगः श्रेयानित्याह—सन्न्यासस्त्विति । सन्न्यासः सर्व्वेन्द्रियव्यापारविनिवृत्तिरूपो ज्ञानयोग अयोगतः कर्म्मयोगं विना दुःखं प्राप्तुं भवति-दुष्करत्वात् सप्रमादत्वाच्च दुःखहेतुरेव स्यादित्यर्थः। योगयुक्तनिष्कामकर्म्मी तु मुनिरात्ममननशीलः सन्नचिरेण शीघ्रमेव ब्रह्माधिगच्छति ॥६॥

योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥७॥

साराᵒवᵒ--कृतेनापि कर्म्मणा ज्ञानिनस्तस्य न लेप इत्याह—

योगेति । योगयुक्तो ज्ञानी त्रिविधः—विशुद्धात्मा विजितबुद्धिरेकः, विजितात्मा विशुद्धचित्तो द्वितीयः, जितेन्द्रियस्तृतीय इति पूर्व्वपूर्व्वेषां साधनतारतम्यादुत्कर्षः। एतादृशे गृहस्थे तु सर्व्वेऽपि जीवा अनुरज्यन्तीत्याह--सर्व्वेषामपि भूतानामात्मभूतः प्रेमास्पदीभूत आत्मा देहो यस्य सः ॥७॥

गीᵒभूᵒ—ईदृशो मुमुक्षुः सर्व्वेषां प्रेयानित्याह-योगेति-योगे निष्कामे कर्म्मणि युक्तो निरतः, अतएव विशुद्धात्मा निर्म्मलबुद्धिः, अतएव विजितात्मा वशीकृतमनाः, अतएव जितेन्द्रियः शब्दादि-विषयरागशून्यः, अतएव सर्व्वेषां भूतानां जीवानामात्मभूतः प्रेमास्पदतां गत आत्मा देहो यस्य सः । न चात्र पार्थसारथिना सर्व्वात्मैक्यमाभिमतम् ,-"न त्वेवाहम्" इत्यादिना सर्व्वात्मनां मिथो भेदस्य तेनाभिधानात् , तद्वादिनापि विज्ञाज्ञाभेदस्य वक्तुमशक्यत्वाच्च । एवम्भूतः कुर्व्वन्नपि विविक्तात्मानुसन्धानादनात्मन्यात्माभिमानेन न लिप्यते अचिरेणात्मानमधिगच्छति । अतः कर्म्मयोगः श्रेयान् ॥७॥

नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपञ्श्वसन् ॥८॥
प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥९॥

साराᵒवᵒ--येन कर्म्मणा लेपस्तं प्रकारं शिक्षयति—नैवेति । युक्तः कर्म्मयोगी दर्शनादीनि कुर्व्वन्नपीन्द्रियार्थेषु वर्त्तन्त इति धारयन् बुद्ध्या निश्चिन्वन् निरभिमानः किञ्चिदप्यहं नैव करोमीति मन्येत ॥८-९॥

गीᵒभूᵒ—शुद्धस्यात्मनोऽधिष्ठानादि-पञ्चापेक्षित-कर्म्मकर्त्तृत्वं

नास्तीति उपदिशति—नैवेति । युक्तो निष्कामकर्म्मी प्राधानिकदेहेन्द्रियादिसंसर्गादिदर्शनादीनि कर्म्माणि कुर्व्वन्नपि तत्त्वावित् विविक्तमात्मतत्त्वमनुभवन् इन्द्रियार्थेषु रूपादिषु इन्द्रियाणि चक्षुरादीनि मद्वासनानुगुणपरमात्मप्रेरितानि वर्त्तन्त इति धारयन्निश्चिन्वन्नहं किञ्चिदपि न करोमीति मन्यते । पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन्निति चक्षुःश्रोत्रत्वग्घ्राणरसनानां ज्ञानेन्द्रियाणां दर्शनश्रवणस्पर्शनघ्राणाशनानि व्यापाराः, गच्छन् प्रलपन् विसृजन् गृह्णन् इति गमनादयः कर्म्मेन्द्रियव्यापाराः । तत्र गमनं पादयोः प्रलापो वाचः विसर्गानन्दः पायूपस्थयोः ग्रहणं हस्तयो इति बोध्यम्, श्वसन्निति प्राणादीनामुन्मिषन्निमिषन्निति नागादीनां प्राणभेदानां, स्वपन्नित्यन्तःकरणानामित्यर्थः क्रमाद्व्याख्येयम् । विज्ञानसुखैकरसस्य ममानादिवासनाहेतुकप्राधानिकदेहादिसम्बन्धनिम्मितं तदीदृशकर्म्मकर्त्तृत्वम्, न तु स्वरूपैकनिम्मितमिति मन्यत इत्यर्थः । न स्वरूपप्रयुक्तमात्मनः कर्त्तृत्वं किञ्चिदपि नास्तीति शक्यमभिधातुं निर्द्धारणे मनने च तस्याभिधानात् । तत्राद्य ज्ञानमेव तच्चात्मनो नित्यं—"न हि विज्ञातुर्विज्ञातेर्विपरिलापो विद्यते" इति श्रुतेः । तत्सिद्धिश्च—"हरिणा धर्म्मभूतेन ज्ञानेन च" इत्याहुः ॥८-९॥

ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥१०॥

सारा०व०—किञ्च, ब्रह्मणि परमेश्वरे मयि कर्म्माणि समर्प्य सङ्गं त्यक्त्वा साभिमानोऽपि कर्म्मासक्तिं विहाय यः कर्म्माणि करोति । पापेनेत्युपलक्षणम् । सोऽपि कर्म्ममात्रेणैव न लिप्यते ॥१०

गी०भू०—उक्तं विशदयन्नाह—ब्रह्मणीति । ब्रह्म-शब्देनात्र त्रिगुणावस्थं प्रधानमुक्तम्, "तस्मादेतद्ब्रह्मनामरूपमन्नञ्च

जायते" इति श्रवणात्, "मम योनिर्महद्ब्रह्म" इति वक्ष्यमाणाच्च । देहेन्द्रियादीनि प्रधानपरिणामविशेषाणि भवन्ति तद्रूपतया परिणते प्रधाने दर्शनादीनि कर्म्माण्याधाय तस्यैवैतानि, न तु तद्विविक्तस्य शुद्धस्य ममेति निर्द्धार्य्येत्यर्थः । सङ्गं तत्फलाभिलाषं तत्कर्त्तृत्वाभिनिवेशं च त्यक्त्वा यस्तानि करोति, स तादृग्देहादिमत्तया सन्नपि देहाद्यात्माभिमानेन पापेन न लिप्यते—यथोपरिनिक्षिप्तेनाम्भसा स्पृष्टमपि पद्मपत्रं तद्वत् । न च "मयि संन्यस्य कर्म्माणि" इति पूर्व्वस्वारस्याद्ब्रह्मणि परमात्मनीति व्याख्येयम् । प्राधानिकदेहादिसंसृष्टस्यैव जीवस्य दर्शनादिकर्म्मकर्त्तृत्वं, न तु तद्विविक्तस्येत्यर्थस्य प्रकृतत्वात् ॥१०॥

कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि ।
योगिनः कर्म्म कुर्व्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ॥११॥

सारा०व०—केवलैरपीन्द्रियैरिति । 'इन्द्राय स्वाहा' इत्यादिना हविराद्यर्पणकाले यद्यपि मनः क्वाप्यन्यत्र तदपीत्यर्थः । आत्मशुद्धये मनःशुद्ध्यर्थम् ॥११॥

गी०भू०—सदाचारं प्रमाणयन्नेतद्विवृणोति—कायेनेति । कायादिभिः साध्यं कर्म्म कायाद्यहंभावशून्या योगिनः कुर्व्वन्ति । केवलैर्विशुद्धैः । सङ्गं त्यक्त्वेति प्राग्वत् आत्मशुद्धये अनादिदेहात्माभिमाननिवृत्तये ॥११॥

युक्तः कर्म्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।
अयुक्तः कामकारेण फले सक्तो निबध्यते ॥१२॥

सारा०व०—कर्म्मकरणेऽनासक्त्यासक्ती एव मोक्षबन्धहेतू इत्याह—युक्तो योगी निष्कामकर्म्मीत्यर्थः । नैष्ठिकीं निष्ठाप्राप्तां शान्तिं मोक्षमित्यर्थः । अयुक्तः सकाम-कर्म्मीत्यर्थः । कामकारेण कामप्रवृत्त्या ॥१२॥

गी०भू०—युक्त आत्मार्पितमनाः कर्म्मफलं त्यक्त्वा कुर्व्वन्नैष्ठिकीं स्थिरां शान्तिमात्मावलोकलक्षणामाप्नोति । अयुक्त आत्मानर्पितमनाः कर्म्मफले सक्तः कामकारेण कामतः कर्म्माणि प्रवृत्त्या निवध्यते संसरति ॥१२॥

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥१३॥

सारा०व०—अतोऽनासक्तः कर्म्माणि कुर्व्वन्नपि 'ज्ञेयः स नित्यसन्न्यासी' इति पूर्व्वोक्तवत् बस्तुतः सन्न्यासी एवोच्यत इत्याह—सर्व्वकर्म्माणि मनसा संन्यस्य कायादिव्यापारेण वहिष्कुर्व्वन्नपि वशी जितेन्द्रियः सुखमास्ते । कुत्र ?—नवद्वारे पुरे पुरवदहं-भावशून्ये देहे देही उत्पन्नज्ञानो जीवो नैव कुर्व्वन्निति कर्म्मसुखस्य बस्तुतः कर्त्तृत्वं नैबास्तीति जानन्, न कारयन्निति नापि तेषु स्वस्य प्रयोजकत्वमित्यपि जानन्नित्यर्थः ॥१३॥

गी०भू०—सर्व्वेति । बिवेकवता मनसा तादृशि प्रधाने सर्व्वकर्म्माणि संन्यस्यार्पयित्वा देहादिना वहिस्तानि कुर्व्वन्नपि वशी जितेन्द्रियः सुखमास्ते । नवद्वारे पुरे पुरबदहम्भाववर्जिते देहे—द्वे नेत्रे द्वे नासिके द्वे श्रोत्रे मुखञ्चेति शिरसि सप्त द्वाराणि अधस्तात्तु पायूपस्थाख्ये द्वे इति नव द्वाराणि देही लब्धज्ञानो जीवः । नैवेति—देहादिविविक्तस्यात्मनः कर्म्मसु कर्त्तृत्वं कारयितृत्वञ्च नास्तीति विजानन्नित्यर्थः । १३॥

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥१४॥

सारा०व०—ननु च यदि जीवस्य बस्तुतः कर्त्तृत्वादिकं नैबास्ति, तर्हि परमेश्वरसृष्टे जगति सर्व्वत्र जीवस्य कर्त्तृत्व-

भोक्तृत्वादि-दर्शनान्मन्ये परमेश्वरेणैव बलात्तस्य कर्त्तृत्वादिकं सृष्टम् । तथा सति तस्मिन् वैषम्य-नैर्घृण्ये प्रसक्ते, तत्र न हि न हीत्याह—न कर्त्तृत्वमिति । नापि तत्कर्त्तव्यत्वेन कर्म्माण्यपि, न च कर्म्मफलैर्भोगैः संयोगमपि, किन्तु जीवस्य स्वभावोऽनाद्यविद्यैव प्रवर्त्तते, तं जीवं कर्त्तृत्वाद्यभिमानमारोहयितुमिति भावः ॥१४॥

गी०भू०—एतद्द्वयं शुद्धस्य नास्तीति विशदयति—नेति । प्रभुर्देहेन्द्रियादीनां स्वामी जीवो लोकस्य जनस्य कर्त्तृत्वं न सृजतीति त्वं कुर्व्विति कारयिता न भवति, नापि तस्येक्षिततमानि कर्म्माणि माल्याम्बरादीनि सृजतीति स्वयं कर्त्तापि न भवति । न च कर्म्मफलेन सुखेन दुःखेन च संयोगं सम्बन्धं सृजतीति भोजयिता भोक्ता च न भवतीत्यर्थः । यद्येवं, तर्हि कः कारयन् कुर्व्वंश्च प्रतीयते ? तत्राह—स्वभावस्त्विति । अनादिप्रवृत्ता प्रधानबासनात्र स्वभावशब्देनोक्तप्राधानिकदेहादिमान् जीवः कारयिता कर्त्ता चेति न बिबिक्तस्य तत्त्वमिति । शुद्धेऽपि किञ्चित्कर्त्तृत्वमस्त्येव पूर्व्वत्र सुखासने तत्त्वस्योक्तेः भानादाविवैतद्बोध्यं, धात्वर्थः खलु क्रिया, तन्मुख्यत्वं हि कर्त्तृत्वमुक्तम् ॥१४॥

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः॥१५॥

सारा०व०—यस्मादसाधु-साधुकर्म्मणामीश्वरो न कारयिता, तस्मादेव न तस्य पापपुण्यभागित्वमित्याह—नादत्ते न गृह्णाति, किन्तु तदीया खलु या शक्तिरबिद्या, सैव जीबज्ञानमावृणोतीत्याह—अज्ञानेनाबिद्यया । ज्ञानं जीबस्य स्वाभाविकम्, तेन हेतुना ॥१५॥

गी०भू०—ननु यदि बिशुद्धस्य जीवस्य तादृशकर्म्मकर्त्तृ-

त्वादि नास्तीति ब्रूषे, तर्हि कौतुकाक्रान्तः परमात्मा प्रधानं तद्गले निपात्य तत्परिणामदेहेन्द्रियादिमतस्तस्य तद्रचितवानित्यापद्यते। युक्तञ्चैतत्, अन्यथा "एष उ ह्येव साधु कर्म्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते। एष उ एवासाधु कर्म्म कारयति तं यमधो निनीषते" इति श्रुतिः। "अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः। ईश्वरप्रेरितो गच्छेत् स्वर्गं वाश्वभ्रमेव च ॥" इति स्मृतिश्च व्याकुप्येत्। तथा च पापपुण्यमयीमवस्थां नयति। प्रयोजके तस्मिन् वैषम्यादिकं पापादिभागित्वञ्च स्यादिति चेत्तत्राह—नादत्त इति। विभुरपरिमितविज्ञानानन्दोऽनन्तशक्तिपूर्णः स्वानन्दैकरसिकस्ततोऽन्यत्रोदासीनः परमात्मानादिप्रधानवासनानिवन्धं वुभुक्षु स्व-सन्निधिमात्रपरिणतप्रधानमयदेहादिमन्तं जीवं तद्वासनानुसारेण कर्म्माणि कारयन् कस्यचिज्जीवस्य पापं सुकृतञ्च नादत्ते न गृह्णाति, एवमुक्तं श्रीवैष्णवे—"यथा सन्निधिमात्रेण गन्धः क्षोभाय जायते। मनसो नोपकर्त्तृत्वात्तथासौ परमेश्वरः ॥ सन्निधानाद्यथाकाशकालाद्याः कारणं तरोः। तथैवापरिणामेन विश्वस्य भगवान् हरिः ॥" इति। औदासीन्यमात्रेऽयं गन्धादिदृष्टान्तो, न त्विच्छाया अभावे तस्याः—"सोऽकामयत" इति श्रुतत्वात्। तर्हि जीवास्तं विषमं कुतो वदन्ति, तत्राह—अज्ञानेनेति। अनादितद्वैमुख्येनाज्ञानेन जीवानां नित्यमपि ज्ञानमावृतं तिरोहितं तेन हेतुना जन्तवो जीवा मुह्यन्ति—सममपि तं विमूढा विषमं वदन्ति न विज्ञा इत्यर्थः। आह चैवं सूत्रकारः—"वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति", "न कर्म्मविभागादिति चेन्नानादित्वात्" इति ॥१५॥

ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥१६॥

सारा०व०—यथाऽविद्या तस्य ज्ञानमावृणोति, तथैवापरा तस्य विद्याशक्तिरविद्यां विनाश्य ज्ञानं प्रकाशयतीत्यर्थः। ज्ञानेन विद्याशक्त्याऽज्ञानमविद्याम्, तेषां जीवानां ज्ञानमेव कर्त्तृ, आदित्यवदित्यादित्यप्रभा यथान्धकारं विनाश्य घटपटादिकं प्रकाशयति, तथैव विद्ययैवाविद्यां विनाश्य तज्जीवनिष्ठं ज्ञानं परमप्राकृतं प्रकाशयति। तेन परमेश्वरो न कमपि बध्नाति, नापि कमपि मोचयति। किन्त्वज्ञानज्ञाने प्रकृतेरेव धर्म्मः क्रमेण बध्नाति मोचयति च। कर्त्तृत्वभोक्तृत्व-तत्प्रयोजकत्वादयो बन्धकाः, अनासक्तिशान्त्यादयो मोचकाश्च प्रकृतेरेव धर्म्माः। किन्तु परमेश्वरस्यान्तर्य्यामित्व एव प्रकृतेस्ते ते धर्म्मा उद्बुध्यन्त इत्येतदंशेनैव तस्य प्रयोजकत्वमिति न तस्य वैषम्य-नैर्घृण्ये ॥१६॥

गी०भू०—विज्ञा न मुह्यन्तीत्येतदाह—ज्ञानेनेति। "सर्व्वं ज्ञानप्लवेन" इति, "ज्ञानाग्निः सर्व्वकर्म्माणि" "न हि ज्ञानेन सदृशम्" इति चोक्तमहिम्ना सद्गुरुप्रसादलब्धेन स्वपरात्मविषयकेन ज्ञानेन येषां सत्प्रसङ्गिनां तद्वैमुख्यमज्ञानं नाशितं प्रध्वंसितं तेषां तज्ज्ञानं कर्त्तृपरं प्रकाशयति। देहादेः परं जीवं वैषम्यादिदोषात् परमीश्वरञ्च बोधयति। आदित्यवत् यथा रविरुदित एव तमो निरस्यन् यथावद्वस्तु प्रदर्शयति, तथा सद्गुरूपदेशलब्धमात्मज्ञानं यथावदात्मवस्त्विवति। अत्र विनष्टाज्ञानानां जीवानां बहुत्वं निगदता पार्थसारथिना मोक्षे तेषां तद्दर्शितं औपाधिकत्वं तस्य प्रत्युक्तं "नेमे जनाधिपाः" इत्युपक्रमोक्तं च तत् सोपपत्तिकमभूत् ॥१६॥

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥१७॥

सारा०व०—किन्तु विद्या जीवात्मज्ञानमेव प्रकाशयति, न

तु परमात्मज्ञानम्—"भक्त्याहमेकया ग्राह्यः" इति भगवदुक्तेः। तस्मात् परमात्मज्ञानार्थं ज्ञानिभिरपि पुनर्बिशेषतो भक्तिः कार्य्येत्यत आह—तद्बुद्धय इति। तत्पदेन पूर्व्वमुपक्रान्तो बिभुः परामृश्यते। तस्मिन् परमेश्वर एव बुद्धिर्येषां ते, तन्मननपरा इत्यर्थः। तदात्मानस्तन्मनस्कास्तमेव ध्यायन्त इत्यर्थः। तन्निष्ठाः "ज्ञानञ्च मयि संन्यसेत्" इति भगवदुक्तेः। देहाद्यतिरिक्तात्मज्ञानेऽपि सात्त्विके निष्ठां परित्यज्य तदेकनिष्ठास्तत्परायणास्तदीयश्रबणकीर्त्तनपराः, यदुच्यते—'भक्त्या मामभिजानाति याबान् यश्चास्मि तत्त्वतः। ततो मां तत्त्वतो ज्ञात्वा बिशते तदनन्तरम् ॥" इति। ज्ञाननिर्धूतकल्मषा ज्ञानेन बिद्ययैव पूर्व्वमेव ध्वस्तसमस्ताबिद्याः ॥१७॥

गी०भू०—परमात्मन्यबैषम्यादि-ध्यायतां फलमाह—तदिति। तस्मिंस्तद्वैषम्यादिके गुणगणे बुद्धिर्निश्चयात्मिका येषां ते। तदात्मानस्तस्मिन्निबिष्टमनसः तन्निष्ठास्तत्तात्पर्य्यबन्तस्तत्परायणास्तत्समाश्रयाः, एबमभ्यस्तेन तद्बैषम्यादिगुणज्ञानेन निर्धूतकल्मषा बिनष्ट-तद्बैमुख्याः सन्त अपुनरावृत्तिं मुक्तिं गच्छन्तीति ॥१७॥

बिद्याबिनयसंपन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥१८॥

सारा०व०—ततश्च गुणातीतानां तेषां गुणमये बस्तुमात्र एव तारतम्यमयं बिशेषमजिघृक्षूणां समबुद्धिरेव स्यादित्याह—बिद्येति। ब्राह्मणे गबीति सात्त्विकजातित्वात्, हस्तिनि मध्यमे, शुनि च श्वपाके चेति तामसजातित्वादधमेऽपि तत्तद्बिशेषाग्रहणात् समदर्शिनः पण्डिता गुणातीताः, बिशेषाग्रहणमेव समं गुणातीतं ब्रह्म, तद्द्रष्टुं शीलं येषां ते ॥१८॥

गी०भू०—तान् स्तौति—बिद्येति। तादृशे ब्राह्मणे श्वपाके चेति कर्म्मणैतौ बिषमौ गवि हस्तिनि शुनि चेति जात्यैते बिषमाः, एवं बिषमतया सृष्टेषु ब्राह्मणादिषु ये परमात्मानं समं पश्यन्ति, त एब पण्डिताः। तत्कर्म्मानुसारिणी तेन तेषां तथा तथा सृष्टिः, न तु रागद्वेषानुसारिणीति,-पर्ज्जन्यबत् सर्व्वत्र समः परमात्मेति ॥१८॥

इहैव तैर्जितः सर्गो येषां साम्ये स्थित मनः।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥१९॥

सारा०व०—समदृष्टित्त्वं स्तौति–इहैव इह लोक एव सृज्यत इति सर्गः संसारो जितः पराभूतः ॥१९॥

गी०भू०—इहेति—इह साधनदशायामेव तैः सर्गः संसारो जितः पराभूतः। कैः ?—येषां मनः साम्येऽबैषम्याख्ये ब्रह्मधर्म्मे स्थितं निबिष्टम्। कुतो ब्रह्माबिषमम् ? तत्राह—निर्दोषं हीति। हि यतो ब्रह्म निर्दोषं रागद्वेषशून्यमतः सममबिषममित्यर्थः। यतो ब्रह्मण्यबैषम्यादिकं निश्चिक्युस्तस्मात् प्रपञ्चे तिष्ठन्तोऽपि ते ब्रह्मण्येव स्थिताः मुक्तिस्तेषां सुलभेत्यर्थः ॥१९॥

न प्रहृष्येत्प्रियं प्राप्य नोद्बिजेत्प्राप्य चाप्रियम्।
स्थिरबुद्धिरसंमूढो ब्रह्मबिद् ब्रह्मणि स्थितः ॥२०॥

सारा०व०—एबं लौकिकप्रियाप्रियादिष्वपि तेषां साम्यमाह—न प्रहृष्येदिति। न प्रहृष्येत न प्रहृष्यति, नोद्बिजेत् नोद्बिजते। साधनदशायामेबमभ्यस्येदिति बिबक्षया बा लिङ्। असंमूढो हर्षशोकादीनामभिमाननिबन्धनत्वेन संमोहमात्रत्वात् ॥२०॥

गी०भू०-ब्रह्मणि स्थितस्य लक्षणमाह-नेति। बर्त्तमाने देहे स्थितः प्रारब्धाकृष्टं प्रियमप्रियञ्च प्राप्य न प्रहृष्येन्न चोद्बिजेत्। कुतः ?–

स्थिरा स्वात्मनि बुद्धिर्यस्य सः, असंमूढोऽनित्येन देहेन नित्य-मात्मानमेकीकृत्य मोहं न लब्धः, ब्रह्मविन् तादृशं ब्रह्मानुभवन्। एवंलक्षणो ब्रह्मणि स्थितो बोध्यः ॥२०॥

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥२१॥
ये हि संस्पर्शजा भोगा दुःखयोनय एव ते ।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥२२॥

सारा०व०--स च बाह्यस्पर्शेषु विषयसुखेष्वसक्तात्मा अनासक्तमनास्तत्र हेतुः---आत्मनि जीवात्मनि परमात्मानं विन्दति सति प्राप्ते यत् सुखं तदक्षयं सुखम् । स एवाश्नुते प्राप्नोति, न हि निरन्तरममृतास्वादिने मृत्तिका रोचत इति भावः ॥२१॥

सारा०व०--विवेकवानेव वस्तुतो विषयसुखेनैव सज्जतीत्याह--ये हीति ॥२२॥

गी०भू०—पौर्व्वोत्तार्य्येण स्वपरात्मानावनुभवतीत्याह--बाह्येति । बाह्यस्पर्शेषु शब्दादिविषयानुभवेष्वसक्तात्मा सन् यदात्मनि स्वस्वरूपेऽनुभूयमाने सुखं तदादौ विन्दति, तदुत्तरं ब्रह्मणि परमात्मनि योगः समाधिस्तद्युक्तात्मा सन् यदक्षयं महदनुभवलक्षणं सुखं, तदश्नुते लभते ॥२१॥

गी०भू०--अदृष्टाकृष्टेषु विषयभोगेष्वनित्यत्वविनिश्चयान्न सज्जतीत्याह--ये हीति । संस्पर्शजा विषयजन्या विषयजन्या भोगाः सुखानि । स्फुटमन्यत् ॥२२॥

शक्नोतीहैव यः सोढुं प्राक्शरीरविमोक्षणात् ।
कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः ॥२३॥

सारा०व०--संसारसिन्धौ पतितोऽप्येष एव योगी एष एव सुखीत्याह--शक्नोतीति ॥२३॥

गी०भू०--कामादि-वेगो हि ज्ञाननिष्ठा-प्रतिकूलोऽतस्तस्य सहने प्रयत्नवता भाव्यमित्याह--शक्नोतीति । कामात् क्रोधाच्चोद्भवति यो वेगो मनोनेत्रक्षोभादिवपुस्तमिह तदुद्भवकाल एवात्मानुभवप्रीत्या यः सोढुं निरोद्धुं शक्नोति शरीरविमोक्षणात् प्राक् यावच्छरीरत्यागम् , स एव युक्तः कृतात्मसमाधिः, स एव सुखी आत्मानुभवानन्दवान् । तथा तद्वेगसहने तीव्रप्रयत्नो योग्यः ॥२३॥

योऽन्तः सुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः ।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥२४॥

सारा०व०--यस्तु संसारातीतस्तस्य तु ब्रह्मानुभव एव सुखमित्याह--य इति । अन्तरात्मन्येव सुखं यस्य सः-यतोऽन्तरात्मन्येव रमते, अतोऽन्तरात्मन्येव ज्योतिर्दृष्टिर्यस्य सः ॥२४॥

गी०भू०--यत्प्रीत्या तं सोढुं शक्तस्तदाह-योऽन्तरिति । अन्तर्व्विविक्तानानुभूतेनात्मना सुखं यस्य सः, तेनैवारामः क्रीड़ा यस्य सः, तस्मिन्नेव ज्योतिर्दृष्टिर्यस्य सः । ईदृशो योगी निष्कामकर्म्मी ब्रह्मभूतो लब्धशुद्धजैवस्वरूपो ब्रह्माधिगच्छति परमात्मानं लभते । निर्व्वाणं मोक्षरूपं, तेनैव तल्लाभात् ॥२४॥

लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥२५॥

सारा०व०—एवं बहव एव साधनसिद्धा भवन्तीत्याह—लभन्त इति ॥ २५ ॥

गी०भू०--एवं साधनसिद्धा बहवो भवन्तीत्याह—लभन्त

इति । ऋषयस्तत्त्वद्रष्टारः, छिन्नद्वैधा विनष्टसंशयाः स्फुटमन्यत् ॥२५

कामक्रोधविमुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्त्तते विदितात्मनाम् ॥२६॥

सारा०व०——ज्ञात 'त्वं' पदार्थानामप्राप्तपरमात्मज्ञानानां कियता कालेन ब्रह्मनिर्व्वाणसुखं स्यादित्यपेक्षायामाह——कामेति–यतचेतसामुपरतमनसां क्षीणलिङ्गशरीराणामिति यावत्, अभितः सर्व्वतोभावेनैव वर्त्तत एवेति ब्रह्मनिर्व्वाणे तस्य नैवातिविलम्ब-मिति भावः ॥ २६ ॥

गी०भू०——ईदृशान् परमात्माप्यनुवर्त्तत इत्याह——कामेति । यतीनां प्रयत्नवतां तानभितो ब्रह्म वर्त्तत इत्यर्थः । यदुक्तं——"दर्शनध्यानसंस्पर्शैर्मत्स्यकूर्म्मविहङ्गमाः । स्वान्यपत्यानि पुष्णन्ति तथाहमपि पद्मज ॥" इति ॥२६॥

स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः ।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥२७॥
यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥२८॥

सारा०व०——तदेवमीश्वरार्पितनिष्कामकर्म्मयोगेनान्तःकरण-शुद्धिः, ततो ज्ञानं 'त्वं' पदार्थविषयकम्, ततः 'तत्'पदार्थज्ञानार्थं भक्तिः, तदुत्थज्ञानेन गुणातीतेन ब्रह्मानुभव इत्युक्तम् । इदानीं निष्कामकर्म्मयोगेन शुद्धान्तकरणःस्याष्टाङ्गयोगं ब्रह्मानुभवसाधनं ज्ञानयोगादप्युत्कृष्टत्वेन षष्ठाध्याये वक्तुं तत्सूत्ररूपं श्लोकत्रय-माह—स्पर्शानिति । बाह्या एव शब्दस्पर्शरूपरसगन्धाः स्पर्श-शब्दवाच्याः । मनसि प्रविश्य ये वर्त्तन्ते तान्, तस्मान्मनसः

सकाशाद्बहिष्कृत्य विषयेभ्यो मन प्रत्याहृत्येत्यर्थः । चक्षुषी च भ्रुवोरन्तरे मध्ये कृत्वा नेत्रयोः सम्पूर्णनिमीलने निद्रया मनो लीयत उन्मीलनेन बहिः प्रसरति । तदुभयदोषपरिहारार्थमर्द्ध-निमीलनेन भ्रूमध्ये दृष्टिं निधायोच्छ्वास-निश्वासरूपेण नासिक-योरभ्यन्तरे चरन्तौ प्राणापानावूर्द्ध्वाधोगतिनिरोधेन समौ कृत्वा, यता वशीकृता इन्द्रियादयो येन सः ॥ २७–२८ ॥

गी०भू०——अथ कर्म्मणा निष्कामेण विशुद्धमनाः समुदि-तात्मज्ञानस्तद्दर्शनाय समाधिं कुर्य्यादिति साङ्गं योगं सूचयन्नाह–स्पर्शानिति । स्पर्शाः शब्दादयो विषयास्ते बाह्या एव स्मृताः सन्तो मनसि प्रविशन्ति, तांस्तत्स्मृतिपरित्यागेन बहिष्कृत्य विष-येभ्यो मनः प्रत्याहृत्येत्यर्थः । भ्रुवोरन्तरे मध्ये चक्षुश्च कृत्वा नेत्रयोः सन्निमीलने निद्रया मनसो लयः, प्रोन्मीलने च बहिस्तस्य प्रसारः स्यात्, तदुभयविनिवृत्तयेऽर्द्धनिमीलनेन भ्रूमध्ये दृष्टिं निधायेत्यर्थः । तथा नासाभ्यन्तरचारिणौ प्राणापानावूर्द्ध्वाधोगति-निरोधेन समौ तुल्यौ कृत्वा कुम्भयित्वेत्यर्थः । एतेनोपायेन यता आत्मावलोकनाय स्थापिता इन्द्रियादयो येन सः, मुनिरात्ममनन-शीलः, मोक्षपरायणो मोक्षैकप्रयोजनः, अतो विगतेच्छादिः । ईदृशो यः सर्व्वदा फलकालवत् साधनकालेऽपि मुक्त एव ॥२७–२८

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥२९॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां भीष्म-पर्व्वणि श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्री-कृष्णार्ज्जुनसंवादे कर्म्मसंन्यासयोगो नाम पञ्चमोऽध्यायः ।

सारा०व०—एवम्भूतस्य योगिनोऽपि ज्ञानिन इव भक्त्यु त्थेन परमात्मज्ञानेनैव मोक्ष इत्याह—भोक्तारमिति । यज्ञानां कर्म्मिकृतानां तपसाञ्च ज्ञानिकृतानां भोक्तारं पालयितारमिति कर्म्मिणां ज्ञानिनां चोपास्यम्, सर्व्वलोकानां महेश्वरं महानियन्तारमन्तर्य्यामिनं योगिनामुपास्यम्, सर्व्वभूतानां सुहृदं कृपया स्वभक्तद्वारा स्वभक्त्यू पदेशेन हितकारिणमिति भक्तानामुपास्यं मां ज्ञात्वेति सत्त्वगुणमयज्ञानेन निर्गु णस्य ममानुभवासम्भवात् "भक्त्याहमेकया ग्राह्यः"इति मदुक्तेः। निर्गु णया भक्त्यैव योगी स्वोपास्यं परमात्मानं मामपरोक्षानुभवगोचरीकृत्य शान्तिं मोक्षमृच्छति प्राप्नोति ॥ २६ ॥

निष्कामकर्म्मणा ज्ञानी योगी चात्र विमुच्यते ।
ज्ञात्वात्मपरमात्मानावित्यध्यायार्थ ईरितः ॥
इति सारार्थवर्षिण्यां हर्षिण्यां भक्तचेतसाम् ।
गीतासु पञ्चमोऽध्यायः सङ्गतः सङ्गतः सताम् ॥

गी०भू०—एवं समाधिस्थः कृतस्वात्मावलोकनः परमात्मानमुपास्य मुच्यत इत्याह,–भोक्तारमिति । यज्ञानां तपसाञ्च भोक्तारं पालकम् , सर्व्वेषां लोकानां विधिरुद्रादीनामपि महेश्वरम्–"तमीश्वराणां परमं महेश्वरम्" इत्यादिश्रवणात् , सर्व्वभूतानां सुहृदं निरपेक्षोपकारकम् । इदृशं मां ज्ञात्वा स्वाराध्यतयानुभूय शान्तिं संसारनिवृत्तिमृच्छति लभते । सर्व्वेश्वरस्य सुहृदश्च समाराधनं खलु सुखावहं सुखसाधनमिति ॥२६॥

निष्काकर्म्मणा योगशिरस्केन विमुच्यते ।
सनिष्ठो ज्ञानगर्भेणेत्येष पञ्चमनिर्णयः ॥

इति श्रीमद्भगवद्गीतोपनिषद्भाष्ये पञ्चमोऽध्यायः ।

षष्ठोऽध्यायः

श्रीभगवानुवाच-

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥१॥

सारा०ब०-षष्ठेषु योगिनो योगप्रकारविजितात्मनः ।
मनसश्चञ्चलस्यापि नैश्चल्योपाय उच्यते॥ (१)

सारा०व०—अष्टाङ्गयोगाभ्यासे प्रवृत्तेनापि चित्तशोधकं निष्कामकर्म्म सहसा न त्याज्यमित्याह—कर्म्मफलमनाश्रितोऽनपेक्षमाणः कार्य्यमवश्यकर्त्तव्यत्वेन शास्त्रविहितं कर्म्म यः करोति, स एव कर्म्मफलसन्न्यासात् सन्न्यासी, स एव विषय-भोगेषु चित्ताभावाद्योगी चोच्यते । न च निरग्निरग्निहोत्रा-दिकर्म्मामात्रत्यागवानेव सन्न्यास्युच्यते । न चाक्रियो दैहिकचेष्टा-शून्योऽर्द्ध निमीलितनेत्र एव योगी चोच्यते ॥ १ ॥

गी०भू०—षष्ठे योगविधिः कर्म्मशुद्धस्य विजितात्मनः ।
स्थैर्य्योपायश्च मनसोऽस्थिरस्यापीति कीर्त्त्यते ॥

गी०भू०—प्रोक्तं कर्म्मयोगमष्टाङ्गयोगशिरस्कमुपदेक्ष्यन्नादौ तद्धुपायत्वात्तं कर्म्मयोगं स्तौति भगवान्—अनाश्रित इति द्वाभ्याम् । कर्म्मफलं पश्वन्नपुत्रस्वर्गादि-कामनाश्रितोऽनिच्छन् कार्य्यमवश्यकर्त्तव्यतया विहितं कर्म्म यः करोति, स सन्न्यासी ज्ञानयोगनिष्ठः योगी चाष्टाङ्गयोगनिष्ठः स एव—कर्म्मयोगेनैव तयोः सिद्धिरिति भावः । न निरग्निरग्निहोत्रादिकर्म्मत्यागी यति-वेशः सन्न्यासी न चाक्रियः शारीरकर्म्मत्यागी अर्द्ध मुद्रितनेत्रो योगी । अत्र योगमष्टाङ्गं चिकीर्षूणां सहसा कर्म्म न त्याज्य-मिति मतम् ॥१॥

यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव ।
न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन ॥२॥

सारा०व०—कर्म्मफलत्याग एव सन्न्यास-शब्दार्थः, वस्तुतस्तथा विषयेभ्यश्चित्तनैश्चल्यमेव योग-शब्दार्थ । तस्मात् सन्न्यास-योग-शब्दयोरैकार्थ्यमेवागतमित्याह—यमिति । असंन्यस्तो न संन्यस्तस्त्यक्तः संकल्पः फलाकाङ्क्षा विषयभोगस्पृहा येन सः ॥ २ ॥

गी०भू०—ननु सर्व्वेन्द्रियवृत्तिविरतिरूपायां ज्ञाननिष्ठायां सन्न्यासशब्दश्चित्तवृत्तिनिरोधे योगशब्दश्च पठ्यते । स च सर्व्वेन्द्रियव्यापारात्मके कर्म्मयोगे स सन्न्यासी च योगी चेति ब्रुवता भवता कया वृत्त्या नीयत इति चेत्तत्राह—यमिति । यं कर्म्मयोगमर्थतात्पर्य्यज्ञाः सन्न्यासं प्राहुस्तमेव तं योगमष्टाङ्गं विद्धि । हे पाण्डव ! ननु 'सिंहो माणवकः' इत्यादौ शौर्य्यादिगुणसादृश्येन तथा प्रयोगः, प्रकृते: किं सादृश्यमिति चेत्तत्राह—न हीति । असंन्यस्तसङ्कल्पः कश्चन कश्चिदपि ज्ञानयोग्यष्टाङ्गयोगी च न भवत्यपि तु संन्यस्तसङ्कल्प एव भवतीत्यर्थः । संन्यस्तः परित्यक्तः सङ्कल्पः फलेच्छा च येन सः । तथा फलत्यागसादृश्यात्तृष्णारूपचित्तवृत्तिनिरोधसादृश्याच्च कर्म्मयोगिनस्तदुभयत्वेन प्रयोगो गौणवृत्त्येति ॥२॥

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥३॥

सारा०व०—ननु तर्ह्यष्टाङ्गयोगिनो यावज्जीवमेव निष्काम-कर्म्मयोगः प्राप्त इत्याशङ्क्य तस्यावधिमाह—आरुरुक्षोरिति । मुनेर्योगाभ्यासिनो योगं निश्चलध्यानयोगमारोढुमिच्छोस्तदारोहे

कारणं कर्म्म चोच्यते, चित्तशुद्धिकरत्वात् । ततस्तस्य योगं ध्यानयोगमारूढस्य ध्याननिष्ठाप्राप्तः शमः विक्षेपकसर्व्वकर्म्मोपरमः कारणम् । तदेवं सम्यक्चित्तशुद्धिरहितो योगारुरुक्षुः ॥३॥

गी०भू०—नन्वेवमष्टाङ्गयोगिनो यावज्जीवं कर्म्मानुष्ठानं प्राप्तमिति चेत्तत्राह—आरुरुक्षोरिति । मुनेर्योगाभ्यासिनो योगं ध्याननिष्ठामारुरुक्षोस्तदारोहे कर्म्म कारणं हृद्विशुद्धिकृत्त्वात् । तस्यैव योगारूढस्य ध्याननिष्ठस्य तद्दार्ढ्ये शमो विक्षेपक-कर्म्मोपरतिः कारणम् ॥३॥

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते ।
सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥४॥

सारा०व०—सम्यक् शुद्धचित्तस्तु योगारूढस्तज्ज्ञापकं लक्षणमाह—यदेति । इन्द्रियार्थेषु शब्दादिषु कर्म्मसु तत्साधनेषु ॥४॥

गी०भू०—योगारूढत्वज्ञापकं चिह्नमाह—यदेति । इन्द्रियार्थेषु शब्दादिषु तत्साधनेषु कर्म्मसु च यदात्मानन्दरसिकः सन्न सज्जते । तत्र हेतुः—सर्व्वेति । सर्व्वान् भोगविषयान् कर्म्मविषयांश्च सङ्कल्पानासक्तिमूलभूतान् सन्न्यसितुं परित्यक्तुं शीलं यस्य सः ॥४॥

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥५॥

सारा०व०—यस्मादिन्द्रियार्थासक्त्यैवात्मा संसारकूपे पातितस्तं यत्नेनोद्धरेदिति । आत्मना विषयासक्तिरहितेन मनसाऽऽत्मानं जीवमुद्धरेत् । विषयासक्तिसहितेन मनसा त्वात्मानं नावसादयेत् न संसारकूपे पातयेत् । तस्मादात्मा मन एव बन्धुर्मन एव रिपुः ॥ ५ ॥

गी०भू०--इन्द्रियार्थाद्यनासक्तौ हेतुभावेनाह्-उद्धरेदिति। बिषयाद्यासक्तमनस्कतया संसारकूपे निमग्नमात्मानं जीबमात्मना बिषयासक्तिरहितेन मनसा तस्मादुद्धरेत् उद्‌र्ध्वं हरेत्। बिषयासक्तेन मनसात्मानं नाबसादयेत्तत्र न निमज्जयेत्। हि निश्चयेनैबमात्मैव मन एबात्मनः स्वस्य बन्धुस्तदेव रिपुः। स्मृतिश्च-"मन एव मनुष्याणां कारणं बन्धमोक्षयोः। बन्धाय बिषयासङ्गो मुक्त्यै निर्बिषयं मनः॥" इति ॥५॥

बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः।
अनात्मनस्तु शत्रुत्वे वर्त्तेतात्मैव शत्रुवत् ॥६॥

सारा०व०--कस्य स बन्धुः, कस्य स रिपुरित्यपेक्षायामाह्--बन्धुरिति। येनात्मना जीवेनात्मा मनो जितस्तस्य जीवस्य स आत्मा मनो बन्धुः, अनात्मनोऽजितमनसस्त्वात्मैब मन एव शत्रुवत् शत्रुत्वेऽपकारकत्वे बर्त्तेत ॥ ६ ॥

गी०भू०--कीदृशस्य स बन्धुः, कीदृशस्य च रिपुरित्यपेक्षायामाह्-बन्धुरिति। येनात्मना जीवेनात्मा मन एब जितस्तस्य जीबस्य स आत्मा मनो बन्धुस्तद्बदुपकारी। अनात्मनोऽजितमनसस्तु जीबस्यात्मैव मन एव शत्रुबत् शत्रुत्वेऽपकारकत्वे बर्त्तेत ॥६॥

जितात्मनः प्रशान्तस्य परमात्मा समाहितः।
शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥७॥

सारा०व०--अथ योगारूढ़स्य चिह्नानि दर्शयति त्रिभिः। जितात्मनो जितमनसः प्रशान्तस्य रागादिरहितस्य योगिनः परमतिशयेन समाहितः समाधिस्थ आत्मा भवेत्। शीतादिषु सत्स्वपि मानापमानयोः प्राप्तयोरपि ॥ ७ ॥

गी०भू०—योगारम्भयोग्यामवस्थामाह्—जितेति त्रिभिः। शीतोष्णादिषु मानापमानयोश्च जितात्मनोऽविकृतमनसः प्रशान्तस्य रागादिशून्यस्यात्मा परमत्यर्थं समाहितः समाधिस्थो भवति ॥७॥

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः।
युक्त इत्युच्यते योगी समलोष्ट्राश्मकाञ्चनः ॥८॥

सारा०व०---ज्ञानमौपदेशिकं विज्ञानमपरोक्षानुभबस्ताभ्यां तृप्तो निराकाङ्क्ष आत्मा चित्तं यस्य सः। कुटस्थ एकेनैब स्वभावेन सर्व्वकालं व्याप्य स्थितः, सर्व्वबस्तुष्वनासक्तत्वात्। समानि लोष्ट्रादीनि यस्य सः। लोष्ट्रं मृत्पिण्डः ॥ ८ ॥

गी०भू०—ज्ञानेति। ज्ञानं शास्त्रजं विज्ञानं बिबिक्तात्मानुभवस्ताभ्यां तृप्तात्मा पूर्णमनाः, कूटस्थ एकस्वभावतया सर्व्वकालं स्थितः, अतो बिजितेन्द्रयः,—प्रकृतिविविक्तात्ममात्रनिष्ठत्वात्, प्राकृतेषु लोष्ट्रादिषुः लोष्ट्रं मृत्पिण्डः। ईदृशो योगी निष्कामकर्म्मी युक्त आत्मदर्शनरूपयोगाभ्यासयोग्य उच्यते ॥८॥

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥९॥

सारा०व०—सुहृत् स्वभावेन हिताशंसी मित्रं केनापि स्नेहेन हितकारी, अरिर्घातकः, उदासीनो बिवदमानयोरुपेक्षकः, मध्यस्थो बिबदमानयोर्बिबादापहारार्थी, द्वेष्योऽपकारकत्वात् द्वेषार्हः, बन्धुः सम्बन्धी, साधबो धार्म्मिकाः, पापा अधार्म्मिकाः,--एतेषु समबुद्धिस्तु विशिष्यते। समलोष्ट्राश्मकाञ्चनात् सकाशादपि श्रेष्ठः ॥ ९ ॥

गी०भू०—सुहृदिति। यः सुहृदादिषु समबुद्धिः, स समलो-

श्राश्मकाञ्चनादपि योगिनः सकाशाद्विशिष्यते श्रेष्ठो भवति। तत्र सुहृत स्वभावेन हितेच्छुः, मित्रं केनापि स्नेहेन हितकृत, अरिर्निम्मित्रतोऽनर्थेच्छुः, उदासीनो बिबदमानयोरनपेक्षकः, मध्यस्थस्तयोर्विवादापहारार्थी, द्वेषोऽपकारकारित्वात द्वेषार्हः, बन्धुः सम्बन्धेन हितेच्छुः, साधवो धार्म्मिकाः, पापा अधाम्मिकाः ॥९॥

योगी युञ्जीत सततमात्मानं रहसि स्थित :
एकाकी यतचित्तात्मा निराशीरपरिग्रहः ।१०।

साराऽव०—अथ साङ्गं योगं बिधत्ते—योगीत्यादिना, स योगी परमो मत इत्यन्तेन। योगी योगारूढ़ आत्मानं मनो युञ्जीत समाधियुक्तं कुर्य्यात ॥ १० ॥

गी०भू०—अथ तस्य साङ्गं योगमुपदिशति—योगीत्यादि त्रयोविंशत्या। योगी निष्कामकर्म्मी। आत्मानं मनः सततमहरहर्युञ्जीत समाधियुक्तं कुर्य्यात। रहसि निर्जने निःशव्दे देशे स्थितः तत्राप्येकाकी द्वितीयशून्यस्तत्रापि यतचित्तात्मा यतौ योगप्रतिकूलव्यापारवर्जितो चित्तदेहो यस्य सः, यतो निराशी दृढ़वैराग्यतयेतरत्र निस्पृहः, अपरिग्रहो निराहारः ॥१०॥

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥११॥
तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ॥१२॥

साराऽव०—प्रतिष्ठाप्य स्थापयित्वा। चेलाजिनकुशोत्तरमिति कुशासनोपरि मृगचर्म्मासनम्, तदुपरि वस्त्रासनं निधायेत्यर्थः। आत्मनोऽन्तःकरणस्य विशुद्धये बिक्षेपशून्यत्वेनातिसुक्ष्मतया ब्रह्मसाक्षात्कारयोग्यतायै,—"दृश्यते त्वग्रयया बुद्धया" इति

श्रुतेः ॥११-१२॥

गी०भू०--आसनमाह--शुचाविति द्वाभ्याम। शुचौ स्वतः
संस्कारतश्च शुद्धे गङ्गातटगिरिगुहादौ देशे स्थिरं निश्चलम , नात्यु
च्छ्रितं नात्युच्चम , नातिनीचं दार्व्वादिनिर्म्मितमासनं प्रतिष्ठाप्य
संस्थाप्य चैलाजिने कुशेभ्य उत्तरे यत्र तत्-चैलं मृदुबस्त्रं, मृदु-
मृगादिचर्म्म, कुशोपरि बस्त्रमास्तीर्य्येत्यर्थः। आत्मन इति परा-
सनस्य व्यावृत्तये परेच्छायौ अनियतत्वेन तस्य योगप्रतिकूल-
त्वात्। तत्रेति - तस्मिन् प्रतिष्ठापिते आसने उपविश्य, न तु
तिष्ठन् शयानो वेत्यर्थः। एवमाह सूत्रकारः-"आसीनः सम्भ-
वात्" इति। यता निरुद्धाश्चिन्तादिक्रिया यस्य सः मन एकाग्र-
मव्याकुलं कृत्वा योगं युञ्जीतसमाधिमभ्यसेत्। आत्मनोऽन्तः-
करणस्य बिशुद्धये अतिनैर्म्मल्येन सौक्ष्म्येणात्मदर्शनयोग्यतायै-
"दृश्यते त्वग्रयया बुद्धया सूक्ष्मया सूक्ष्मदर्शिभिः" इति श्रव-
णात् ॥११-१२॥

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥१३॥
प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥१४॥

साराऽव०—कायो देहमध्यभागः, सममबक्रम्, अचलं निश्च-
लम्, धारयन् कुर्व्वन्, मनः संयम्य प्रत्याहृत्य मच्चित्तो मां
चतुर्भुजं सुन्दराकारं चिन्तयन् , मत्परो मद्भक्तिपरायणः ॥१३-१४॥

गी०भू०--आसने तस्मिन्नुपविष्टस्य शरीरधारणविधिमाह-
समिति। कायो देहमध्यभागः, कायश्च शिरश्च ग्रीवा च तेषां
समाहारः प्राण्यङ्गत्वात्। सममबक्रं, अचलमकम्पं धारयन्
कुर्व्वन् , स्थिरो दृढ़प्रयत्नो भूत्वा स्वनासिकाग्रं सम्प्रेक्ष्य संप-

श्यन्मनोलयविक्षेपनिवृत्तये भ्रूमध्यदृष्टिः सन्नित्यर्थः। अन्तरान्तरा दिशश्चानवलोकयन् । एवम्भूतः सन्नासीतेत्युत्तरेण सम्बन्धः । प्रशान्तात्मा अक्षुब्धमनाः, विगतभीर्निर्भयः, ब्रह्मचारिव्रते ब्रह्मचर्य्ये स्थितः, मनः संयम्य विषयेभ्यः प्रत्याहृत्य, मच्चित्तः चतुर्भुजं सुन्दराङ्गं मां चिन्तयन्, मत्परो मदेकपुरुषार्थः, युक्तो योगी ॥१३-१४॥

युञ्जन्नेवं सदात्मानं योगी नियतमानसः।
शान्तिं निर्वाणपरमां मत्संस्थामधिगच्छति ॥१५॥

सारा०व०—आत्मानं मनो युञ्जन्, ध्यानयोगयुक्तं कुर्व्वन्, यतो नियतमानसो विषयोपरतचित्तः, निर्व्वाणो मोक्ष एव परमः प्राप्यो यस्याम्, मय्येव निर्व्विशेषब्रह्मणि सम्यक् स्था स्थितिर्यस्यां तां शान्तिं संसारोपरतिं प्राप्नोति ॥ १५ ॥

गी०भू०--एवमासीनस्य किं स्यात्तदाह--युञ्जन्निति। योगी सदा प्रतिदिनमात्मानं युञ्जन्नर्पयन्, नियतमानसः मत्स्पर्शपरिशुद्धतया नियतं निश्चलं मानसं चित्तं यस्य सः मत्संस्थां मदधीनां निर्व्वाणपरमां शान्तिमधिगच्छति लभते–"तमेव विदित्वातिमृत्युमेति" इत्यादि श्रवणात्, निर्व्वाणपरमां मोक्षावधिकामिति सिद्धयोऽपि योगफलानीत्युक्तम् ॥१५॥

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः।
न चाति स्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥१६॥

सारा०व०—-योगाभ्यासनिष्ठस्य नियममाह द्वाभ्याम् । अत्यश्नतोऽधिकं भुञ्जानस्य; यदुक्तम्--"पूरयेदशनेनार्द्धं तृतीयमुदकेन तु। वायोः सञ्चरणार्थं तु चतुर्थमवशेषयेत् ॥" इति ॥१६॥

गी०भू०--योगमभ्यसतो भोजनादिनियममाह—नातीति

द्वाभ्याम्। अत्यशनमनत्यशनञ्च, अतिस्वापोऽतिजागरश्च, योगविरोध्यतिविहारादि चोत्तरात् ॥१६॥

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥१७॥

सारा०व०युक्तो नियत एवाहारो भोजनं विहारो गमनञ्च यस्य तस्य कर्म्मसु व्यवहारिक-पारमार्थिक-कृत्येषु युक्ता नियता एव चेष्टा वाग्व्यापाराद्या यस्य तस्य ॥ १७ ॥

गी०भू०—युक्तेति – मिराहारविहारस्य कर्म्मसु लौकिक-पारमार्थिककृत्येषु मितवागादिव्यापारस्य मितस्वापजागरस्य च सर्व्वदुःखनाशको योगो भवति, तस्माद्योगी तथा तथा वर्त्तेत ॥१७॥

यदा विनियतं चित्तमात्मन्येवावतिष्ठते।
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥१८॥

सारा०व०---योगी निष्पन्नयोगः कदा भवेदित्याकाङ्क्षायामाह--यदेति – विनियतं निरुद्धं चित्तमात्मनि स्वस्मिन्नेवावतिष्ठते निश्चलीभवतीत्यर्थः ॥ १८ ॥

गी०भू०—योगी निष्पन्नयोगः कदा स्यादित्यपेक्षायामाह–यदेति। योगमभ्यसतो योगिनश्चित्तं यदा विनियतं निरुद्धं सदात्मन्येव स्वस्मिन्नेवावस्थितं स्थिरं भवति, तदात्मेतरसर्व्वस्पृहाशून्यो युक्तो निष्पन्नयोगः कथ्यते ॥१८॥

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता।
योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥१९॥

सारा०व०---निवातस्थो निर्व्वातदेशस्थितो दीपो नेङ्गते न

चलति यः स एव दीप उपमा यथा यथावदित्यर्थः। सोऽचि
लोपे चेत् पादपूरणमिति सन्धिः, कस्योपमा इत्यत आह – योगिन
इति ॥ १६ ॥

गी०भू०—तदा योगी कीदृशो भवतीत्यपेक्षायामाह—
यथेति - निर्व्वातदेशस्थो दीपो नेङ्गते न चलति निश्चलः सप्रभ-
स्तिष्ठति स दीपो यथा यथावदुपमा योगज्ञैः स्मृता चिन्तिता।
सोपमेत्यत्र–“सोऽचि लोपे चेत् पादपूरणम्” इति सूत्रात् सन्धिः,
उपमा-शव्देनोपमानं बोध्यम्। कस्येत्याह-योगिन इति। यत-
चित्तस्य निरुद्धसर्व्वचित्तवृत्तेरात्मनो योगं ध्यानं युञ्जतोऽनुतिष्ठतः।
निवृत्तासकलेतरचित्तवृत्तिरभ्युदितज्ञानयोगी निश्चलसप्रभदीप-
सदृशो भवतीति ॥१६॥

यत्रोपरमते चित्तं निरुद्धं योगसेवया।
तत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥२०॥
सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम्।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥२१॥
यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः।
यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते ॥२२॥
तं विद्याद् दुःखसंयोगवियोगं योगसंज्ञितम्।
स निश्चयेन योक्तव्यो योगोऽनिर्व्विण्णचेतसा ॥२३॥
संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥२४॥
शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया।
आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत् ॥२५॥

सारा०व०––“नात्यश्नतस्तु योगोऽस्ति”इत्यादौ ‘योग’–
शव्देन समाधिरुक्तः। स च संप्रज्ञातोऽसंप्रज्ञातश्च। सवितर्क-
सविचारादिभेदात् संप्रज्ञातो वहुविधः। असंप्रज्ञातसमाधिरूपो
योगः कीदृश इत्यपेक्षायामाह––यत्रेत्यादि सार्द्धैस्त्रिभिः। यत्र
समाधौ सति चित्तमुपरमते वस्तुमात्रमेव न स्पृशतीत्यर्थः।
तत्र हेतुः––निरुद्धमिति। तथा च पातञ्जलसुत्रम्–“योगश्चित्त-
वृत्तिनिरोधः” इति। यत्रेत्यादिपदानां योगसंज्ञितं विद्यादिति
चतुर्थेनान्वयः। आत्मना परमात्माकारान्तःकरणेनात्मानं पश्यन्
तस्मिन् तुष्यति, तत्रत्यं सुखं प्राप्नोति। यदात्यन्तिकं सुखं
प्रसिद्धम्, तदेव यत्र समाधौ सति वेत्ति। बुद्ध्यात्माकारयैव
ग्राह्यम्; अतीन्द्रियं बिषयेन्द्रियसम्पर्करहितम्। अतएव यत्र
स्थितः सन् तत्त्वत आत्मस्वरूपान्नैव चलति, अतएव यं लाभं
लब्ध्वा ततः सकाशादपरं लाभमधिकं न मन्यते। दुःखस्य
संयोगेन स्पर्शमात्रेणापि वियोगो यस्मिन् तं योगसञ्ज्ञितं योग-
संज्ञां प्राप्तं समाधिं विद्यात्। यद्यपि शीघ्रं न सिध्यति तदप्ययं
मे योगः संसेत्स्यत्येवेति यो निश्चयस्तेन। अनिर्व्विण्णचेतसैता-
वतापि कालेन योगो न सिद्धः, किमतःपरं कष्टेनेत्यनुतापो
निर्व्वेदस्तद्रहितेन चेतसा। इह जन्मनि जन्मान्तरे वा सिध्यतु,
किं मे त्वरयेति धैर्य्ययुक्तेन मनसेत्यर्थः। तदेतद्गौड़पादा
उदाजह्रुः—“उत्सेक उदधेर्यद्वत् कुशाग्रेणैकविन्दुना। मनसो
निग्रहस्तद्वद्भवेदपरिखेदतः ॥” इति;—उत्सेक उत्सेचनम्, शोष-
णाध्यवसायेन जलोद्धरणमिति यावत्। अत्र काचिदाख्यायि-
कास्ति,—“कस्यचित् किल पक्षिणोऽण्डानि तीरस्थितानि तरङ्ग-
वेगेन समुद्रो जहार। स च समुद्रं शोषयिष्याम्येवेति प्रतिज्ञाय
स्वमुखाग्रेणैकैकं जलविन्दुमुपरि प्रचिक्षेप। तमश्च स वहुभिः पक्षि-
भि र्वन्धुभिर्युक्त्या वार्य्यमाणोऽपि नैवोपरराम। यदृच्छया च

तत्रागतेन नारदेन निवारितोऽप्यस्मिन् जन्मनि जन्मान्तरे वा समुद्रं शोषयिष्याम्येवेति तदग्रेऽपि पुनः प्रतिजज्ञे। ततश्च दैवानुकूल्यात् कृपालुर्नारदो गरुड़ं तत्साहाय्याय प्रेषयामास। समुद्रस्त्वदीयज्ञातिद्रोहेन त्वामवमन्यत इति वाक्येन ततो गरुड़पक्षवातेन शुष्यन् समुद्रोऽतिभीतस्तान्यण्डानि तस्मै पक्षिणे ददौ" इति। एवमेव शास्त्रवचनास्तिक्येने योगे ज्ञाने भक्तौ वा प्रवर्त्तमानमुत्साहवन्तमध्यवसायिनं जनं भगवानेवानुगृह्णातीति निश्चेतव्यम्। एतादृशयोगाभ्यासे प्रवृत्तस्य प्राथमिकं कृत्यमन्त्यञ्च कृत्यमाह-संकल्पेति द्वाभ्याम्। कामांस्त्यक्त्वेति प्राथमिकं कृत्यम्। न किञ्चिदपि चिन्तयेदित्यन्त्यं कृत्यम् ॥ २०-२५ ॥

गी०भू०—'नात्यश्नतः' इत्यादौ योग-शब्देनोक्तं समाधिं स्वरूपतः फलतश्च लक्षयति-यत्रेत्यादि-सार्द्धत्रयेण। यच्छब्दानां तं विद्याद्योगसंज्ञितमित्युत्तरेणान्वयः। योगस्य सेवयाभ्यासेन निरुद्धं निवृत्तेतरवृत्तिकं चित्तं यत्रोपरमते महत् सुखमेतदिति सज्जति, यत्र चात्मना शुद्धेन मनसात्मानं पश्यन् तस्मिन्नात्मन्येव तुष्यति, न तु देहादि पश्यन् विषयेष्विति चित्तवृत्तिनिरोधेन स्वरूपेणेष्टप्राप्तिलक्षणेन फलेन च योगो दर्शितः। सुखमिति-यत्र समाधौ यत्तत् प्रसिद्धमात्यन्तिकं नित्यं सुखं वेत्त्यनुभवति। अतीन्द्रियं विषयेन्द्रियसम्बन्धरहितं, बुद्ध्यात्माकारया ग्राह्यम्। अतएव यत्र स्थितस्तत्त्वत आत्मस्वरूपान्नैव चलति यं योगं लब्ध्वैव ततोऽपरं लाभमधिकं न मन्यते, गुरुणा गुणवत्पुत्रविच्छेदादिना न विचाल्यते तमिति। दुःखसंयोगस्य वियोगः प्रध्वंसो यत्र तं योगसंज्ञितं समाधिम् ॥२०-२३॥

गी०भू०—स योगः प्रारम्भदशायां निश्चयेन प्रयत्ने कृते संसेत्स्यत्येवेत्यध्यवसायेन योक्तव्योऽनुष्ठेयः। आत्मन्ययोगत्वमननं निर्व्वेदस्तद्रहितेन चेतसा हृताण्डार्णवशोषकपक्षिवत्

सोत्साहेनेत्यर्थः। एतादृशं योगमारभमाणस्य प्राथमिकं कृत्यमाह-संकल्पेति। सङ्कल्पात् प्रभवो येषां तान् योगविरोधिनः कामान् विषयानशेषतः सवासनांस्त्यक्त्वा। स्फुटमन्यत्। मनसा विषयदोषदर्शिना ॥२४॥

गी०भू०—अन्तिमं कृत्यमाह-धृतिगृहीतया धारणावशीकृतया बुद्ध्या मन आत्मसंस्थं कृत्वा आत्मानं ध्यात्वा समाधावुपरमेत् तिष्ठेत्; आत्मनोऽन्यत् किञ्चिदपि न चिन्तयेत्। एतच्च शनैः शनैरभ्यासक्रमेण, न तु हठेन ॥२५॥

यतो यतो निश्चलति मनश्चञ्चलमस्थिरम्।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥२६॥

सारा०व०—यदि च प्राक्तनदोषोद्गमवशाद्रजोगुणस्पृष्टं मनश्चञ्चलं स्यात्, तदा पुनर्योगमभ्यसेदित्याह-यतो यत इति॥२६॥

गी०भू०—यदि कदाचित् प्राक्तनसूक्ष्मदोषान्मनः प्रचलेत् तदा तत् प्रत्याहरेदित्याह-यत इति। यं यं विषयं प्रति मनो निर्गच्छति, ततस्तत एतन्मनो नियम्य प्रत्याहृत्यात्मन्येव निरतिशयसुखत्वभावनया वशं कुर्य्यात् ॥२६॥

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम्।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥२७॥

सारा०व०—ततश्च पूर्व्ववदेव तस्य समाधिसुखं स्यादित्याह-प्रशान्तेति। सुखं कर्त्तृ, योगिनमुपैति प्राप्नोति ॥ २७ ॥

गी०भू०—एवं प्रयतमानस्य पूर्व्ववदेव समाधिसुखं स्यादित्याह-प्रशान्तेति। प्रशान्तमात्मन्यचलं मनो यस्य तम्, अतएवाकल्मषं दग्धप्राक्तनसूक्ष्मदोषम्; अतएव शान्तरजसम्। ब्रह्मभूतं साक्षात्कृत-विविक्ताविर्भावितअष्टगुणकात्मस्वरूपं योगिनं

प्रत्युत्तममात्मानुभवरूपं महत् सुखं कर्त्ता स्वयमेवोपैति ॥२७॥

युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥२८॥

सारा०व०--ततश्च कृतार्थ एव भवतीत्याह--युञ्जन्निति। सुखमश्नुते जीवन्मुक्त एव भवतीत्यर्थः ॥ २८ ॥

गी०भू०—एवं स्वात्मसाक्षात्कारानन्तरं परमात्मसाक्षात्कारञ्च लभत इत्याह-युञ्जन्निति। एवमुक्तप्रकारेणात्मानं स्वं युञ्जन् योगेनानुभवन् तेनैव विगत-कल्मषो दग्धसर्व्वदोषो योगी सुखेनानायासेन ब्रह्मसंस्पर्शं परमात्मानुभवमत्यन्तमपरिमितं सुखमश्नुते प्राप्नोति ॥२८॥

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥२९॥

सारा०ब०--जीवन्मुक्तस्य तस्य ब्रह्मसाक्षात्कारं दर्शयति--सर्व्वभूतस्थमात्मानमिति । परमात्मनः सर्व्वभूताधिष्ठातृत्वमात्मनीति परमात्मनः सर्व्वभूताधिष्ठानञ्च। ईक्षते अपरोक्षतयाऽनुभवति। योगयुक्तात्मा ब्रह्माकारान्तःकरणः, समं ब्रह्मैव पश्यतीति समदर्शनः ॥ २९ ॥

गी०भू०—एवं निष्पन्नसमाधिः प्रत्यक्षितस्वपरात्मयोगी परात्मनः सर्व्वगतत्वं तदन्यात्मनां द्रुहिणादीनां सर्व्वेषां तदाश्रयत्वं तस्याविषमत्वञ्चानुभवतीत्याह-सर्व्वेति । योगयुक्तात्मा सिद्धसमाधिस्तदात्मानम-"आततत्वाच्च मातृत्वादात्मा हि परमो हरिः" इति स्मृतेः, 'यो माम्' इति विवरणाच्च परमात्मानं सर्व्वभूतस्थं निखिलं जीवान्तर्य्यामिणमीद्यते ; आत्मनि तस्मिन्नाश्रयभूते सर्व्वभूतानि च तमेव सर्व्वजीवाश्रयं चेक्षते। कीदृशः

स इत्याह-सर्व्वत्रेति । तत्तत्कर्म्मानुगुण्येनोच्चावचतया सृष्टेषु सर्व्वेषु जीवेषु समं वैषम्यशून्यं परात्मानं पश्यतीति तथा ॥२९॥

यो मां पश्यति सर्व्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥३०॥

सारा०व०—एवमपरोक्षानुभविनः फलमाह—यो मामिति। तस्याहं ब्रह्म न प्रणश्यामि नाप्रत्यक्षीभवामि । तथः मत्प्रत्यक्षतायां शाश्वतिक्यां सत्यां स योगी मे मदुपासको न प्रणश्यति न कदाचिदपि भ्रश्यति ॥ ३० ॥

गी०भू०—एतद्विवृण्वन् तथात्वदर्शिनः फलमाह—यो मामिति। तस्य तादृशस्य योगिनोऽहं परमात्मा न प्रणश्यामि नादृश्यो भवामि, स च योगी मे न प्रणश्यति नादृश्यो भवति ;-आवयोर्मिथःसाक्षात्कृतिः सर्व्वदा भवतीत्यर्थः ॥३०॥

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥३१॥

सारा०ब०—एवं मदपरोक्षानुभवात् पूर्व्वदशायामपि सर्व्वत्र परात्मभावनया भजतो योगिनो न विधि--कैङ्कर्य्यमित्याह-सर्व्वेति। परमात्मैव सर्व्वकरणत्वादेकोऽस्तीत्येकत्वमास्थितः सन् यो भजति, श्रवणस्मरणादिभजनयुक्तो भवति, स सर्व्वथा शास्त्रोक्तं कर्म्म कुर्व्वन्नकुर्व्वन् वा वर्त्तमानो मयि वर्त्तते, न तु संसारे ॥ ३१ ॥

गी०भू०—स योगी ममाचिन्त्यस्वरूपशक्तिमनुभवन्नतिप्रियो भवतीत्याशयवानाह,-सर्व्वेति। सर्व्वेषां जीवानां हृदयेषु प्रादेशमात्रश्चतुर्बाहुरतसीपुष्पप्रभश्चक्रादिधरोऽहं पृथक् पृथङ्निवसामि ; तेषु बहूनां मद्विग्रहाणामेकत्वमभेदमाश्रितो यो मां

भजति ध्यायति, स योगी सर्व्वथा वर्त्तमानो व्युत्थानकाले स्व-बिहितं कर्म्म कुर्व्वन्नकुर्व्वन् वा मयि बर्त्तते ममाचिन्त्यशक्तिकत्वधर्म्मानुभवमहिम्ना निर्दग्धकामचारदोषो मत्सामीप्यलक्षणं मोक्षं बिन्दति, न तु संसारमित्यर्थः । श्रुतिश्च हरेरचिन्त्य-शक्तिकतामाह—"एकोऽपि सन् बहुधा योऽबभाति" इति, स्मृतिश्च-"एक एब परो बिष्णुः सर्व्वव्यापी न संशयः । ऐश्वर्य्याद्रूपमेकञ्च सूर्य्यबद्बहुधेयते ॥" इति ॥३१॥

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥३२॥

साराःबः—किञ्च, साधनदशायां योगी सर्व्वत्र समः स्यादित्युक्तम् । तत्र मुख्यं साम्यं व्यचष्टे—आत्मौपम्येनेति । सुखं वा दुःखं वेति—यथा मम सुखं प्रियं दुःखमप्रियम्, तथैवान्येषामपीति सर्व्वत्र समं पश्यन् सुखमेव सर्व्वेषां यो वाञ्छति, न तु कस्यापि दुःखम्, स योगी श्रेष्ठो ममाभिमतः॥३२॥

गीःभूः—"सर्व्वभूतहिते रता" इति यत् प्रागुक्तं तद्विशदयति—आत्मोपम्येनेति । व्युत्थानदशायामात्मौपम्येन स्वसादृश्येन सुखं दुःखञ्च यः सर्व्वत्र समं पश्यति । स्वस्येव परस्य सुखमेवेच्छति, न तु दुःखं स स्वपरसुखदुःखसमदृष्टिः सर्व्वानुकम्पी योगी मम परमः श्रेष्ठोऽभिमतः,–तद्विषमदृष्टिस्तु तत्त्वज्ञोऽप्यपरमयोगीति भावः ॥३२॥

अर्जुन उवाच—
योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन ।
एतस्याहं न पश्यामि चञ्चलत्वात्स्थितिं स्थिराम् ॥३३॥

साराःबः—भगवदुक्तलक्षणस्य साम्यस्य दुष्करत्वमालक्ष्यो-

वाच—योऽयमिति । एतस्य साम्येन प्राप्तस्य योगस्य स्थिरां सार्व्वदिकीं स्थितिं न पश्यामि । एष योगः सर्व्वदा न तिष्ठति, किन्तु त्रिचतुरदिनान्येवेत्यर्थः । कुतः ?—चञ्चलत्वात् । तथा ह्यात्मसुखदुःखसममेव सर्व्वजगद्वर्त्तिजनानां सुखदुःखं पश्येदिति साम्यमुक्तम् । तत्र ये बन्धवस्तटथाश्च तेषु साम्यं भवेदपि, ये रिपवो घातका द्वेष्टारो निन्दकाश्च तेषु न सम्भवेदेव । न हि मया स्वस्य युधिष्ठिरस्य दुर्य्योधनस्य च सुखदुःखे सर्व्वथा तुल्ये द्रष्टुं शक्येते । यदि च स्वस्य स्व-रिपूणाञ्च जीवात्म-परमात्मप्राणेन्द्रिय-दैहिकभूतानि समान्येवेति विवेकेन पश्येत्, तदा तत् खलु द्वित्रिदिनान्येब स्यात् बिबेकेनापि प्रबलस्यानिचञ्चलस्य मनसो निग्रहणाशक्यत्वात् । प्रत्युत विषयासक्तेन तेन मनसैब बिबेकस्य ग्रस्यमानत्वदर्शनादिति ॥ ३३ ॥

गीःभूः—उक्तमाक्षिपन्नर्ज्जुन उवाच–योऽयमिदि । साम्येन स्वपरसुखदुःखतौल्येन योऽयं योगस्त्वया सर्व्वज्ञेन प्रोक्तस्तस्य स्थिरां सार्व्वदिकीं स्थितिं निष्ठामप्यहं न पश्यामि, किन्तु द्वित्राण्येव दिनानीत्यर्थः ; कुतः ?–चञ्चलत्वात । अयमर्थः-बन्धुषु उदासीनेषु च तत्साम्यं कदाचित् स्यात् ; न च शत्रुषु निन्दकेषु च कदाचिदपि । यदि परमात्माधिष्ठानत्वं सर्व्वत्राबिशेषमिति बिबेकेन तद्ग्राह्यं, तर्हि न तत् सार्व्वदिकम्—अतिचपलस्य बलिष्ठस्य च मनसस्तेन बिबेकेन निग्रहीतुमशक्यत्वादिति ॥३३॥

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥३४॥

साराःबः—एतदेबाह—चञ्चलमिति । ननु "आत्मानं रथिनं बिद्धि शरीरं रथमेब च" इत्यादि श्रुतेः, "आहुः शरीरं रथमिन्द्रियाणि हयानभीषून् मन इन्द्रियेशम् । बर्त्मानि मात्रा

धिषणञ्च सूतम्" इति (भा ७ । १५ । ४१) स्मृतेश्च बुद्धेर्मनो-नियन्तृत्वदर्शनाद्विवेकवत्या बुद्ध्या मनो वशीकर्त्तुं शक्यमेवेति चेदत आह---प्रमाथि बुद्धिमपि प्रकर्षेण मन्थातीति । तत् कुत इति चेदत आह---बलवत् । स्वप्रशमकमौषधमपि बलवान् रोगो यथा न गणयति, तथैव स्वभावादेव वलिष्ठं मनो विवेकवतीमपि बुद्धिम् । किञ्च, दृढमतिसूक्ष्मबुद्धिसूच्यापि लोह-मिव सहसा भेत्तुमशक्यम् । वायोरित्याकाशे दोधूयमानस्य वायोर्निग्रहं कुम्भकादिना निरोधमिव योगेनाष्टाङ्गेन मनसोऽपि निरोधं दुष्करं मन्ये ॥ ३४ ॥

गी०भू०—तदेवाह-चञ्चलं हीति । मनः स्वभावेन चञ्च-लम् । ननु "आत्मानं रथिनं विद्धि शरीरं रथमेव च । बुद्धिन्तु सारथिं विद्धि मनः प्रग्रहमेव च ॥ इन्द्रियाणि हयानाहुर्विष-यांस्तेषु गोचरान् ॥ आत्मेन्द्रियमनोयुक्तो भोक्तेत्याहुर्मनी-षिणः ॥" इति श्रुतेर्बुद्धिनियम्यं मनः श्रूयते ततो विवेकिन्यां बुद्ध्या शक्यं तद्वशीकर्त्तुमिति चेत्तत्राह-प्रमाथीति । तादृशी-मपि बुद्धिं प्रमथाति ; कुतः ?-बलवत् स्वप्रशमकमप्यौषधं यथा बलवान् रोगो न गणयति, तद्वत् । किञ्च-दृढं सूच्या लौहमिव तादृश्यापि बुद्ध्या भेत्तुमशक्यमतो योगेनापि तस्य निग्रहमहं वायोरिव सुदुष्करं मन्ये ;-न हि वायुर्मुष्टिना धर्त्तुं शक्यते, अतस्तत्रोपायं ब्रूहीति ॥३४॥

श्रीभगवानुवाच-

असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥३५॥

सारा०व०—उक्तमर्थमङ्गीकृत्य समदधाति—असंशयमिति । त्वयोक्तं सत्यमेव, किन्तु बलवानपि रोगस्तत्प्रशमकौषध-सेवया

सद्वैद्यप्रयुक्तप्रकारया मुहुरभ्यस्तया यथा चिरकालेन शाम्यत्येव, तथा दुर्निग्रहमपि मनोऽभ्यासेन सद्गुरूपदिष्टप्रकारेण परमेश्व-रध्यानयोगस्य मुहुरनुशीलनेन वैराग्येण विषयेष्वनासङ्गेन च गृह्यते स्वहस्तवशीकर्त्तुं शक्यत इत्यर्थः । तथा च पातञ्जल-सूत्रम्—"अभ्यासवैराग्याभ्यां तन्निरोधः" इति । महाबाहो इति संग्रामे त्वया यन्महावीरा अपि विजीयन्ते, स च पिनाक-पाणिरपि वशीकृतस्तेनापि किम् ?—यदि महावीरशिरोमणि-र्मनोनामा प्राधानिको भटो महायोगास्त्रप्रयोगेण जेतुं शक्यते, तदैव महाबाहुतेति भावः । हे कौन्तेयेति तत्र त्वं मा भैषीः—मत्पितुःस्वसुः कुन्त्याः पुत्रे त्वयि मया साहाय्यं विधेयमिति भावः ॥ ३५ ॥

गी०भू०—उक्तमर्थं स्वीकृत्य भगवानुवाच-असंशयमिति । तथापि स्वप्रकाशसुखैकतानत्वात्मगुणाभिमुख्येनाभ्यासेनात्म-व्यतिरिक्तेषु विषयेषु दोषदृष्टिर्जनितेन वैराग्येण च मनो निग्र-हीतुं शक्यते । तथा चात्मानन्दास्वादाभ्यासेन लयप्रतिबन्धा-द्विषयवैतृष्ण्येण च विक्षेपप्रतिबन्धान्निवृत्तचापलं मनः सुग्रहं यथा सदौषधानुसेवया सुपथ्येन च बलवानपि रोगः सुजेयस्तथैतद्-द्रष्टव्यम् । हे महाबाहो ! इति—शौर्य्येण शात्रवमिव विवेकेन मनो जयेत्यर्थः ॥३५॥

असंयतात्मना योगो दुष्प्राप इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥३६॥

सारा०व०—अत्रायं परामर्श इत्यत आह—असंयतात्मना-भ्यास-वैराग्याभ्यां न संयतं मनो यस्य तेन । ताभ्यां तु वश्यात्मना वशीभूतमनसापि पुंसा यतता चिरं यत्नवतैव योगो मनो-निरोधलक्षणः समाधिरुपायतः साधनभूयस्त्वात् प्राप्तुं

शक्यः ॥ ३६ ॥

गी०भू०—असंयतेति । उक्ताभ्यामभ्यास-वैराग्याभ्यां न संयत आत्मा मनो यस्य तेन विज्ञेनापि पुंसा चित्तवृत्तिनिरोध-लक्षणो योगो दुष्प्रापः प्राप्तुमशक्यः । ताभ्यां वश्योऽधीन आत्मा मनो यस्य तेन पुंसा, तथापि यतता तादृशप्रयत्नवता स योगः प्राप्तुं शक्यः । उपायतो मदाराधनलक्षणाज्ज्ञाना-कारान् निष्कामकर्म्मयोगाच्चेति मे मतिः ॥३६॥

अर्जुन उवाच—

अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥३७॥

सारा०ब०—नन्वभ्यास-वैराग्याभ्यां प्रयत्नवतैव पुंसा योगो लभ्यत इति त्वयोच्यते । यस्यैतत् त्रितयमपि न दृश्यते, तस्य का गतिरिति पृच्छति । अयतिरल्पयत्नः, अनवरणीय बागुरि-तिवदल्पार्थे नञ्, अथच श्रद्धयोपेतो योगशास्त्रास्तिक्येन तत्र श्रद्धयोपेतो योगाभ्यास प्रवृत्त एव, न तु लोकवञ्चकत्वेन मिथ्याचारः । किन्त्वभ्यास—-वैराग्ययोरभावेन योगाच्चलितं विषयप्रवणीभुतं मानसं यस्य सः । अतएव योगस्य संसिद्धिं सम्यक् सिद्धिमप्राप्येति यत्त किञ्चित सिद्धिन्तु प्राप्त एवेति योगारुरुक्षा-भूमिकातोऽग्रिमां योगारोहभूमिकायाः प्रथमां कक्षां गत इति भावः ॥ ३७ ॥

गी०भू०—ज्ञानगर्भो निष्कामकर्म्मयोगोऽष्टाङ्गयोगशिरस्को निखिलोपसर्गविमर्द्दनः स्वपरमात्मावलोकनोपायो भवतीत्य-सकृदुक्तं, तस्य च तादृशस्य नेहाभिक्रमनाशोऽस्तीति पूर्व्वोक्त-महिम्नस्तन्महिमानं श्रोतुमर्ज्जुनः पृच्छति-अयतिरिति । अभ्यास-वैराग्याभ्यां प्रयत्नेन च योगं पुमान् लभेतैव । यस्तु प्रथमं श्रद्धया

तादृशयोगनिरूपकश्रुतिविश्वासेनोपेतः किन्त्वयतिरल्पस्वधर्म्मा-नुष्ठानयत्नवान्-“अनुदारा युवतिः” इतिवदल्पार्थेऽत्र नञ् ; शिथिलप्रयत्नत्वादेव योगादष्टाङ्गाच्चलितं विषयप्रवणं मानसं यस्य सः ; एवञ्च स्वधर्म्मानुष्ठानाभ्यासवैराग्यशैथिल्याद्विविधस्य योगस्य सम्यक् सिद्धिं हृद्विशुद्धिलक्षणामात्मावलोकनलक्षणां चाप्राप्तः किञ्चित् सिद्धिन्तु प्राप्त एव ; श्रद्धालुः किञ्चिदनुष्ठित-स्वधर्म्मः प्रारब्धयोगोऽप्राप्तयोगफलो देहान्ते कां गतिं गच्छति ? हे कृष्ण ॥३७॥

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ।
अप्रतिष्ठो महाबाहो विमूढ़ो ब्रह्मणः पथि ॥३८॥
एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः ।
त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ॥३९॥

सारा०ब०—कच्चिदिति प्रश्ने । उभयविभ्रष्टः कर्म्ममार्गाच्च्युतो योगमार्गञ्च सम्यगप्राप्त इत्यर्थः । छिन्नाभ्रमिवेति यथा छिन्नमभ्रं मेघः पूर्व्वस्मादभ्राद्विश्लिष्टमभ्रान्तरं चाप्राप्तं सत्त मध्ये विलीयते तेनास्य इहलोके योगमार्गे प्रवेशाद्विषयभोगत्यागेच्छा सम्यग्वैराग्याभावाद्विषयभोगेच्छा चेति कष्टम । परलोके च स्वर्ग-साधनस्य कर्म्मणोऽभावात्, मोक्षसाधनस्य योगस्याप्यपरि-पाकान्न स्वर्गमोक्षावित्युभयलोक एवास्य विनाश इति द्योतितम् । अतो ब्रह्मप्रप्त्युपाये पथि मार्गे विमूढ़ोऽयमप्रतिष्ठः प्रतिष्ठामास्प-दमप्राप्तः सन् कच्चित् किं नश्यति न नश्यति त्वं पृच्छ्यसे ॥३८॥

सारा०ब०—एतत् एतम् ॥ ३९ ॥

गी०भू०—प्रश्नाशयं विशदयति-कच्चिदिति प्रश्ने । निष्काम-तया कर्म्मणोऽनुष्ठानान्न स्वर्गादिफलम् ; योगासिद्धेर्नात्माव-लोकनञ्च तस्याभूत् । एवमुभयस्माद्विभ्रष्टोऽप्रतिष्ठो निरालम्बः

सन् किं नश्यति, किम्बा न नश्यतीत्यर्थः। छिन्नाभ्रमिवेति अभ्रं मेघो यथा पूर्व्वस्मादभ्राद्विच्छिन्नं परमभ्रञ्चाप्राप्तमन्तराले विलीयते, तद्वदेवेति नाशे दृष्टान्तः। कथमेवं शङ्का? तत्राह-ब्रह्मणः पथि प्राप्त्युपाये यदसौ विमूढः ॥३८॥

गी०भू०—एतदिति क्लीवत्वमार्षम्। त्वदिति सर्व्वेश्वरात् सर्व्वज्ञात्त्वत्तोऽन्योऽनीश्वरोऽल्पज्ञः कश्चिदृषिः ॥३९॥

श्रीभगवानुवाच—

पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते।
न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति ॥४०॥

सारा०व०—इह लोके अमुत्र परलोकेऽपि कल्याणं कल्याणप्रापकं योगं करोतीति सः ॥ ४० ॥

गी०भू०—एवं पृष्टो भगवानुवाच-पार्थेति। तस्योक्तलक्षणस्य योगिन इह प्राकृतिके लोकेऽमुत्राप्राकृतिके च लोके विनाशः स्वर्गादिसुखविभ्रंशलक्षणः परमात्मावलोकनविभ्रंशलक्षणश्च न विद्यते न भवति। किञ्चोत्तरत्र तत्प्राप्तिर्भवेदेव; हि यतः, कल्याणकृत् निःश्रेयसोपायभूतसद्धर्म्मयोगारम्भी दुर्गतिं तदुभयाभावरूपां दरिद्रतां न गच्छति। हे तातेत्यतिवात्सल्यात् सम्बोधनम्। "तनोत्यात्मानं पुत्ररूपेण" इति व्युत्पत्तेस्ततः पिता—"स्वार्थिकेऽण्", तत एव तातः-पुत्रं शिष्यञ्चातिकृपया ज्येष्ठस्तथा सम्बोधयति ॥४०॥

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥४१॥

सारा०व०—तर्हि कां गतिमसौ प्राप्नोतीत्यत आह—प्राप्येति। पुण्यकृतामश्वमेधादियाजिनां लोकानिति योगस्य फलं मोक्षो

भोगश्च भवति। तत्रापक्कयोगिनो भोगेच्छायां सत्यां योगभ्रंशे मति भोग एव। परिपक्कयोगिनस्तु भोगेच्छाया असम्भवान्मोक्ष एव। केचित्तु परिपक्कयोगिनोऽपि दैवाद्भोगेच्छायां सत्यां कर्द्दमसौभर्य्यादिदृष्ट्या भोगमप्यमहुरिति। शुचीनां सदाचाराणां श्रीमतां धनिकवणिगादीनां राज्ञां वा ॥ ४१॥

गी०भू०-ऐहिकीं सुखसम्पत्तिं तावदाह-प्राप्येति। यादृशविषयस्पृहया स्वधर्म्मे शिथिलो योगाच्च विच्युतोऽयं तादृशान् विषयानात्मोद्देश्यकनिष्कामस्वधर्म्मयोगारम्भमाहात्म्येन पुण्यकृतामश्वमेधादियाजिनां लोकान् प्राप्य भुङ्क्ते तान् भुञ्जानो यावतीभिस्तद्भोगतृष्णाविनिवृत्तिस्तावतीः शाश्वतीः बह्वीः समाः सम्वत्सरांस्तेषु लोकेषूषित्वा स्थित्वा तद्भोगवितृष्णस्तेभ्यो लोकेभ्यः शुचीनां सद्धर्म्मनिरतानां योगार्हाणां श्रीमतां धनिनां गेहे पूर्व्वारब्धयोगमाहात्म्यात् स योगभ्रष्टोऽभिजायत इत्यल्पकालारब्धयोगाद् भ्रष्टस्य गतिरियं दर्शिता ॥४१॥

अथवा योगिनामेव कुले भवति धीमताम्।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥४२॥

सारा०व०—अल्पकालाभ्यस्त-योगभ्रंशे गतिरियमुक्ता। चिरकालाभ्यस्त-योगभ्रंशे तु पक्षान्तरमाह—अथवेति। योगिनां निमिप्रभृतीनामित्यर्थः ॥ ४२ ॥

गी०भू०—चिरारब्धाद्योगाद् भ्रष्टस्य गतिमाह-अथवेति। योगिनां योगमभ्यसतां धीमतां योगदेशिकानां कुले भवत्युत्पद्यते। द्विविधं जन्म स्तौति-एतदिति। योगार्हाणां योगमभ्यसताञ्च कुले पूर्व्वयोगसंस्कारबलकृतमेतज्जन्म प्राकृतानामतिदुर्ल्लभम् ॥४२

तत्र तं बुद्धिसंयोगं लभते पौर्व्वदेहिकम्।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥४३॥

सारा०ब०—तत्र द्विविधेऽपि जन्मनि बुद्धया परमात्मनिष्ठया सह संयोगं पौर्व्वदैहिकं पूर्व्वजन्मभवम् ॥ ४३ ॥

गी०भू०—आमुत्रिकी सुखसम्पत्तिं वक्तुं पूर्व्वसंस्कारहेतुकं साधनमाह तत्रेति—तत्र द्विविधे जन्मनि, पौर्व्वदैहिकं पूर्व्वदेहे भवम्, बुद्धया स्वधर्म्मस्वात्मपरमात्मविषया संयोगं सम्बन्धं लभते। ततश्च हृद्विशुद्धिस्वपरमात्मावलोकरूपायां संसिद्धौ निमित्तं स्वापोत्थितवद्भूयो बहुतरं यतते, यथा पुनर्विघ्नहतो न स्यात् ॥४३॥

पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥४४॥

सारा०ब०—ह्रियत आकृष्यते, योगस्य योगं जिज्ञासुरपि भवति। अतः शब्दब्रह्म वेदशास्त्रमतिवर्त्तते वेदोक्तकर्म्ममार्गमतिक्रम्य वर्त्तते, किन्तु योगमार्ग एव तिष्ठतीत्यर्थः॥ ४४ ॥

गी०भू०—तत्र हेतुः—तेनैव योगविषयकेण पूर्व्वाभ्यासेन स योगी ह्रियते आकृष्यते—अवशोऽपि केनचिद्विघ्नेनानिच्छन्नपीत्यर्थः। हीति प्रसिद्धोऽयं योगमहिमा। योगस्य जिज्ञासुरपि तु योगमभ्यसितुं प्रवृत्तः शब्दब्रह्म सकामकर्म्मनिरूपकं वेदमतिवर्त्तते, तं न श्रद्दधातीत्यर्थः ॥४४॥

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥४५॥

सारा०ब०—एवं योगभ्रंशे कारणं यत्नशैथिल्यमेव—'अयतिः श्रद्धयोपेतः' इत्युक्तेः। तस्य च यत्नशैथिल्यवतो योगभ्रष्टस्य जन्मान्तरे पुनर्योगप्राप्तिरेवोक्ता, न तु संसिद्धिः। संसिद्धिस्तु यावद्भिर्जन्मभिस्तस्य योगस्य परिपाकः स्यात्, तावद्भिरेवेत्यवसीयते। यस्तु न कदाचिदपि योगे शैथिल्यप्रयत्नः, स न योगभ्रष्टशब्दवाच्यः।

किन्तु "बहुजन्मविपक्वैश्च सम्यग्योगसमाधिभिः। द्रष्टुं यतन्ते यतयः शून्यागारेषु यत्पदम् ॥" इति कर्द्दमोक्तेः सोऽपि नैकेन जन्मना सिध्यतीत्याह—प्रयत्नाद्यतमानः प्रकृष्टयत्नादपि यत्नवानित्यर्थः। तु-कारः पूर्व्वोक्ताद्योगभ्रष्टादस्य भेदं बोधयति। संशुद्धकिल्बिषः सम्यक्परिपक्वकषायः। सोऽपि नैकेन जन्मना सिध्यतीति सः। परां गतिं मोक्षम् ॥ ४५ ॥

गी०भू०—अथामुत्रिकीं सुखसम्पत्तिमाह—प्रयत्नादिति। पूर्व्वकृतादपि प्रयत्नादधिकमधिकं यतमानः पूर्व्वविघ्नभयात् प्रयत्नाधिक्यं कुर्व्वन् योगी तेनोपचितेन प्रयत्नेन संशुद्धकिल्बिषो निर्धौतनिखिलान्यवासनः, एवमनेकैर्जन्मभिः संसिद्धः परिपक्वयोगो योगपरिपाकादेव हेतोः परां स्वपरात्मावलोकलक्षणां गतिं मुक्तिं याति ॥४५॥

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥४६॥

सारा०ब०—कर्म्मज्ञानतपोयोगवतां मध्ये कः श्रेष्ठ इत्यपेक्षामाह—तपस्विभ्यः कृच्छ्रचान्द्रायणादि—तपोनिष्ठेभ्यो ज्ञानिभ्यो ब्रह्मोपासकेभ्योऽपि योगी परमात्मोपासकोऽधिको मत इति ममेदमेव मतमिति भावः। यदि ज्ञानिभ्योऽप्यधिकस्तदा किमुत कर्म्मिभ्य इत्याह—कर्म्मिभ्यश्चेति ॥ ४६ ॥

गी०भू०—एवं ज्ञानगर्भो निष्कामकर्म्मयोगोऽष्टाङ्गयोगशिरस्को मोक्षहेतुस्तादृशाद्योगाद्विभ्रष्टस्यान्ततस्तत्फलं भवेदित्यभिधाय योगिनं स्तौति—तपस्विभ्य इति। तपस्विभ्यः कृच्छ्रादितपःपरेभ्यः ज्ञानिभ्योऽर्थशास्त्रविद्भ्यः कर्म्मिभ्यः सकामेष्टापूर्त्तादिकृद्भ्यश्च योगी मदुक्तयोगानुष्ठाताधिकः श्रेष्ठः मतः। आत्मज्ञानवैधुर्य्येण मोक्षानर्हेभ्यस्त्यापस्वादिभ्यो मदुक्तो योगी समुदितात्मज्ञानत्वेन

मोक्षार्हत्वात् श्रेष्ठः ॥४६॥

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान्भजते यो मां स मे युक्ततमो मतः॥४७॥

इति श्रीमहाभारते शतसहस्र्यां संहितायां वैयासिक्यां भीष्मपर्व्वणि श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्ज्जुनसंवादे ध्यानयोगो नाम षष्ठोऽध्यायः ।

सारा०ब०---तर्हि योगिनः सकाशान्नास्त्यधिकः कोऽपीत्यबसीयते, तत्र मेवं वाच्यमित्याह--योगिनामिति, पञ्चम्यर्थे षष्ठी निर्द्धारणयोगात्--तपस्विभ्यो ज्ञानिभ्योऽधिक इति पञ्चम्यर्थक्रमाच्च योगिभ्यः सकाशादपीत्यर्थः। न केवलं योगिभ्य एकविधेभ्यः सकाशात्, अपि तु योगिभ्यः सर्व्वेभ्यो नानाविधेभ्यो योगारूढ़ेभ्यः संप्रज्ञातसमाधिमद्भ्योऽपीति, यद्वा, योगो उपायाः कर्म्मज्ञानतपोयोगभक्त्यादयस्तद्वतां मध्ये यो मां भजेत, मद्भक्तो भबति, स युक्ततम उपायबत्तमः। कर्म्मी तपस्वी ज्ञानी च योगी मतः, अष्टाङ्गयोगी योगितरः, श्रबणकीर्त्तनादिभक्तिमांस्तु योगितम इत्यर्थः। यदुक्तं श्रीभागवते--"मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्ल्लभः प्रशान्तात्मा कोटिष्वपि महामुने ॥" इति ॥ ४७ ॥

अग्रिमाध्यायषट्कं यद्भक्ति-योगनिरूपकम् ।
तस्य सूत्रमयं श्लोको भक्तकण्ठविभूषणम् ॥
प्रथमेन कथासूत्रं गीताशास्त्रशिरोमणिः ।
द्वितीयेन तृतीयेन तुर्य्येणाकामकर्म्म च ॥
ज्ञानञ्च पञ्चमेनोक्तं योगः षष्ठेन कीर्त्तितः ।
प्राधान्येन तदप्येतत् षट्कं कर्म्मनिरूपकम् ॥

इति सारार्थबर्षिण्यां हर्षिण्यां भक्तचेतसाम् ।
गीतासु षष्ठोऽध्यायोऽयं सङ्गतः सङ्गतः सताम् ॥

गी०भू०—तदित्थमाद्येन षट्केन सनिष्ठस्य साधनानि ज्ञान-
गर्भाणि निष्कामकर्म्माणि योगशिरस्कान्यभिधाय मध्येन परि-
निष्ठितादेर्भगबच्छरणादीनि साधनान्यभिधास्यन् तस्मात्तस्य
श्रैष्ठ्यावेदकं तत्सूत्रमभिधत्ते-योगिनामिति-पञ्चम्यर्थे षष्ठीयम
तपस्विभ्य इति पूर्व्वोपक्रमात्; न च निर्द्धारणे षष्ठीयमस्तु-
बद्यमाणस्य योगिनस्तपस्व्यादिबिलक्षणक्रियत्वेन तेष्वनन्तर्भा-
बात् । यद्यपि तपस्व्यादीनां मिथो न्यूनाधिकताभावोऽस्ति,
तथाप्यबरत्वं तस्मात् समानम्, स्वर्णगिरेरिव तदन्येषामुच्चा-
बचानां गिरीणामिति। यः श्रद्धाबान्मद्भक्तिनिरूपकेषु श्रुत्यादि-
बाक्येषु दृढ़बिश्वासः सन् मां नीलोत्पलश्यामलमाजानुपीवर-
बाहुं सवितृकरबिकसितारबिन्देक्षणं बिद्युदुज्ज्वलबाससं किरीट-
कुण्डलकटककेयूरहारकौस्तुभनुपुरैः बनमालया च बिभ्राजमानं
स्वप्रभया दिशो बितमिस्राः कुर्व्वाणं नित्यसिद्ध-नृसिंहरघुवर्य्या-
दिरूपं सर्व्वेश्वरं स्वयं भगबन्तं मनुष्यसंनिवेशिबिभुविज्ञानानन्द-
मयं यशोदास्तनन्धयं कृष्णादिशब्दैरभिधीयमानं सार्व्वज्ञसर्व्वै-
श्वर्य्यसत्यसङ्कल्पाश्रितबात्सल्यादिभिः सौन्दर्य्यमाधुर्य्यलावण्या-
दिभिश्च गुणरत्नैः पूर्णं भजते श्रबणादिभिः सेबते, मद्गतेन
मदेकासक्तेनान्तरात्मना मनसा बिशिष्टस्तिलमात्रमपि मद्वियोगा-
सहः सन्नित्यर्थः, मद्भक्तः सर्व्वेभ्यस्तपस्व्यादिभ्यो योगिभ्यो मे
सर्व्वेश्वरस्य सर्व्वाणि बस्तूनि युगपत् पश्यतो युक्ततमोऽभि-
मतः-तपस्यादियुक्तः निष्कामकर्म्मी युक्ततरः मदेकभक्तो युक्त-
तम इत्यर्थः । अत्र व्याचष्टे-ननु योगिनः सकाशान्न कोऽप्य-
धिकोऽस्तीति चेत्तत्राह-योगिनामिति । योगारोहतारतम्यात्
कर्म्मयोगिनो बहवस्तेभ्यः सर्व्वेभ्योऽपीति ध्यानारूढ़ो युक्तः

समाध्यारूढ़ो युक्ततरः श्रवणादिभक्तिमांस्तु युक्ततम इति । "भक्ति"शब्दः-सेवाभिधायी-"भज इत्येष वै धातुः सेवायां परिकीर्त्तितः । तस्मात् सेवा बुधैः प्रोक्ता 'भक्ति'शब्देन भूयसी" इति स्मृतेः । एतां भक्तिं श्रुतिराह-"श्रद्धाभक्तिध्यानयोगादवेहि" इति, "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥" इति, "भक्तिरस्य भजनं तदिहामुत्रोपाधिनैरास्येनामुष्मिन् मनःकल्पनमेतदेव नैष्कर्म्यम्" इति, "आत्मानमेव लोकमुपासीत" इति, "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेयि" इति चैवमाद्याः । सा च भक्तिर्भगवत्स्वरूपशक्तिवृत्तिभूता बोध्या-"विज्ञानघनानन्दघना सच्चिदानन्दैकरसे भक्तियोगे तिष्ठति" इति श्रुतेः । तस्याः श्रवणादिक्रियारूपत्वं तु चित्सुखमूर्त्तेः सर्व्वेश्वरस्य कुन्तलादिप्रतीकत्ववत् प्रत्येतव्यम्-श्रवणादिरूपाया भक्तेश्चिदानन्दत्वन्त्वनुवृत्त्यानुभाव्यं सितानुसेवया पित्तविनाशे तन्माधुर्य्यमिवेति ॥४७

गीताकथासूत्रमवोचदाद्ये कर्म्म द्वितीयादिषु कामशून्यम् ।
तत् पञ्चमे वेदनगर्भमाख्यन् षष्ठे तु योगोज्ज्वलितं मुकुन्दः ॥

इति श्रीमद्भगवद्गीतोपनिषद्भाष्ये षष्ठोऽध्यायः ।

सप्तमोऽध्यायः

श्रीभगवानुवाच-

मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥१॥

सारा०व०—कदा सदानन्द-भुवो महाप्रभोः,
कृपामृताब्धेश्चरणौ श्रयामहे ।